4. 36–45. Jejjaṭa, explaining the significance of the word 'bhāvita', says that one should go for sex only after the drug is wholly assimilated and not just after the intake[3]. Commenting on 'snigdha' and 'madhura' he says that the substances like curd and honey though amla and rūkṣa act as aphrodisiac because of prabhāva. Drugs act not only by guṇa but also by prabhāva which is inexplicable and knowable only by scriptures[4].

One should go to woman only when fully impelled by himself and also stimulated by women's gestures.[5]

After sexual intercourse, bath, food etc. are to be taken according to their proper time.[6]

The two examples of pond with little water and dried wood indicate that in the first example there is prospect of further filling with water and as such in children there may be loss of dhātus but not total destruction whereas in old people there is total destruction even only by contact like dried and rotten wood. Secondly, there is predominance of kapha in children which sustains life whereas in old people the aggravated vāta hastens the process of decay.[7]

---

1. पादांशिकैरिति घृतापेक्षया पादप्रमाणैः। Ck.
2. उत्कारिका कार्या इत्यत्र पुनः पाकेनैवोत्कारिकाकरणम्। Ck.
3. भावितग्रहणेनैतज्ज्ञापयति—यावत् सर्वात्मनाऽन्वितं देहे द्रव्यं स्यात्तावद् गन्तव्यम्, न प्रयोगान्तरमेवेति। JJ.
4. ननु दध्यादीनि अम्लत्वेऽपि शुक्रजननानि मध्वादीनि रूक्षाण्यपि यत् किंचित् मधुराण्येतद् विरोधीति? उच्यते, प्रभावाद् दधिमध्वादीनि रूक्षाण्यपि वाजीकरणानि। न केवलं गुणप्रभावादेव द्रव्याणि कारकाणि किन्तु प्रभावादपि। द्रव्यप्रभावश्चाचिन्त्यः शास्त्रैकसमधिगम्य एवेति न विरोधः। JJ.
5. ननु चात्मवेगेन चोदीर्ण इति व्यर्थः, न हि परवेगेनोदीर्णता संभवति? उच्यते—अयमभिप्रायः—यावदिच्छयोद्भूतवेगः परां हर्षकाष्ठामारूढस्तावत् प्रमदां व्रजेत्। उक्तञ्च—नानुद्भूतहर्ष इति। किंच, स्त्रीगुणैश्च प्रहर्षितो हावभावसंवाहनादिभिरित्यर्थः। JJ.
6. ननु चार्धरात्रे स्नानादीनामयुक्तत्वादारम्भवैयर्थ्यम्? उच्यते, चापलादनियतगामिनोऽपि प्रायशो दृश्यन्ते। तस्माद् यदा स्नानान्नादयः संभवन्ति तदैव कर्त्तव्यमित्यभिप्रायः। JJ.
7. द्विदृष्टान्तोपादानं किमर्थं तटाकमिव काजलं जन्तुजग्धमिव काष्ठमिति? बालस्यानुत्पादितशुक्रत्वात् वृद्धस्योपक्षीणशुक्रत्वाच्च दृष्टान्तेन दार्ष्टान्तिकसिद्धेरिति, उच्यते—बालवृद्धयोर्यद्यप्यल्पशुक्रत्वं तथापि तटाकस्याल्पजलत्वेऽपि आगामिजलपूरणं संभवति, तस्य हि कालुष्यक्षोभणादयो भवन्ति, न पुनरत्यन्ततटाकविनाशः। एवं बालस्याप्यल्पवीर्यत्वादल्पा रसादयो वृद्धस्य त्वपचयादेवापचयोऽभिगमने एव शुष्करूक्षकाष्ठस्येव जन्तुजग्धस्पृष्टमात्रस्य विनाश इति, अयं विशेषोऽभिधित्सित इति। किंच, बालस्य कफभूयिष्ठत्वाच्छुक्लक्षयेऽपि नात्यन्तविनाशः, श्लेष्मणोपष्टब्धत्वात्। वृद्धस्य तु शुक्रक्षयाद् वातभूयिष्ठत्वात् भूयो मातरिश्वाप्यायितबलोऽसूनेव हरतीति युज्यते दृष्टान्तद्वयम्। JJ.

Strength of body and that of mind is divided in three degrees–superior, inferior and medium. Harṣa (exhilaration) depends on the strength of body and mind and sexual potency depends on exhilaration. Here exhilaration means not only physical or mental but (erection) of penis preceded by psychic pleasure.[1]

Ck almost follows Jejjaṭa[2]. He further says that due to infliction of body and mind by kṣaya etc. there is no 'harṣa' in spite of sufficient nutrition and consequently no sexual potency[3].

GD interprets 'udīrṇa' as 'udgataliṅga'[4] (with penis erected). He reads 'abhicārāt' instead of 'avicārāt'. Concluding he says that harṣa (penile erection) requires strength of both body and mind even in absence of either it can't happen[5].

JN reads 'hṛṣṭasya' in place of 'tṛptasya' on the authority of the Aṣṭāṅga-saṅgraha which he quotes[6].

4. 46–49. Śukra permeates the whole body. To clarify this Caraka has given three examples. Jejjaṭa initiates discussion by asking question what is the necessity of these examples ? can it not be served by any one of them ! He answers–no. All these have their own significance and as such all are purposeful. The example of sugarcane indicates that as the juice permeates the whole cane but is manifested by the process of churning so śukra, in some persons, is manifested likewise by moderate sexual intercourse. In the second example of curd, as butter comes out of it only with a little effort so in some persons śukra comes out even by thought of sex. Lastly, there are persons whose śukra comes out after great effort like extraction of

---

1. देशबलसत्वबलयोस्त्रित्वं प्रवरावरमध्यभेदेन । ··· ··· तस्माद् देहबलं सत्त्वबलं चापेक्षते हर्षः, शक्तिश्च हर्षाज्जायते । आपेक्षिकी शक्तिश्चात्र स्त्र्यभिगमनलक्षणा । हर्षश्चात्र मानसप्रसादपूर्वको वरांगमथनस्येष्टो, न केवलः शरीर एव मानस एव वा । JJ.

2. बालस्य तडागदृष्टान्तेन पुनरपि शुक्रसद्भावं कफप्राधान्यं च दर्शयति । वृद्धस्य तु जन्तुजग्धत्वादिदृष्टान्तेन विनष्टस्यापुनर्भावं शुक्रस्य तथाऽभूयिष्ठतां च दर्शयति । Ck.

3. एतेन सत्यपि तृप्तिजनिते बले क्षयादिना देहमनसोरुपहतत्वाद्धर्षो न भवति, हर्षाभावाद् व्यवायशक्तिर्न भवतीत्युक्तं भवति । Ck.

4. उदीर्ण उद्गतलिङ्गः । GD.

5. हर्षो लिङ्गोद्गमहेतुस्तु देहबलसत्त्वबलोभयापेक्षी, नहि केवलदेहबलाद् भवति न वा केवलमनोबलाद् भवति । शक्तिश्च मैथुनशक्तिर्लिङ्गोद्गमाक्रमादिरूपा हर्षजा, स च हर्षो न धातूनां शुक्रस्य वा क्षयाद् भवति सति च मनोबले देहबलाभावात् । भयाच्चाविश्रम्भादिभ्यश्च हर्षो न भवति सत्यपि देहबले मनोबलाभावात् । GD.

6. इह शुक्रक्षयादिना देहमनसोः दुर्बलत्वात् कथंचित् सत्यपि हर्षे व्यवायशक्तिर्न भवति । उक्तंच ··· ··· । JN.

oil from sesamum seeds. Thus the three examples are set looking to the three types of persons[1].

Explaining the significance of 'saṃsparśane' in addition to 'dehe', Jejjaṭa says that the word 'deha' is very wide in sense including even hairs etc. where śukra is absent. To denote this difference, these words are read separately[2].

Ck, following Jejjaṭa, explains the significance of these examples in the similar way. They indicate the persons from whom śukra can be expelled with moderate, little and great effort[3].

'Saṃsparśana' means 'having touch sensation'—thus hairs etc., which are devoid of it, are not locations of śukra[4].

The example of wet cloth indicates that the discharge of semen, in no way, affects the source organs[5].

Ck defines 'harṣa' as emotion leading to determination (for sex), expulsion of semen, erection of penis etc.[6]

Thus semen is an inrtrument for manifesting the (embodied) self which is unmanifest. Similarly 'ārtava' (ovum) also plays the similar role[7].

GD interprets 'saṃsparśana' as 'tvak' (skin) particularly at the sexual organs. Śukra and also mind follows upto this point[8]. He reads 'tarṣāt saratvācca' as 'saratvāt saukṣmyācca'. He also reads 'aṇupravaṇabhāvācca' as 'anuplavana-bhāvācca' interpreting 'anuplavana' as 'movement'[9].

1. त्रिदृष्टान्तेनैतज्ज्ञापयति–यथा दृष्टान्तनानात्वं तथा दार्ष्टान्तिकस्यापि नानात्वम् । यथेक्षौ सर्वत्रानुगतोऽपि रसो मध्यमानया चेष्टया आविष्क्रियते, एवं पुमानपि कश्चिदेवंविधो भवति यस्य ··· ··· क्रियया भवति प्रवृत्तिरन्त्यधातोः । अन्यस्त्वेवंविधः पुमान् यस्य संकल्पमात्रेणैव दध्न इव नवनीतमल्पेनैव प्रयासेन व्यज्यते । तथाऽन्यस्य पुंसस्तिलेभ्यस्तैलमिव महता प्रयासेनाभिव्यक्तिर्नीयते । तस्मात् पुरुषनानात्वाविष्करणाय दृष्टान्तत्रयोपादानमिति । JJ.
2. देहस्य सकलार्थवाचकत्वात् केशादीनामपि ग्रहणं स्यात् । तदन्तर्भूतत्वात्तेष्वपि शुक्रमिति स्यात् प्रतीतिस्तन्निषेधाय द्वयोरपि ग्रहणम् । JJ.
3. इक्ष्वादिदृष्टान्तत्रयेणानतिप्रयत्नाल्पप्रयत्नमहाप्रयत्नवाह्यशुक्रान् पुरुषान् यथाक्रमं दर्शयति । Ck.
4. संस्पर्शन इति संस्पर्शनवन्ति, तेन केशादौ संस्पर्शनाव्याप्तेः शुक्रमपि नास्तीति दर्शयति । Ck.
5. आर्द्रपटदृष्टान्तेनाश्रयानुपघातेन शुक्रस्रवणं दर्शयति । Ck.
6. हर्षः संकल्पपूर्वकशुक्रोद्रेकध्वजोच्छ्रायादिकरीच्छा । Ck.
7. एतेन, अव्यक्तस्यात्मनो व्यक्तशरीरनिर्वृत्तौ शुक्रं हेतुरित्युक्तं भवति । शुक्रं चेह प्रकरणागतत्वेनोक्तं, तेन आर्तवमप्यात्मनो रूपद्रव्यं ज्ञेयम् । Ck.
8. देहे संस्पर्शनं त्वक् विशेषत उपस्थं, तत्र सर्वत्र शुक्रमनुगतं मनश्च त्वक्समवायि व्यापकञ्च भवति । GD.
9. अनुप्लवनं प्रचलनम् । GD.

JN, about location of śukra, says that it permeates all over the body through the śukradharā kalā particularly in majjā (marrow), muṣka (testicles) and stana (breasts)[1]. He has made a compromise by reading 'aṇuplavanabhavacca', meaning plavana as 'having nature of moving out[2].

4. 50–51. Ck informs about the variants 'vyajyate' and 'vyajyāt' in place of 'vrajet'. These denote the sexual potency by which man goes frequently to woman and expresses his manhood[3].

This definition covers all the three types of vājīkaraṇa e. g.– (1) śukravṛddhikara (that which increases semen) like māṣa (2) śukrasrutikara (that which impels discharge of semen) such as determination (for sex) etc. and (3) śukrasrutivṛddhikara (that which promotes discharge as well as quantity of semen) such as milk etc. All these three types of vājīkaraṇa provide potency and strength for frequent sexual acts[4].

GD, interpreting the word 'adhikaṃ', says that it is in terms of period, frequency, women and intensity[5].

JN further clarifies that vājīkaraṇa is that by which non-horse becomes horse e. g. by which man becomes sexually potent like horse[6].

---

1. शुक्रं शरीरे शुक्रधरां कलामाश्रित्य सर्वाङ्गव्यापित्वेन स्थितम्, विशेषतश्च मज्जमुष्कस्तनेषु । JN.
2. प्लवनभाव: बहिर्निर्गमनस्वभाव: । JN.
3. व्रजेच्चाभ्यधिकमिति पुनः पुनर्गच्छेत् । व्यज्यते इति वा पाठः, तत्रापि भूयो गमनेन नारीषु पुंस्त्वेन व्यज्यते । व्यज्यात् इति पाठेऽपि स एवार्थो विद्वद्भिः सुचिन्तनीयः । Ck.
4. अनेन निरुक्तेन त्रिविधमपि वृष्यमवरुध्यते, यथा शुक्रवृद्धिकरं च माषादि, तथा (शुक्र)स्रुतिकरं संकल्पादि, शुक्रस्रुतिवृद्धिकरं क्षीरादि, तथा यदुक्तमन्यत्र–'शुक्रस्रुतिकरं किंचित् किंचिच्छुक्रविवर्धनम्। स्रुतिवृद्धिकरं किंचित् त्रिविधं वृष्यमुच्यते ॥' इति । त्रिविधमपि हीदं व्यवाये बलवत्त्वं पुनः पुनर्व्यवायशक्तिञ्च करोति । Ck.
5. अधिकमिति कालतो वारतो नारीतश्च वेगबलतश्चाधिकमिति । GD.
6. अवाजी वाजीव क्रियते अनेन इति वाजीकरणम्, येन पुमान् वाजीव मैथुनसमर्थः क्रियते तद् वाजीकरणम् । JN.

CHAPTER III

1–2. Therapy has been said of two types promotive (including preventive) and curative. The former is described in the preceding two chapters, now the latter is being taken up. Here too, jvara (fever) has been given the top position because of its importance due to earliest origin (among the physical disorders) and inevitable occurrence during birth and death.[1]

Ck, GD and JN express the same idea.

3. In the word 'Vijvara' 'jvara' is used in wide sense denoting 'disease' in general and as such this epithet means 'free from ignorance and physical diseases so that the facts could be explained in right way Moreover, if the teacher is himself diseased, his preachings on elimination of disorder would only be a matter of ridicule.[2]

The use of the word 'vivikta' is significant because it specifies that teachers should be approached when they are quiet and calm in a secluded and peaceful place.[3]

Query about fever should not be taken as repetition (because it is already described in the section on Nidāna) as here specific disorder is meant and management, which is briefly mentioned earlier, has to be described in detail.[4]

Ck interprets in the same way but in simpler words.[5]

---

1. द्विविधं भेषजमुक्तं-स्वस्थस्योर्जस्करं व्याधिनिर्घातकरञ्च । स्वस्थस्योर्जस्करं रसायनवाजीकरणतन्त्रे निर्लोठितन्, (इदानीं) व्याधिनिर्घातकरस्यावसरः । संप्रति च वक्तव्ये ज्वरस्यैव प्राधान्यादग्र उत्पन्नत्वाच्च जन्मप्रलययोरवश्यंभावित्वात् प्राधान्यं, कथं यावता च कामादीनामभिघातनिमित्तानाञ्च प्रागुत्पन्नत्वात् ? न, शारीराणामित्यभिप्रायः । JJ.

2. विज्वरवचनं कस्मात् ? यदि व्याधितः स्वयमुपदिशति स हास्यो भवति । ज्वरशब्दस्य रोगपर्यायत्वादज्ञान-शारीरव्याधिनिर्मुक्त इति यथास्थितवस्तुप्रकाशनम् । JJ.

3. विविक्ताद्यभिधानादेतज्ज्ञापयति-एकान्ते सुप्रसन्ना आसीनाश्च गुरवः प्रष्टव्याः । JJ.

4. ज्वरसन्देहग्रहणं कस्मात् प्रस्तुतत्वान्निदाने च निर्लोठितत्वात्, न, ज्वरस्य सर्वरोगाभिधानाद विशेषज्वराभिप्रायाददोषः । सन्देहः रुद्रकोपपरिग्रहाभ्यां प्रवृत्तेः चिकित्सासूत्रमात्रार्थमनुक्तविषयार्थनिश्चयत्वाददोषः । JJ.

5. विज्वरमिति विज्वरशब्दो नीरोगोपदर्शकः, यतो ज्वरशब्देन चात्र सामान्येन रोगोऽभिमतः । नीरोगत्वेनेह रोगप्रशमनपृच्छाश्रयतां गुरोर्ब्रवीति । ज्वरसंदेहमिति ज्वरनिदानोक्तातिरिक्तज्वरधर्मविषयं संदेहम् । विविक्त इत्यादिना एवं गुरवः प्रष्टव्या इति । Ck.

GD interprets the word 'sānta' as 'jīvanmukta'[1] (liberated while living).

4–10. 'Dehendrīyamanastāpī' is neither a question nor elucidation but only denotes the importance of the topic as well as peculiar nature of the disease.[2]

The question arises–deha (body) itself, because of being substratum, is wide enough to include senses as well as mind, what is the significance of their separate mention ? Moreover, body and mind are described as two locations of dlseases then what is the necessity of the third one 'indriya'[3] ?

All these three are quite distinct in this respect. For instance, tumour etc. are located in body, narcosis etc. in mind and disturbance in clarity etc. are located in senses. Jvara afflicts all the three simultaneously the symptoms of which are already described clearly. Hence, the mention of all the three is significant.[4]

Others analyse the word 'dehendriyamanas' as 'dehendriya' and 'manas', the former meaning tactile sense which pervades all the senses and covers the whole body. Thus there are only two locations of the disease.[5]

Separate mention of 'balī' (severe) shows its acute fatal nature.[6]

Ck says—jvara is chief among the disorders because it afflicts body, senses and mind. There are diseases purely physical like tumour etc., purely mental as delusion etc., and purely sensory as timira (an eye–disease) whereas jvara afflicts all the three simultaneously with high temperature and disturbance in mind and senses.[7]

---

1. शान्तं सर्वतोनिवृत्तं जीवन्मुक्तमित्यर्थः । GD.
2. देहेन्द्रियमनस्तापीति न तु प्रश्नो नापि व्याकरणं, न, अर्थगरीयस्त्वप्रख्यापनात्, सर्वव्याधिवैलक्षण्यादारम्भः । JJ.
3. देहग्रहणादिन्द्रियमनोग्रहणं, (इन्द्रियं) मनश्च तर्हि किमिति पृथगुक्ते यतो हि आश्रयपरितापादाश्रितपरितप्तेरिन्द्रियमनसी परितप्येते, कुड्योपघाते तदाश्रितचित्राभिघातवत् । शरीरमनसोर्व्याध्यधिष्ठानत्वात् इन्द्रियाश्रयत्वमधिकम् । JJ.
4. न, देहेन्द्रियमनसां भिन्नत्वात् । तद्यथा-अर्बुदादयो देहाश्रिताः, मदादयो मन आश्रिताः, इन्द्रियाश्रितास्तु व्यक्त्याकुलत्वादयोऽस्य युगपत् सर्वव्यापित्वम् ··· ··· इति व्यतिरेकादेवात्र त्रयाणां ग्रहणं साधु । JJ.
5. अन्ये त्वन्यथा व्याख्यानयन्ति-अधिष्ठानद्वयमेव (न त्रयम् इति, तेन) देहेन्द्रियञ्च मनश्च देहेन्द्रियमनसी ते तप्तुं शीलं यस्य । देहेन्द्रियमित्यनेन स्पर्शनेन्द्रियमभिप्रेतम्, कुतः, तस्य व्यापकत्वात्, तच्च हि सर्वेन्द्रियाणि व्याप्नोति । JJ.
6. देहेन्द्रिय (मनस्) तापित्वेन बलित्वे सिद्धे बल्यभिधानमाशु संक्षेप्तृत्वादिभिर्बले प्रधानतया । JJ.
7. देहेन्द्रियमनस्तापीत्यादि हेतुगर्भं ज्वरप्रधानत्वे विशेषणम् । केचिद् देहमात्रतापिनोऽर्बुदादयः, केचित् मनस्तापिन एवातत्वाभिनिवेशादयः, केचिदिन्द्रियतापिन एव तिमिरादयः, अयं तु त्रितयतापी । ··· ··· अत्र शरीरतापित्वं संतापादिना, मन इन्द्रियतापित्वं च वैचित्यमित्यादिना वक्ष्यति । JJ.

It is originated first among the somatic disorders and not the mental ones as they were already existing earlier.[1]

Jvara is called 'bali' (severe) as it causes various disorders.[2]

GD interprets prakṛti (inherent cause), pravṛtti (initial manifestation), prabhāva (inexplicable effect), kāraṇa (causes of manifestation) and adhiṣṭhāna (location).[3]

He interprets 'balakālātmalakṣaṇam' in a different way taking balakāla (time of aggravation) and ātmalakṣaṇa[4] (self-nature) while Ck has interpreted as 'bala, kāla and ātmalakṣaṇa'[5] all the three separately. Similarly. GD reads 'vidhibhedañca' instead of 'vidhibhedācca' as accepted by JJ and Ck. In both these cases, JN follows GD.

11. 'Eka artha' (one meaning) characterises pain.[6]

'Nāma' and 'paryāya' carry the same meaning why both are mentioned ? Paryāya sometimes denotes other meaning as well. 'Vikāra' etc., though meaning diseases in general, here denote specifically pyrexia. Others interpret that if only 'paryāya' were there it might create doubt (as to paryāya of what) and as such 'Nāma' is given.[7]

Ck further clarifies that the synonyms 'vikāra' etc. denote specific meaning 'fever' on the basis of the context.[8] Explaining the simultaneous use of 'nāma' and 'paryāya', he says that the word 'nāma' is only in the sense of expression and

---

1. सर्वरोगाग्रज इति शारीरसर्वरोगाग्रजः, मानसास्तु रोगाः ज्वरादेः प्रागवस्थिता एव सत्ययुगादावपि । JJ.
2. बलित्वञ्चास्य भूरिविकारकर्तृत्वात् । JJ.
3. प्रकृतिं समवायिकारणं, प्रवृत्तिं प्रथमतः प्रकाशविस्तारम्, प्रभावं अचिन्त्यक्रियां, कारणानि अभिव्यक्तिहेतून्, अधिष्ठानमाश्रयमधिकरणमिति यावत् । GD.
4. बलस्य कालंचात्मलक्षणं स्वरूपलक्षणम् । GD.
5. बलं च कालश्चात्मलक्षणं चेति बलकालात्मलक्षणमिति द्वन्द्वः । Ck.
6. एकोऽर्थो दुःखलक्षणः । JJ.
7. नामपर्याययोरेकार्थत्वादयुक्तमभिधानम् । शब्दानामभिधानं पर्यायः । यथा सन्ति त्वर्थान्तराणि पर्यायशब्दाभिहितानि । एते च पर्यायाः सर्वेषां व्याधीनां सामान्या अपि सन्तापलक्षणस्यार्थस्य विशिष्टस्य प्रतिपादनाय निहिताः । ...... नामपर्यायशब्दयोरन्ये परिहारं वर्णयन्ति । यदि पर्यायग्रहणमेव केवलं स्यात्, संशयप्रायैर्वा, तस्माद् विशेषणायोपादीयते नामपर्यायैरिति । JJ.
8. विकारादयश्च यद्यपि सामान्येन रोगाभिधायिनः तथापि प्रकरणादिह ज्वर एव विशिष्टे व्याधौ वर्त्तन्ते । Ck.

'paryāya' means synonyms[1] or 'nāma-paryāya' may mean synonyms which are actually in use and not obsolete.[2]

GD does not touch these points but reads 'ekārtha' instead of 'eko'rtho'. JN also adopts this reading.

12. Interpreting 'prakṛti' of jvara, JJ says it is of two types—(1) originated and (2) natural. Physical and mental doṣas come in the latter.[3]

Here the word 'dehī' denotes 'body' and not soul which is free from disorders.[4]

Ck further explaining it, adds that 'prakṛti' here denotes 'svabhāva' ('self-being') and the cause which is transformed in the effect.[5]

About 'dehī' he puts his ideas in simple way and says that it denotes physical puruṣa and not only soul which is untouched by any change.[6]

GD further explains—prakṛti is that which on modification gets transformed into effect.[7] Again he discusses that the two types of jvara mentioned here are not in conformity of those (innate and exogenous) mentioned earlier (in ch. mahārogādhyāya Su. 20) as the latter concerns only with the somatic diseases. Though fever is also caused by accidental factors, it is not mentioned here as it is already included in the words 'śārīra' and 'mānasa'. Moreover, vitiation of psychic and somatic doṣas always precede manifestation of exogenous disorders.[8]

JN further elucidates the definition of prakṛti by giving traditional example of

---

1. नामशब्दः प्रकाशने, तेन एकोऽर्थो नाम ज्वरलक्षणो रोगलक्षणो वा पर्यायैरुच्यते । Ck.
2. किंवा, नामपर्यायैरिति नामरूपैः पर्यायैः व्यवह्रियमाणैः पर्यायैरित्यर्थः । यतः पर्यायोऽव्यवह्रियमाणोऽपि भवति । Ck.
3. प्रकृतिरिदानीं व्याक्रियते ··· ··· सा च द्वयी उत्पत्तिकृता स्वाभाविकी च । उत्पत्तिकृता दोषाः शारीर-मानसाः, शारीरा वातादयो, मानसौ रजस्तमसी, स्वाभाविकी पंचत्वलक्षणा यमस्वभावेत्यर्थः । JJ.
4. देह्यात्मेत्युच्यते, तस्य देहः स्वस्वामिभावेन ··· ··· देहश्च देहिवत्, गुणश्च गुणिवदिति तन्त्रयुक्तिन्यायात् । JJ.
5. प्रकृतिशब्देनेहे स्वभावः, तथा यत्कारणमयं कार्यं भवति तदुच्यते । Ck.
6. देहिशब्देन शरीरवान् पुरुषोऽभिप्रेतो न केवल आत्मा, तस्य निर्विकारत्वात् । Ck.
7. या विक्रियमाणा यद्रूपान्तरमापद्यते तस्य सा प्रकृतिरित्यर्थः । GD.
8. ननु आगन्तुनिजविभागादिति यदुक्तं तदनेन विरुध्यते इति चेन्न, तत्र शारीरव्याध्यभिप्रायेणागन्तुनिज-विभागात् इत्युक्तत्वात् । ननु ज्वरस्याप्यागन्तुजत्वमस्ति तस्य प्रकृतिस्त्वनेन लभ्यते इति चेन्न, अत्र शारीर-पदेन शारीरागन्त्वाद्यभिघातजादेर्मानसपदेन मानसागन्तोः कामशोकजादेः संग्रहात् । ··· ··· तस्मादागन्तो-रप्युत्पत्तेः पूर्वमागन्तुहेत्वदृष्टविशेषेण शारीरमानसदोषदुष्टिः अवश्यं मन्तव्या इति । GD.

thread and cloth, thread being prakṛti (material cause) of cloth.[1] The causative nature of doṣas is proved by anvyayavyatireka (law of agreement in presence and absence).[2]

13. Jvara is of the nature of Yama, god of death, as it causes death. It is called Kṣaya, because of causing decrease (of dhātus), Tamas because of disturbing the mind, Jvara because of producing high temperature and Mṛtyu as it causes death.[3]

Others read 'yamātmajaḥ'. In that case, it would mean 'caused by 'yama' (dual) such as psychic-somatic or greed-wrath or it may mean 'progeny of yama'.[4]

'Pāpmā' is left in Jejjaṭa's comm. Ck interprets it as 'that produceable by sin'.[5] The plural number indicates that kṣaya etc. are different aspects of jvara.[6] Here the word 'mṛtyu' denotes signs indicating death and not death itself because death can't be said as cause of itself.[7]

Or kṣaya etc. which are well known disease–entities different from fever are mentioned here in the context of fatal nature like that of fever.[8] Ck also informs of a version pañcapratyaya' having the same sense.

GD, however, reads, **'मृत्युश्चोक्तोऽयमात्मजः'** and interprets mṛtyu as mṛtyuhetu (cause of death) and 'ātmaja' as caused by adharma originated by self-done evil deeds.[9]

JN reads the above with slight change as **'मृत्योः'** instead of **'मृत्युः'** and interprets that Jvara is said as 'ātmaja' (son) of mṛtyu (yama).[10] He also mentions the reading **'मृत्युश्चोक्तो यमात्मजः'**.

---

1. प्रकृतिः उत्पत्तौ कारणं बीजभूतम्, पटस्य तन्तव इव । JN.
2. एवं दोषाणां भावाभावयोर्ज्वरस्य भावाभावाभ्यां ज्वरस्य दोषप्रकृतिकत्वमन्वयव्यतिरेकाभ्यां सिध्यति । JN.
3. क्षयहेतुत्वात् क्षयः, मोहनात्मकत्वात्तमः, सन्तापहेतुत्वाज्ज्वरः, मारणात्मकत्वान्मृत्युः । JJ.
4. अन्ये तु "यमात्मजाः" इत्येवं पठन्ति, व्याख्यानयन्ति च ··· ··· यमौ प्रसूत इति यद्वत् । तस्माद् यमाच्छारीरमानसदोषाद यमाल्लोभाद् द्रोहाद् वा । अथवा यमात्मजा यमसूनवः इति । JJ.
5. पापनिर्वर्त्यत्वात् पाप्मा । Ck.
6. अत्र च "उक्ताः" इति तथा "यमात्मकाः" इति बहुवचनमेकस्मिन्नर्थे ज्वरे क्षयकर्तृत्वादिधर्मभेदविवक्षया ज्ञेयम् । Ck.
7. अस्मिन् व्याख्याने मृत्युशब्देन मृत्युसूचकं रिष्टमुच्यते, यतो न मृत्युरेव मृत्युकरो भवति । Ck.
8. किंच क्षयादयः स्वनामप्रसिद्धाः यमस्वरूपाः भिन्ना एव ज्वरात्, इह ज्वरस्य तु यमात्मकत्वाभिधानप्रसंगात्तेऽप्युच्यन्ते । Ck.
9. मृत्युर्मृत्युहेतुरुक्तः, आत्मजः स्वयंकृतदुष्कर्मजनिताधर्मजत्वादुक्तः । GD.
10. अयं ज्वरः मृत्योः यमस्य आत्मजः पुत्र इति चोक्तः । JN.

14. 'Pravṛtti' means 'initial origin.[1] Initial origin of jvara from hoarding has been described in detail and that from Rudra's wrath in brief (which is to be detailed here).[2]

Ck defines 'pravṛtti' as 'first manifestation'.[3] He interprets that (simple) manifestation of jvara took place from hoarding and the severe (dāruṇa) one from Rudra's wrath.[4] He utilises the word "पूर्वम्" in two ways—first by relating it with its earlier description in nidānasthāna and again by attaching it to "रुद्रकोपात्" which would mean that the first manifestation of jvara took place from Rudra's wrath and the second one from Parigraha (hoarding).[5]

GD reads 'Parigrahaḥ' (in place of 'Parigrahāt').[6] He also reads' "रुद्रकोपाच्च दारुणात्" as "रुद्रकोपात् सुदारुणात्".

JN interprets it by Sāmānya and Viśesa. Parigraha is sāmānya (general) and Rudra's wrath as viśeṣa (specific) cause of jvara.[7]

15–25. The inevitable presence of jvara in the form of mental confusion during birth and death was even in the initial age (of truth) which continued further in the succeeding age but then it had to cross the boundary and to emerge also in-between due to other etiological factors—or the initial age of righteous persons who did not suffer from disease.[8]

GD has read some words differently as—

तपोविघ्नं शमीकर्तुं	Instead of	तपोविघ्नाशनाः
यज्ञसिद्धिकृतः	"	यज्ञसिद्धिप्रदाः
शत्रुनाशनम्	"	सत्रनाशनम्
त्वमपि चावान्तरेषु च	"	त्वमपचारान्तरेषु च

1. प्रवर्त्तनं प्रवृत्तिः प्रथमजन्म । JJ.
2. परिग्रहात् प्रवृत्तिरुक्ता विस्तरेण, रुद्रकोपादुच्यते निदाने संक्षेपेण (उक्ता) । JJ.
3. प्रवृत्तिः प्रथमाविर्भावः । Ck.
4. परिग्रहाज्ज्वरादिप्रवृत्तिमुक्तां स्मारयति, तदा रुद्रकोपाद् दारुणा प्रवृत्तिर्ज्वरस्य । Ck.
5. सा निदाने पूर्वमुद्दिष्टा ··· ··· पूर्वमिति पदेन रुद्रकोपप्रभवा प्रथमा, परिग्रहप्रभवा तु द्वितीया प्रवृत्तिरिति दर्शयति । Ck.
6. परिग्रह आद्यप्रकाशः । GD.
7. रोगाणां संभवे हेतुर्द्विविधः सामान्यविशेषभेदेन । तत्रादौ सामान्यहेतुमाह-परिग्रहादिति । ··· ··· सामान्य मुक्त्वा विशेषमाह-निदान इति । JN.
8. अत्र च सत्ययुगेऽपि जन्ममरणयोर्मोहरूपज्वरस्य विद्यमानत्वाद् द्वितीययुगेऽपि जन्ममरणयोर्भवनं न ज्वरस्या नुपपन्नम् । तेन यो जन्मादौ निधने च व्यवस्थितः स इदानीमपचारान्तरेषु भविष्यतीति योजनीयम् । किंवा सत्ययुगे च जन्ममरणयोर्मोहरूपज्वरो निष्कल्मषाणां पुरुषाणां नासीदेवेति मन्तव्यम् । Ck.

The last reading means the existence of jvara in the life-period between birth and death.[1]

JN, among the above readings, follows Ck in case of the second and the fourth and GD in that of the first and the third. He has further elucidated the point of existence of jvara in life.[2]

26–27a. Interpreting 'prabhāva, Jejjaṭa says—'prabhāva' is superior becoming' which means extraordinary force (power) from birth and is known from inference on the basis of its result.[3] 'Santāpa' is prabhāva of jvara because if it were due to pitta it would not be found in that caused by vāta and kapha. 'Santāpa', apart from pyrexia, denotes distress and is mentioned as the specific symptom of jvara.[4] 'Santāpa' does not mean external heat only but also internal one as observed in cartain types of sannipāta jvara. 'Santāpa' can't be taken as distress in general as it would, in that case, include all the diseases. Therefore, psychosomatic distress found in eight types of fever alone can be said as 'santāpa'.[5]

Jejjaṭa distinguishes between prabhāva and ātmalakṣaṇa as follows—ātmalakṣaṇa is the specific symptom only while prabhāva, besides this, includes other associated symptoms like tṛṣṇā (thirst).[6]

Ck defines Prabhāva as unconditional power.[7]

27b. Jejjaṭa discussing difference between prakṛti and kāraṇa ksays—prakṛti is of two types-initial (originating) and natural which denote only the emergence of the disorder while kāraṇa is the etiologocal factor while operating thereafter till

1. अवान्तरेषु जीवत्कालेऽपि । GD.
2. जन्ममरणयोः, मध्ये चापि अपचारान्तरेषु अपथ्यविशेषेषु ज्वरकृत्सु । JN.
3. अथ कोऽयं प्रभावः ? भवनं भावः, उत्पत्तिरात्मलाभो जन्म, प्रकृष्टो भावस्तेषां जन्मसामर्थ्यं शक्तिरसाधारणी । पूर्वज उत्पत्तिविशेष एव यद्भूतस्तथालक्षणः कार्यानुमेयः प्रभावशब्देनोच्यते । JJ.
4. प्रभावो यज्ज्वरस्य सन्तापः, अन्यथा यदि पित्तस्यायं केवलस्य धर्मः स्यात्, वातश्लेष्मारब्धयोर्न स्यात् । ··· ··· इन्द्रियमनसोर्नीरूपत्वात् कथमत्र सन्तापः, न, पीडाया अपि तापवाचित्वात् । ··· ··· आत्मलक्षणेऽपि प्रदर्शनात् । JJ.
5. ननु (न शीताङ्गसन्निपातादिषु नावलोक्यते देहसंतापः) भ्रमरकवारकसन्निकर्षाणामतापलक्षणत्वात्, न, अन्तः सन्तापादिति । ब्रूमः । यदि पीडाऽत्र सन्तापशब्देनाभीष्टा स्यात् सर्वव्याधीनामात्मलिंगं स्यात् । तस्मादष्टासु (ज्वरविधासु) । अनुगतो देहमनस्ताप एवात्र सन्तापशब्दवाच्य इति । JJ.
6. ननु प्रभावात्मलक्षणयोः को विशेषः, उभयत्र सन्तापस्याविशिष्टत्वात् ? उच्यते, विशिष्टलिंगसहचरितत्वादन्यत्वं तृष्णादिभिः । JJ,
7. प्रभवश्चानौपाधिकी शक्तिरुच्यते । Ck.

samprāpti leading to production of the result in the form of prodroma of fever.[1]

Ck interpreting 'eight causes' says that it may denote use of rough substances etc. which are vitiating factors for vāta etc. or doṣas (vāta etc.) themselves which have attained the stage of pathogenesis for fever. The former is distant and the latter immediate cause of the disease. Rough substances etc. produce fever indirectly through vitiating doṣas.[2]

JN says that, in the context of nidāna, vāta etc. mean only vitiated ones as only they are capable of producing disorders. This vitiation (of doṣas) takes place after the use of respective etiological factors. Thus the latter are also included in 'nidāna'.[3]

28–29. Though premonitory symptoms are described in the section on Nidāna, here some of them which are generally found are mentioned.[4]

GD says that these are repeated for clarification.[5]

30. Two locations of diseases are already mentioned. Its repetition here emphasises on the dual location of fever while others are located in one of them.[6]

The word 'kevala' means 'whole' which includes external senses as well. This shows that body and mind are inevitably afflicted by fever.[7]

'Bala-kāla' means 'time of aggravation or manifestation of fever'.[8]

---

1. ननु प्रकृतिकारणयोरन्यतमाभिधानं युक्तं, तयोरविशेषात् । प्रक्रियतेऽस्मात् (अस्याः ?) इति प्रकृतिः । ··· प्रकृतिश्च द्विधा व्याख्याता-औत्पत्तिको स्वाभाविकी च । तत्र तयोः संभवमात्रं व्याख्यायते । कारणं त्वनन्तरोत्पादकं संप्राप्त्यन्तं यतोऽनन्तरं कार्योत्पादो ज्वरपूर्वरूपस्य । JJ.
2. अष्टौ कारणानीति रूक्षादयस्त्रयो ज्वरारम्भकवातादिकर्तृत्वेनोक्ता······कण्ठरवेणोक्तम् । अन्ये तु वातादीनेव ज्वरारम्भकसंप्राप्तिप्राप्तान् ······ कारणानीतिपदेन ग्राहयन्ति । प्रकृतिशब्देन तु बीजभूता अव्यवहितसंबद्धाः दोषाः गृह्यन्ते, रूक्षादयस्तु दोषप्रकोपकारणभूता न ज्वरकारणानीति वदन्ति । ··· ··· रूक्षादीनां तु ज्वरे हेतुत्वं दोषप्रकोपावान्तरव्यापारत्वेन भवत्वेव, यथा यागस्य स्वर्गकर्तृत्वम् । द्विविधंच कारणं रोगाणां व्यवहितं रूक्षादि, प्रत्यासन्नं च दोषा इति शास्त्रसिद्धान्त एव । Ck.
3. इह वातादयः कुपिता एव बोद्धव्याः, तेषां कुपितानां रोगान् प्रति कारणत्वात् । स च प्रकोपो यथोक्तनिदानसेवनाद् भवति, एवं ज्वरनिदानस्यापि संग्रहः । JN.
4. यद्यपि निदानेऽपि पूर्वरूपाण्युक्तानि, तथापीह प्रकरणवशाद् यानि प्रायः प्रादुर्भवन्ति तानि पठ्यन्ते । Ck.
5. यद्यपि निदानस्थाने मुखवैरस्यमित्यादीनि पूर्वरूपाण्युक्तानि तथाप्यत्र शिष्यव्यवसायार्थं पद्येन पुनः पूर्वरूपाण्युक्तानीति न पुनरुक्तदोषः । GD.
6. अधिष्ठानद्वयं व्याधीनां प्रतिपादितम् । एवमिह पुनरुक्त्याऽस्य द्वयाश्रयत्वात्, अन्येषां पुनरेकाश्रयत्वम् । JJ.
7. केवलमिति कृत्स्नं, तेन बाह्येन्द्रियाणामप्यवरोधः । अनेन देहमनसी अप्यवश्यं ज्वरेण तप्येते इत्युक्तम् । Ck.
8. बलस्याभिवृद्धिलक्षणस्य ज्वराभ्यागमनलक्षणस्य वा कालो बलकालः । Ck.

GD interprets that the fever caused by vāta etc. are located in entire body while those casued by emotions (passion, anxiety etc.) are located in both body and mind.[1]

31. This verse describes the specific nature of jvara. Specific nature means invariable character.[2]

Here the word 'santāpa' denotes distress in generāl which is pyrexia in body and functional disturbance in mind and senses.[3]

In the context of prabhāva of jvara, 'santāpa' is mentioned as inexplicable effect while here it is said as invariable symptom. This is the difference. Others say that santāpa associated with anorexia etc. is prabhāva while that dissociated with them is self-character.[4]

'Kiñcit' in the latter half of the verse qualifies 'bhūta' which includes all the living creatures like animals, birds etc.[5] or it may denote body and mind which again confirms the psychosomatic nature of the disease.[6] In this way, the division of fever as physical and mental is only in view of the small period like quality-less state of dravya.[7]

Affiliation of body and mind is simultaneous and not alternating as in the latter case the consistency of the sign of the disorder would be affected.[5]

1. वातादिदोषज ··· ··· ज्वराणामधिष्ठानं केवलं शरीरम् , कामशोकभयादिजज्वराणामधिष्ठानं समनस्कं शरीरमुच्यते । GD.
2. ज्वरप्रत्यात्मिकं लिंगमित्यादिनाऽऽत्मलक्षणमाह । आत्मलिंगमित्यव्यभिचारिलक्षणम् । Ck.
3. इह सन्तापशब्देन सामान्येन पीडा वक्तव्या, सा च देहविशेषणाभिधानात्तापलक्षणैव भवति, मनसि तु तथा चेन्द्रियेषु देहगुणगृहीतेषु वैचित्यादिरूपा वैचित्यमित्यादिग्रन्थवक्तव्या ज्ञेया । Ck.
4. ज्वरप्रभावे सन्तापोऽचिन्त्यकार्यतयोक्तः, इह तु ज्वराव्यभिचारित्वेनेति विशेषः । अन्ये तु-अरुच्यादियुक्तः सन्तापः प्रभावो भवति, अरुच्यादिरहितस्त्वात्मलक्षणं भवति । Ck.
5. भूतशब्देन सर्वप्राणिन उच्यन्ते, ततश्च ज्वरेण भूतमाविशता न किंचित् मनुष्यादि न तप्यते किन्तु तप्यत एव, ततो ज्वराव्यभिचारितया ज्वरात्मलक्षणमेव तदुपपन्नमिति भावः । Ck.
6. किं वा ··· ··· ज्वरेण भूतमाविशता न हि किञ्चिच्छरीरं मनो वा न तप्यते, किन्तु तप्यत एव, अतो देहमनस्तापः सर्वज्वरेषूपपन्न इत्यर्थः । Ck.
7. अस्मिश्च पक्षे ··· ··· शरीरस्य यद् देहमात्राश्रयत्वं मानसस्य यन् मनोमात्राश्रयत्वं वक्तव्यं तत् सूक्ष्मकालाभिप्रायेण । तस्मिश्च सूक्ष्मकाले ज्वर उभयतापकोऽप्यनन्तरोत्पद्यमानोभयतापित्वधर्मापेक्षया भवत्येवं देहमनस्तापी यथा प्रथमक्षणोत्पन्नं द्रव्यं निर्गुणं, अनन्तरोत्पद्यमानं सगुणं द्रव्यमुक्तं द्रव्यलक्षणे । Ck.
8. अत्र देहमनःसन्तापौ मिलितौ वा पर्यायेण वा ज्वरात्मलिंग भवेताम् ? न तावत् पर्यायेण, तथा हि सति क्वचिज्ज्वरे देहसन्ताप एव क्वचिज्ज्वरे मनःसन्ताप एव भवतीति वाच्यं, ततश्चानयोर्व्यभिचारान्नाव्यभिचारिलिंगत्वं, तस्मान्मिलितावेव देहमनःसन्तापावात्मलक्षणं ज्वरस्येति वाच्यम् । Ck.

GD reads 'prātyātmika' in place of 'Pratyātmika' having the same meaning.[1]

JN says—Indriyas are included in 'deha'. Thus santāpa being inevitable symptom is the invariable character of jvara.[2]

32–35. JJ interprets **'दोषकालबलाबलात्'** as 'strength and weakness of doṣa and kāla'. He also quotes others who emphasise on 'strength and weakness of the time of doṣa'.[3]

Here 'kāla' includes 'prakṛti' and 'dūṣya' as well.[4]

Joining together of 'tṛtīyaka' and 'caturthaka' signifies their peculier nature as viṣamajvara.[5]

Ck further elucidates—the classification of fever into five types does not cover all the fevers because of the clear statement that 'these types are usually caused by sannipāta' and thus fevers caused by single doṣas can't be included in it. Moreover, santata etc. have also specific periodicity and as such those having no such periodicity are different from them. Thus the fevers originated from strength and weakness of time of doṣa are of five types only.[6]

Accordingly, he interprets **'दोषकालबलाबल'** as 'strength and weakness of time (period) caused by doṣa' or 'doṣakāla' may mean time of (exacerbation of) fever and 'balakāla' its severity or otherwise. Others (Jejjaṭa etc.), however, interpret it as 'strength and weakness of doṣa and time'. For instance,s antata jvara originates

---

1. आत्मा आत्मा इति प्रत्यात्मं, तस्येदं प्रात्यात्मिकं, प्रतिज्वरं यल्लिङ्गं सर्वत्र देहमानसः सन्तापः ज्वरस्यात्मलक्षणमित्यर्थः । GD.

2. इह इन्द्रियाणां देहे अवरोधः । ··· ··· इत्थं च सति ज्वरे सर्वत्र सन्तापस्यावश्यंभावात् सन्तापो ज्वरस्याव्यभिचारि लक्षणम् । JN.

3. दोषश्च कालश्च दोषकालौ, तयोर्बलाबलं, तस्माद् दोषकालबलाबलात्र पुनर्व्युत्क्रान्ताभिहितम् । ··· ··· अन्ये त्वाचक्षते–दोषभेदात् समसंप्राप्त्या निदाने द्विषष्टिभेदभिन्नो ज्वरः किल लेशतो व्याख्यातोऽपि ··· ··· एष कालबलाबलत्वेन सन्ततादिभेदात् पञ्चविधो भवति, न वातादिजातिं जहाति । JJ.

4. ननु प्रकृतिदूष्ययोरपि कार्यः परिग्रहः दोषकालवत् ··· ··· कालग्रहणादवरोधं वर्णयन्ति । JJ.

5. तृतीयकचतुर्थकयोः समासकरणं विषमज्वरख्यापनार्थम् । JJ.

6. पुनः पञ्चविधो दृष्टः इत्यत्र न पञ्चविधेन भेदेन सर्वज्वरव्याप्तिः, यतः 'प्रायशः सन्निपातेन दृष्टः पञ्चविधो ज्वरः' इति वक्ष्यति । ततश्च केवलवातादिज्वराणां न सन्ततादिभेदेन ग्रहणम् । तथा सन्ततादीनां कालनियमो वक्तव्यः, ततश्च ये कालानियतास्ते सन्ततादिभिन्ना एव । तस्माद् दोषकालबलाबलाद् ये ज्वराः भवन्ति ते पञ्चविधा एवेति वाक्यार्थः । Ck.

due to strength of both doṣa and time which is not so in case of satatajvara.[1] But with this interpretation, all the fevers would be included and to restrict it in five types (santata etc.) would be difficult.[2] Others, nevertheless, interpret by putting 'kāla' after 'balābala' but it is stretching too much.[3]

About tṛtīyaka and caturthaka, he says that the dual compound indicates association of exogenous factor etc.[4]

GD says that the word 'mānasa' denotes psychosomatic as caused by anxiety etc. and not only psychic as emotions of passion, anger etc.[5] Moreover, he relates the further classification to innate and exogenous types of each of psychic and somatic fever. For instance, as exogenous 'sārira' fever originates from injury with stick etc. so mānasa-śārīra' (mānasa) are originated from anxiety etc. Amoug the latter, that caused by passion, grief etc. is saumya while that caused by anger etc. is āgneya.[6]

He interprets **'दोषकालबलाबल'** on the lines of Ck but more clearly.[7]

Explaining the words 'Prākṛta' and 'Vaikṛta', JN says–Prakṛti here means nature of time and not nature of doṣa. That caused by nature of time is prākṛta otherwise vaikṛta.[8]

He interprets **'दोषकालबलाबल'** according to JJ and includes prakṛti and dūṣya also in further explaining 'balābala'.[9]

36–37a. The word 'Pūrvaṃ' indicates that later on the somatic fever afflicts mind also and vice versa. Thus though all the fevers are psycho-somatic, the above

1. दोषकालबलाबलात् इति दोषकृतात् कालबलाबलात्, कालबलाबले ज्वरकालप्रकर्षाप्रकर्षौ। ··· ··· किंवा, दोषकालो दुष्टिकालो ज्वरकाल इत्यर्थः, तस्य बलाबलात् प्रकर्षाप्रकर्षादित्यर्थ। ··· ··· अन्ये तु-दोषश्च कालश्च दोषकालौ, तयोर्बलाबलादिति वदन्ति। ··· ··· सततकादौ कालस्याबलत्वं भवति। Ck.
2. अत्र पक्षे दोषकालबलाबलाभ्यां सर्वज्वरा व्याप्यन्ते, ततश्च सन्ततादिपञ्चज्वरनियमो दुर्घटः स्यात्। Ck.
3. अन्ये तु व्युत्क्रमाभिधानेन 'दोषबलाबलकालात्' इति कृत्वा व्याख्यानयन्ति। एतच्चाशब्दं व्याख्यानम्। Ck.
4. तृतीयकचतुर्थकाविति समासनिर्देशेन तृतीयकचतुर्थकयोरागन्त्वनुबन्धत्वादिसाधारणधर्मयोगितां दर्शयति। Ck.
5. अत्र मानसः समनस्कशारीरो न तु मानसदोषमात्रजाः कामक्रोधादयः परन्तु शोकादिज इति। GD.
6. तस्येदं विवरणम्-साध्यश्चासाध्यश्चेति। GD.
7. दोषबलेन कालबलात् दोषाबलेन कालाबलात्। GD.
8. प्रकृतिरिह कालप्रकृतिः कालस्वभावः, ··· ··· न तु दोषप्रकृतिः, कालप्रकृतिकृतः प्राकृतः ··· ··· अन्यकालकृतो वैकृतः। JN.
9. दोषः कालश्च तौ, तयोर्बलमबलञ्च तद् दोषकालबलाबलम्। तस्माद् दोषकालबलाबलात् दोषाणां तुल्यदूष्यप्रकृतिबलाबलाभ्यां ज्वरः पुनः पञ्चविधो भवति। JN.

sequence signifies application of respective treatment at proper time according to predominance of psychic or somatic factor.[1]

Disturbance in mental functions etc. are mentioned here as 'mānasa santāpa' because the word 'tāpa' means 'affliction' in general.[2]

Disorders in senses means change in their nature which amounts to non-reception of objects etc.[3]

37b–38a. The classification of saumya and āgneya may be applied to all the fevers as far as possible because there is no group beyond these two.[4]

Vāta, because of asociation with pitta, shows reverse character e. g. desire for cold. Similarly, the same with kapha has more pronounced desire for cold.[5] The fevers having mixed character such as kaphapaittika and sānnipātika are different from the above two and would come into the category other than these.[6]

GD contradicts the views of Ck and says that there can't be any third category in addition to the two – saumya and āgneya rather such cases may be called as 'saumyāgneya' just as eunuch is called 'dviretāh' (hormophrodite) and not one having a third retas other than sperm and ovum.[7]

JN supports GD.[8] He explains desire for cold in vātapaittika jvara on the

---

1. पूर्वमिति वचनादुत्तरकालं शारीरो ज्वरो मनस्यपि भवति, एवं मानसो मनस्युत्पादानन्तरं देहेऽपि भवतीति ज्ञेयम् । एवं च यद्यपि सर्वज्वराणां देहमनोधिष्ठानत्वं, तथापि यो देहाश्रयी प्रथमं शारीरदोषेण बलवता प्रारब्धः स्यात् स तद्दोषचिकित्सयैव चिकित्स्यः, एवं मानसोऽपि मानसदोषचिकित्सयैव चिकित्स्य इति दर्शयितुं शारीरमानसभेदोपदर्शनं साधु । Ck.
2. वैचित्त्यादयो मानससन्तापशब्देनोच्यन्ते, तापशब्दस्य पीडावचनत्वादित्यर्थः । Ck.
3. वैकृत्यमिति स्वभावान्यथात्वं, तच्चार्थाग्रहणाद्यनुमेयम् । Ck.
4. सौम्याग्नेयत्वं च सर्वज्वरेषु यथासंभवं योज्यम्, ··· ··· जातिद्वयानतिक्रमात् । JJ.
5. एवं व्यवस्थिते वातपित्तज्वरे चेद् वायुः संयोगमहिम्ना विपरीतानुकारी दृष्टः ··· ··· वातकफात्मको विशेषेणोष्णमिच्छतीत्यर्थः । Ck.
6. व्याभिश्रलक्षणः इति उक्तव्याभिश्रदोषलक्षणज्वरव्यतिरिक्तः कफपैत्तिकः सान्निपातिकश्च, स चोष्णशीताभिप्रायतया सौम्याग्नेयराशिद्वयातिरिक्त एव ज्वरः । Ck.
7. व्यामिश्रलक्षणः पित्तकफात्मकः सन्निपातात्मकश्च एतदुभयं शीतोष्णं द्वयमेवेच्छतीति सौम्याग्नेय उच्यते न त्वधिकः, प्रत्येकतो हि भेदो न समुदायस्य यथा नपुंसकस्य द्विरेतस्त्वं न तु शुक्रशोणिताभ्यामधिकमस्य किंचिद् रेतोऽस्तीति । GD.
8. व्याभिश्रलक्षण उभयात्मकः वातयुक्तपित्तश्लेष्मकृतः ज्वरः, एतदुभयं शीतमुष्णञ्च इच्छति । JN.

basis of the yogavāha character of vāyu by which it produces heat in combination with pitta.[1]

38b–39a. JJ says—yogavāha character of vāyu can't be accepted because it is cold but it can be done so on the basis of other views according to which it is neither hot nor cold.[2]

Ck defines 'yogavāha' as 'that which on contact with other acquires the properties of the latter'.[3] The use of word 'tejas' and 'soma' are significant as they also denote external environment and the role of vāyu therein.[4]

GD also explains in the same way.[5]

Vaiśeṣikas take vāyu as neither hot nor cold (anuṣṇāśīta). JN contradicts it and supports its cold character but only due to being yogavāha it produces heat in combination with pitta.[6]

39b–41. JJ does not read the verses describing 'antarvega' and 'bahirvega' jvaras.[7]

GD comments that explicit mention of easy curability of bahirvega indicates the difficult curability of antarvega jvara.[8]

JN informs that antarvega is called as 'gambhīra' by Suśruta.[9]

---

1. ननु वातपित्तात्मकः कथमुष्णारब्धः स्यात् ? सत्यपि पित्तस्यौष्ण्ये वायोः शैत्यात् । ··· ··· इति चेत्, न, वायोर्योगवाहितया पित्तसंयोगे तस्यापि दाहकारित्वात् । JN.
2. ननु वायोर्योगवाहत्वमयुक्तं, शीतत्वात्, न, अन्यसिद्धान्तवत् अनुष्णाशीतत्वमुच्यते । JJ.
3. योगाद् योगिनो गुणं वहतीति योगवाहः । Ck.
4. "पित्तेन" इति वक्तव्ये यत् "तेजसा" इति करोति, तेन बाह्येनाप्यातपादिना युक्तो वायुर्दाहं करोतीति लोकप्रसिद्धमर्थं दृष्टान्तार्थं सूचयति । शीतकारित्वं तु वायोः शीतत्वेनैव यत् सिद्धं तत सोमरूपकफपानीयादि-योगाद् विशेषेण भवतीति ज्ञेयम् । Ck.
5. योगं येन सह वायोः संयोगस्तस्य गुणानुरूपेण गुणं वहतीति योगवाहः । ··· ··· वहिश्चरोऽपि वायुरनुभूयते तेजसा यदा युक्तो वाति तदा उष्णकृत्, सोमसंश्रयात् जलादिसौम्यभावेन यदा युक्तो वाति तदा शीतकृदिति । तथाऽन्तश्चरोऽपीति भावः । GD.
6. एवं योगवाहत्वदर्शनात् वैशेषिका वायुमनुष्णाशीतमाहुः । ··· ··· एकस्य दाहशीतोभयकारित्वं तस्यानुष्णा-शीतत्वे हि उष्णशीताभ्यां सह योगात् संभवति, तन्न, वातः प्रकृत्या शीतः ··· ··· पित्तसंयोगे वायुनापि दाहः ··· ··· इति तद्योगवाहत्वात् । JN.
7. अन्तर्वेगबहिर्वेगव्याकरणमन्तदार्हादिश्लोकद्वयेन केचित् पठन्ति । JJ.
8. सुखसाध्यत्वमेव चेत्यनेनान्तर्वेगस्य दुःखसाध्यत्वमिति ज्ञापितम् । GD.
9. सुश्रुते चायं गम्भीरसंज्ञः । JN.

42–47a. The statement that the prākṛta jvara occurring in spring and autumn is easily curable indicates the difficult curability of vātaja jvara (occurring in rainy season). 'prākṛta' means occurring in its natural time.[1]

This is a general observation but if the disease is severe and caused by potent and numerous factors it is not curable (even if it is prākṛta and occurring in spring and autumn) whereas the vaikṛta jvara (not occurring according to seasons) becomes difficult or incurable even if caused by a few etiological factors.[2]

'उष्णमुष्णेन संवृद्धं' indicates that perversion in behaviour (and diet) is responsible for occurrence of fever in these seasons.[3] The first description of the fever occurring in autumn shows the paittika nature of the disease.[4]

'Kopa' means 'liquefication'. Some take it as 'moving to initiation of action' but it is not correct because action for pathogenesis begins earlier in the stage of accumulation.[5]

The prefix 'saṃ' denotes its emergent nature.[6]

How sun-rays which are dissimilar to kapha cause its aggravation ? The reply is that not only similar but also dissimilar entities aggravate kapha because aggravation is not increase in quantity but liquefication which enables the doṣa for moving in further stages. In case of vāyu which is formless kopa is agitation in its components.[7]

Ck says—here doṣa vitiated by nature of time is 'Prakṛti' and fever produced by such doṣa is known as 'Prākṛta'.[8]

---

1. बहिर्वेगस्य साध्यत्वाभिधानेनान्तर्वेगस्य कृच्छ्रसाध्यतापादनात् तदनुषंगात् प्राकृतस्यापि वातजस्य कृच्छ्रसाध्यत्वं ख्यापितम् । ··· ··· कस्माच्चायं प्राकृत:, यत: आह-कालप्रकृतिमुद्दिश्य निर्दिष्ट: प्राकृतो ज्वर: इति । JJ.
2. उत्सर्गश्चायम् । तत्रापि यदि हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणो भवति, नासौ साध्य: इति । ··· ··· वैकृत: पुनरल्पहेत्वादिजोऽपि कृच्छ्रसाध्यो वेति ख्यापितं भवति । JJ.
3. विहितव्यत्ययाचारतामेव ख्यापयन्नाह-'उष्णमुष्णेन संवृद्धं इति । JJ.
4. ननु च प्राग् वसन्तस्य सूत्रितत्वात् कस्मात् प्रागभिधानं शरद: ? उच्यते, व्याधेरस्य पित्तात्मकत्वेनाम्नात् । JJ.
5. कोपश्च विलयनं, कार्यारम्भाभिमुख्यं वेति केचित्, तन्न, दोषसंचयादेव व्याध्यारम्भादिकार्यदर्शनात् । JJ.
6. संशब्दासज्जनादाचितं द्रागिति नान्यत्रापि कालं प्रतीक्षते । JJ.
7. गभस्तयो भास्करस्य श्लेष्मणस्त्वसमाना: कोपहेतव: कथम् ? अथासमाना अपीष्यन्ते कोपका: । ··· न वयं ब्रूम: (अ) समानैर्वृद्धिराधीयते, अपि तु विलयनमात्रं क्रियते । ···तस्माद् विलयनमात्रमेव कोप: । नापि विलीनं प्रसराद्यवस्थामास्कन्दति । ननु च वायोरपि कोप उक्तस्तस्य कथं विलयनम् ? अवयवक्षोभलक्षणं ब्रूम इत्यनवद्यम् । JJ.
8. तत्रेह कालस्वभावप्रकुपितो दोष: प्रकृतिरुच्यते, तज्जातीयाच्च दोषाद्भूतो ज्वर: प्राकृत उच्यते । Ck.

He says that the fever occurred in spring and autumn which is easily curable is taken here as 'prākṛta'. That occurred in rainy season is not such and so it is not called as 'prākṛta'. In this context, the use of the words 'prākṛta' and 'vaikṛta' is based on the idea of easy and difficult curability respectively.[1] To support this, he quotes Jātukarṇa.

A question arises—when there is amlavipāka of all the plants in rainy season what would be the fate of the vipākas determined for individual drugs ? The reply is that it would be adjusted like āvasthika (conditional) pāka in no way affecting the niṣṭhāpāka. Others, however, say that in rainy season, plants become amlavipāka and produce acidity and burning due to decreased digestive power. The former view is acceptable.[2]

He suggests **'विसर्गाच्च'** as alternative reading for **विसर्गस्य'.** Concluding he says that vāta and pitta are weak in the beginning but gradually their strength increases. The same is with kapha in autumn.[3]

GD reads **'उद्रिक्त'** in place of **'उक्लिष्टं'** and **'विसर्गाच्च'** instead of **'विसर्गस्य'.** He further says—by nature of time vāyu stays pacified and as such it does not associate with pitta together with kapha.[4]

JN follows GD.

47b–48a. JJ says—vitiation of doṣas is of two types (1) preceded by accumulation or (2) not preceded by the same. Treatment is also prescribed of two types accordingly–saṃśodhana in the former and saṃśamana in the latter.[5]

---

1. य एव सुखसाध्यो वसन्तशरदुदभवः प्राकृतः स एवेह प्राकृतशब्देनोच्यते इत्यर्थः, वर्षाकालभववातिकस्तु न सुखसाध्य इति, तेन नासौ प्राकृत उच्यते । प्राकृतवैकृतसंज्ञाव्यवहारो हि यथाक्रमं सुखसाध्य–कृच्छ्रसाध्यबोधप्रयोजनकः । Ck.
2. ननु यदि वर्षास्वम्लविपाकित्वं सर्वासामोषधीनां, तदा प्रतिद्रव्याभिहितविपाकस्याव्यवस्था स्यात् । तस्य कालवशेनाम्लत्वदर्शनात्, मैवम्, यथा निष्ठापाकेन यन्मधुरं द्रव्यं तद् यथावस्थिकेन पाकेनाम्लं भवति ··· — तथेहापि कालमहिम्नाऽम्लविपाकित्वमपि भविष्यति । ··· ··· अन्ये तु, वर्षासु वह्निमान्द्याद् विदाहनिमित्तमोषधीनामम्लविपाकित्वमिति ब्रुवते ··· ··· तस्मात् कालमहिम्नैव पाकान्तरमोषधीनां साधु । Ck.
3. तत्र वसन्तादौ दुर्बलं वातपित्तं, मध्ये तु मध्यं, अन्ते तु प्रबलं भवति, एवं शरद्यपि कफो भवति । Ck.
4. कालस्वभावात् वायोः प्रशान्तस्य कफस्य च चयारम्भात् कफ एवानुबध्यते, न तु वायुरित्यर्थः । GD.
5. दोषाणां प्रकोपश्चयपूर्वकोऽचयपूर्वकश्च । ··· ··· शरद्विधित्वे द्वैविध्यं प्रणयन्ति शास्त्रकाराः-संशोधनं संशमनञ्च । संशोधनं चयपूर्वकं प्रकुपितस्य, ··· ··· कालस्वभावादम्लविपाकाद् यदि पित्तस्य ··· ··· कोपस्तदवजयनार्थं संशमनं क्षिप्रमुपदिष्टवान् । JJ.

Concluding he says that this rule should be applied in other diseases as well.[1]

GD adds that by the occurrence of disease in beginning, end or middle of autumn and spring some indication is found about strength or otherwise of person as well as doṣa.[2]

Moreover, in rainy season there is decrease in digestive power which leads to vitiation of all the doṣas.[3]

Ck explains–'Kālaprakṛti' means 'doṣa associated with naturs of time'.[4] He repeats that vātika jvara though occurred in its time (rainy season) is not prākṛta because it is difficult to treat. That only which having occurred in its time is easily curable be called as prākṛta. Others, however, say that vātika jvara arisen in rainy season is prākṛta though difficult to treat.[5]

GD says—jvara is called prākṛta in view of the nature of season not of the dosic constitution of the person nor of the easy curability. Moreover, the word 'prāya' shows that prākṛta jvara caused by vāta is easily curable otherwise difficult.[6]

JN says that vātika jvara in rainy season is prākṛta but mostly difficult. The word 'prāyeṇa' indicates that sometimes it is cured easily.[7]

50a. Complications have not been enumerated here, they may be known from other texts. Hiccough, dyspnoea, cough, vomiting, diarrhoea, unconsciousness, body-ache, thirst, anorexia and constipation-these are said as ten complications of fever.[8]

---

1. एषा च परिभाषाऽन्येष्वप्यातङ्कान्तरेषु द्रष्टव्या । JJ.
2. शरद्वसन्तयोराद्यन्तमध्यजातत्वेन ज्ञानाद्धि पुरुषस्य दोषस्य च बलाबलज्ञानं भवति । GD.
3. प्रायेणानिलजो दुःख कृच्छ्रसाध्य इत्यर्थः । कस्मादनेकमुखत्वाच्चिकित्सायाः, ज्वरस्तु प्रायशो ह्यामाशय-समुत्थस्तत्समुत्थानां व्याधीनां (लंघनादीन्यौषधानि) प्रायशस्तानि च वायौ नेष्यन्ते । वर्षासु चादानदुर्बल-देहानामग्निमान्द्यं भूयो दोषैः क्रियते, तन्निमित्तजः सर्वदोषप्रकोपः । JJ.
4. कालप्रकृतिमिति कालस्वभावसंबद्धं दोषम् । Ck.
5. विरुद्धोपक्रमत्वाद् दुःखत्वेन न प्राकृत्वं वातिकस्य, यतः प्राकृतत्वेऽपि यः सुखसाध्यः स एव प्राकृत उच्यते इति भावः । एवं तावत् सर्वो वातजो वैकृतः । ··· ··· अन्ये तु ब्रुवते-वर्षाकाले वातजोऽपि प्राकृतः किन्त्वय कृच्छ्रः । Ck.
6. कालस्यर्तुरुपस्य प्रकृतिं स्वभावमुद्दिश्य प्राकृतो ज्वरो निर्दिष्टः, न तु पुरुषाणां दोषप्रकृतिमुद्दिश्य न वा सुखसाध्यपरत्वेन । ··· ··· प्रायशब्देनानिलजः प्राकृतो ज्वरः सुखः । कालेष्वन्येषु ··· ··· वैकृतः सोऽपि दुःखः । GD.
7. अनिलजः वातजः प्राकृतः, तस्य प्रकृतत्वात् । प्रायेण बाहुल्येन दुःख कृच्छ्रसाध्यः, भिन्नोपक्रमत्वात् । ··· ··· प्रायेणेत्यनेन कदाचिद् दैवानुकूलत्वात् सुखसाध्योऽपि भवतीति द्योत्यते । JN.
8. उपद्रवास्तन्त्रे न ज्ञापितास्ते तन्त्रान्तराज्ज्ञातव्याः । (हिक्का-श्वास-कासच्छर्द्यतीसार)मूर्च्छाङ्गभेदपिपासा-रोचकाः कृच्छ्विट्कता चेति दशोपद्रवाः ज्वरमुपद्रवन्तीत्याख्यायन्ते । JJ.

Ck says-though complications are not mentioned explicitly, the diseases having general character of complications are understood here.[1]

GD comments-if disorder is mild and patient is strong, fever is easily curable. In such conditions almost all the diseases are easily curable.[2]

Discussing further he says-regarding diseases occuring in autumn and spring, only those caused by doṣa (pitta or kapha) accumulated due to time factor and aggravated due to heat of the sun are easily curable and not others caused by respective aetiological factors.[3] The difficult character of vātika jvara is due to many exciting factors and association of other two doṣas. The word 'prāya' indicates that if such factors are a few, it would be easily curable.[4]

136-139. By 'triphalātvacaḥ' each of the three drugs should be taken in quantity of half pala.[6] By 'masūravidalānām' dehusked lentils should be taken and not śyāmā (trivṛt) as Jatūkarṇa has said.[7]

140-143. Though old ghee is preferable, fresh ghee is used here as exception because of peculiarity of the formulation.[8]

152-156. Some take this formulation as unauthoritative.[9]

In v. 155, the reading accepted by Ck seems to be different as appears from his comm. In the present reading 'sarpiṣaścādhakam' quantity of ghee is given whereas he says that as the quantity of ghee is not mentioned, it should be one āḍhaka and one prastha.[10]

157-161. Khadira is the most effective of all the drugs is kuṣṭha.[11] GD interprets it otherwise. He says that viḍaṅga and khadira combined are effective.[12]

---

1. कुष्ठार्केत्यादौ....प्राधान्यात्तिलतैलं ज्ञेयं, यत्र तु विशेषस्तत्र......"सार्षपमथवा तैलम्" इत्युक्तम्। अन्ये तु कुष्ठेष्वालेपे सार्षपं ग्राहयन्ति, पाने तु विशेषानुक्तौ तिलतैलमेव भवति। CK.
2. सर्षपकरञ्जेत्यादिना कुष्ठेष्वन्नपानसाधने सार्षपतैलादीनि देयानीति दर्शयति। अन्ये तु-कुष्ठेषु सामान्येन तैलश्रुतौ सार्षपादीन्येव देयानि न तिलतैलमित्यनेन दर्शितमिति वर्णयन्ति। CK.
3. अत्र...सर्जरसमधूच्छिष्टयोरपि कल्कार्थोपात्तजीवन्तीमञ्जिष्ठादिद्रव्यैः समानत्वं साहचर्याज्ज्ञेयं, किंवा, स्नेहादष्टमो भागः सर्जरसमधूच्छिष्टयोः। CK.
4. तत्र च खदिरस्य सारः, निम्बस्य त्वक्, पटोलस्य च पत्रं ग्राहयं, वृद्धव्यवहारात्। CK.
5. इह खदिरदार्व्योः सारः। JN.
6. त्रिफलात्वच इत्यादौ प्रत्येकं हरीतक्यादीनामर्धपलम्। CK.
7. मसूरविदलानामिति निस्तुषमसूराणां, न तु मसूरविदलाऽत्र श्यामा। उक्तं हि जतूकर्णे पुंलिंगेन-"मसूरविदलात् पलम्" इति। CK.
8. "सर्पिश्चाप्यनवं हितम्" इति वचनस्य बाधकमिह योगमहिम्ना सर्पिषो नवत्वं ज्ञेयम्। CK.
9. खदिरस्य तुला इत्यादिकं केचिदनार्षं वदन्ति। CK.
10. तत्र घृतमानानुक्तौ...प्रस्थाधिकाढकमानं घृतं साध्यम्। CK.
11. कुष्ठहन्तृत्वेन खदिरो द्रव्यान्तरेषु विशिष्यते प्रकर्षवान् भवति। CK.
12. क्रिमिकुष्ठिनां विशिष्यते द्वयं मिलितमिति। GD.

JN makes it more clear. He says that vidaṅga is the best anthelmintic and khadira is the most effective in kuṣṭha.[1]

173-176. Suśruta has mentioned kilāsa as located in tvak as it does not produce symptoms like kuṣṭha located in rakta etc. Here śvitra has been said as located in rakta etc. only with the idea that in śvitra rakta etc. are affected but do not exhibit all the symptoms of kuṣṭha located in them. Thus here also disorder located in tvak only is accepted and as such there is no any conflict.[2]

---

1. क्रिमिनाशनत्वेन विडंगं,....कुष्ठहन्तृत्वेन च खदिरः विशिष्यते सर्वेभ्यः अतिरिच्यते। JN.
2. सुश्रुते तु "त्वग्गतमेव किलासम्" इत्युक्तं, तच्च न कुष्ठवद् रक्तादिगतकुष्ठलक्षणकारकं श्वित्रमित्यभिप्रायेणोक्तं, इह तु यद् रक्ताद्याश्रयित्वं श्वित्रस्योच्यते, तद्रक्तादिदोषमात्राभिप्रायेण, न रक्तादिगतसमस्तकुष्ठलक्षणकारितया, तेनात्रापि त्वङ्मात्रविकृतिकारकत्वं श्वित्रस्य संमतमेवेति न विरोधः। CK.

CHAPTER VIII

3-12. The mythological account about the origin of rājayakṣmā shows that diminution of dhātus is the chief cause and unrighteousness (due to attachment to a particular woman) is also its cause.[1]

Here the word 'sneha' denotes the essence e.g. semen and ojas.[2]

GD has interpreted 'sneha' only as 'šārīra sneha'[3] (unctuousness in the body) while JN has elaborated it as 'in the form of šukra and ojas'.[4]

JN also raises the question-in nidānasthāna the disease is named as 'šoṣa' then why here it is said as 'rājayakṣmā'? He answers it by saying that šoṣa and rājayakṣmā are synonymous.[5]

13. 'Ayathābala ārambha' means 'bodily activities beyond strength'. 'Vegasandhāraṇa' is 'supression of unsuppressable urges'. 'Kṣaya' is loss of blood etc.[6]

JN interprets 'ayathābala ārambha' as 'sāhasa' and puts its derivative meaning as 'the action done without consideration of power'. By 'kṣaya' he takes 'loss of ojas and semen.[7]

14-19. The entire verse 18 denotes one symptom and thus the total number comes to eleven.[8]

JN enumerates all these eleven symptoms as complications.[9]

24-27. Ck interprets 'ojas' here as 'rasa' or it may be 'the essence of body'. 'Snehakṣaya' means 'loss of semen and ojas which are essence of body'.[10]

---

1. एतया च प्रागुत्पत्त्या धातुक्षयो राजयक्ष्मणः प्रधानं कारणं, तथा भार्यास्वसमवर्तितयाऽधर्मश्च कारणं भवतीति दर्श्यते। CK.
2. स्नेहशब्देन हि सारवाचिना शुक्रौजसी ग्राह्ये CK.
3. स्नेहस्य शारीरस्य। GD.
4. स्नेहस्य शारीरस्य शुक्रौजोरूपस्य। JN.
5. ननु निदानस्थाने शोषस्य निदानमुक्तम् , इह पुनः राजयक्ष्मणश्चिकित्सितमुच्यते, कथमेतत् समञ्जसं स्यादिति चेन्न, शोषराजयक्ष्मणोरनर्थान्तरत्वात्। JN.
6. अयथाबलं बलातिक्रमेण आरम्भः शरीरप्रवृत्तिः, वेगसन्धारणमधार्यवेगधारणम् , क्षयं धातूनां रक्तादीनाम्। GD.
7. अयथाबलमारम्भः साहसम् , सहसा शक्तिमनालोच्य यत् कर्म क्रियते तत् साहसम्।....क्षयं ओजसः शुक्रस्य च क्षयम्। JN. also CK on V.14 "सहसा शक्तिमनालोच्य यानि क्रियन्ते तानि साहसानि।"
8. क्षणनादित्यादिना रक्तकफनिष्ठीवनमेकमेव लक्षणम् "उरःशूलातिपीडितः" इत्यन्तेनोच्यते...तेनैकादशरूपत्वं पूर्यते एव। CK.
9. शिरःशूलं कण्ठोद्ध्वंसः कासः स्वरभेदः अरोचकः पार्श्वशूलं वर्चोभेदः जृम्भा ज्वरः उरोरुक् सशोणितकफनिष्ठीवनञ्च इत्येकादशरूपाणीह उपद्रवरूपाणि । JN.
10. ओज इति रसः, रसेऽप्योजःशब्दो वर्त्तते,.....किंवा, ओजो देहस्य सारम्। स्नेहक्षयादिति देहसारशुक्रौजःक्षयात्। CK.

GD sayes--semen decreases by sexual indulgence while by fasting and envy etc. ojas decreases.[1]

Here ojas is rasa situated in heart and not one produced from food. The statement that ojas which is in heart in the quantity of half añjali diminishes and not that which is in the form of eight drops is not correct because ojas is only of one type-in the quantity of half añjali and not more. The measure of 'aṣṭa bindu' also comes to the same as 'bindu' is only a synonym of karṣa, thus eight karṣas being half añjali. Moreover, it also goes in conflict with other texts.[2]

28-32. Inptepreting the word 'yathākramam' Ck says that in verses 30 and 31 symptoms caused by kapha, pitta and vāta are mentioned in half-verse respectively.[3]

In every etiological type, mention of eleven symptoms shows that rājayakṣmā is complete by appearance of these symptoms otherwise by six (ṣaḍrūpa) or three (trirūpa) symptoms it should be taken as incomplete.[4]

A question arises-when in all these types the number of symptoms is the same (eleven) and all are caused by tridoṣa what is the significance of this fourfold division ? The answer is that there is difference in terms of etiology, symptoms and treatment and as such this division is justified. In other texts, generally it is taken as one but on analysing, further the difference is evident.[5]

The word 'viṣamaṃ gatāḥ' is interpreted by Ck as 'moving beyond in passage'[6] while JN interprets it as 'disturbed in equilibrium'.[7]

33-38a. 'Pratiśyāya' is read in rūpa as well as pūrvarūpa. It is taken as pūrvarūpa when associated with other premonitory symptoms and is rūpa when present with other symptoms. Every pūrvarūpa continuing in the stage of rūpa does not become a fatūa sign it is only when all the premonitory symptoms continue as rūpa.[8]

---

1 अतिव्यवायात् शुक्रं क्षीयते, अनशनादोजः क्षीयते, तथेर्ष्यादिभिरतिकर्षणादप्योजः क्षीयते। GD.

2 ओज इति हृदयस्थायी रसः.....नत्वाहारजरसः। ओजस्त्वर्धाञ्जलिपरिमितं यत् तत् खलु....क्षीयते नत्वष्टबिन्दुमात्रं तस्य क्षये मरणादिति कस्यचिद् व्याख्यानमयुक्तम्। ओजस्त्वर्धाञ्जलिमानमेवैकविधं न त्वधिकम्। अष्टबिन्दुमानमेव अर्धाञ्जलिः, कर्षमानं बिन्दुस्तत्पर्यायशब्दात्। तन्त्रान्तरविरोधश्च। GD.

3. यथाक्रममिति प्रतिश्यायमित्यादिप्रथमश्लोकार्धविहितं कफकृतं, द्वितीयश्लोकार्धविहितं पित्तकृतं, शेषं तु वातकृतम्। CK.

4. अत्र प्रत्येकमेकादशलक्षणपाठेन एकादशलक्षणयोगेनैव राजयक्ष्मणः संपूर्णत्वं प्रायो भवतीति दर्शयति। यत्तु षड्लक्षणत्वं त्रिलक्षणत्वं वा यक्ष्मणो वक्ष्यति, तदसंपूर्णलक्षणस्यैव ज्ञेयम्। CK.

5. ननु शोषाणामयथाबलमारम्भादिजत्वभेदेन चातुर्विध्यकथनेन किम् ? यतस्तानि तान्येव लक्षणानि सर्वत्र भवन्ति, तथा च सर्वेऽपि त्रिदोषजाः, तेनैकरूपत्वाभिधानमेव युक्तम् ,.....मैवं, हेतुलक्षणचिकित्सितेन चतुर्णामपि भेदाद् भिन्न एवेति युक्तम्। ......तन्त्रान्तरे तु स्थूलदृष्ट्या अभेद उक्तः....सूक्ष्मचिन्तायां त्वयमेव भेद उक्तो ज्ञेयः। CK.

6. विषममुन्मार्गेण गताः। GK.

7. विषमं भावं गताः वैषम्यं प्राप्ताः। JN.

8. प्रतिश्यायश्च रूपे पठितः, तेन प्रतिश्यायः पूर्वरूपान्तरसहितः पूर्वरूपं भवति, रूपान्तरसहितस्तु रूपमिति विशेषः। न चैक एव प्रतिश्यायः पूर्वरूपार्थोऽपि व्याध्यवस्थायां वर्तमानत्वादरिष्टं भवति.. सर्वपूर्वरूपानुवर्तनं व्याधौ रिष्टमुक्तम्। CK.

38b-47. 'Yathāsvēna ūṣmaṇā' means 'agni of thirteen types such as rasāgni etc'.[1]

Obstruction in srotas in due to disease-causing dosa; loss of blood etc. is due to obstruction of passage and deficiency of nutrient rasa, diminution of dhātvagni is due to loss of dhātu and effect of doṣa.[2] The word 'ojas' here means 'essence' (of food) e.g. rasa.[3]

As the three symptoms are not specified, any three may be taken. Some take 'aṃsapārśvābhitāpa' (v.52) etc. as three symptoms of trirūpa rājayakṣmā.[4]

GD takes 'ojas' in the primary sense.[5] He also quotes Suśruta's view about ṣaḍrūpa and trirūpa. Suśruta's trirūpa is śvāsa, kāsa and asṛgāmaya[6] (raktacchardana).

48-50. Here pratiśyāya is pūrvarūpa.[7]

53-56. 'Pārśvaśūla' is unstable is nature as well as time.[8] Headache, pyrexia and heaviness denote the presence of vāyu, pitta and kapha respectively which shows it origin from tridoṣa.[9]

57. GD and JN accept the reading 'atikhinna' instead of 'abhiṣaṇna'.

58-59. Blood comes to throat because it has no other outlet.[10] Blood has no relation with nutrient rasa and as such gradually diminishes and accumulates in stomach itself.[11]

60-61. Though in the chapter on diseases (su.19) no tridoṣaja aruci is said] here it is mentioned for convenience of treatment. Because of its manifestation by prakṛtisamasamavāya, it is not described separately but should be understood on the basis of symptoms of each doṣa.[12]

---

1. ऊष्मणा रसाग्न्यादिरूपेण त्रयोदशविधेन। CK.
2. सन्निरोधादिति यक्ष्मकारकदोषेणावरुद्धत्वात् , रक्तादिसंक्षयोऽपि स्रोतोऽवरोधात्तथा पोषकरसाप्राबल्याच्च ज्ञेयः; धातूष्मापचयोऽपि धातुक्षयाद्दोषप्रभावाच्च ज्ञेयः । CK.
3. ओजसे इति सारभागाय, रसायेति यावत्। CK.
4. त्रिभिरित्यत्र यानि कानि त्रीणि यक्ष्मणो रूपाणि ज्ञेयानि, श्रृङ्गग्राहिकया ऽनिर्देशात्। अन्ये तु " अंसपार्श्वाभितापश्च" इत्यादिवक्ष्यमाणलक्षणत्रयं वर्णयन्ति। CK.
5. तेषां सारभागाय स खल्वोजसे क्लृप्तो भवति। GD.
6. तथा "त्रिभिर्वा पीडितं लिंगैः कासश्वासासृगामयैः" इति त्रिरूपाणि न विरुध्यन्ते। GD.
7. "यक्ष्मा चातः प्रजायते" इत्यनेनोक्तलक्षणप्रतिश्यायस्यैव पूर्वरूपतामपि सूचयति। CK.
8. पार्श्वशूलं त्वनियतमिति न संकोचरूपेण नियतं, किन्तु कदाचिदामरूपं कदाचित् संकोचरूपं, न सर्वदाभावि। CK.
9. शिरःशूलत्वेन वायुः, ससन्तापत्वेन पित्तं, सगौरवत्वेन श्लेष्मा, एवं त्रिदोषजन्यत्वं ज्ञेयम्। CK.
10. द्वारान्तरागमनात् कण्ठमेति। CK.
11. एवं रक्तस्य पोषकरसेनासंबन्धात् क्षीयमाणस्यामाशये एव बहुत्वं ज्ञेयम्। CK.
12. रोगाधिकारे.....यद्यपि त्रिदोषजाऽरुचिर्नोक्ता, तथापि चिकित्सार्थं द्वन्द्वजगुल्मवत् त्रिदोषजाऽरुचिरुच्यते। .....इयञ्च त्रिदोषजाऽरुचिः प्रकृतिसमसमवायारब्धा, तेन रोगाधिकारे प्रत्येकदोषजारुचिग्रहणेनैव गृहीता। प्रकृतिसमसमवायारब्धत्वेनैव त्रिदोषजारुचेः पृथग्लक्षणं नोक्तं, अतो वातादिलक्षणमेलकमेव तस्या लक्षणम्। CK.

63-64. Like ṣaḍaṅgapānīya, there is ṣaḍaṅga āja rasa (goat's soup).[1]

71-76. 'Patrabhaṅga' means 'tender leaves which destroy vāta'.[2] 'Savātikaih' means 'vātika' as well 'uttaravātika' (beneficial in vātika disorders) drugs.[3] Ck quotes from other texts these two gaṇas.[4]

GD interprets 'patrabhaṅga' as 'liquid prepared by grinding, rubbing, etc.'[5] According to him, 'saṃskṛtāḥ' is 'heated'.[6]

JN interprets 'patrabhaṅga as 'pieces of leaves' e.g. 'leaves of varuṇa etc. mentioned in the chapter on sudation'[7]

82-86. In the context of blood-letting, leeches should be applied in the case having vitiation of pitta and alābu in that affected by kapha.[8]

89-102. In the formulation beginning with prapauṇḍarīka milk serves as liquid but in case of its reading as 'kṣīrasarpiḥ', water is used for its cooking.[9] 'Daśamūla' here means 'decoction of daśamūla' or the reading may be 'dāśamūlena payasā' meaning 'milk processed with daśamūla'.[10] Interpreting the second half of the verse 94, Ck says that rāsnāghrta or rāsnākṣīra, balāghrta or balākṣīra should be used. Others take it as ghrta mixed with milk.[11]

Though hiccough is not read among symptoms of rājayakṣmā, it may arise as a complication. 'Saptaka bala' includes hiccough, the other six being cough, dyspnoea, hoarseness of voice, headache, pain in chest and shoulders and fever.[12]

---

1. साधारणीस्तु षडङ्गजरसादिरूपाः । CK.
2. पत्रभंगाश्च वातहरपल्लवाः । CK.
3. सवातिकैरिति वातिकोत्तरवातिकैः । CK.
4. तन्त्रान्तरे तु वातिकान्युत्तरवातिकानि च गणेन पठितानि यथा-"बिल्वोऽग्निमन्थः काश्मर्यं श्रेयसी पाटला बला। शालपर्णी पृश्निपर्णी बृहती कण्टकारिका। वर्धमानो मूलकञ्च वातिकान्यवतारयेत्। करमर्दं सबदरं कुलत्थाः शुष्कमूलकम्। श्वदंष्ट्रा वेणुपर्णी च साश्वगन्धा शतावरी। ऋष्यप्रोक्ता गुडूची च मधुकं शिग्रुरेव च। यवान्यारग्वधश्चैव यच्चान्यत् किञ्चिदीदृशम्। सर्वमेतद् विजानीयाद् भिषगुत्तरवातिकम्।" CK.
5. पत्रभंङ्गेन पेषणघर्षणादिना कृतो द्रवः । GD.
6. संस्कृता उष्णीकृताः । GD.
7. पत्रभंङ्गेन पत्रखण्डेन स्वेदाध्यायोक्तानां वरुणाद्यर्जकान्तानां पत्रैरित्यर्थः । JN.
8. पित्तदुष्टे जलौका, कफदुष्टे रक्तेऽलाबु ज्ञेयम् । CK.
9. प्रपौण्डरीकमित्यादौ क्षीरं द्रवम्। ये तु "क्षीरसर्पिः" इत्येकपदेन पठन्ति, ते क्षीरोत्थं सर्पिर्जलेनैव पाचयन्ति । CK.
10. दशमूलेनेति अत्र.....दशमूलक्वाथो ज्ञेयः ।..किंवा, "दाशमूलेन पयसा" इति पाठः, तेन दशमूलसिद्धेन क्षीरेणेत्यर्थः । CK.
11. रास्नाघृतं वा रास्नाक्षीरं वा...बलाघृतं बलाक्षीरञ्च..... । कासे वक्ष्यमाणं यद् रास्नाघृतं, बलाघृतञ्च वातरक्ते वक्ष्यमाणं, तत् क्षीरेण सहोपयुक्तमेतान् रोगान् प्रबाधत इत्याचार्यो वक्ष्यति । CK.
12. "यक्ष्मणः सप्तकं बलम् " इत्येनन स्वरभेदं" इत्यादिना ये सप्त गदाः पठितास्ते ज्ञेयाः, तेषु च हिक्का पठिता, सा च राजयक्ष्मलक्षणेषु यद्यपि न पठिता, तथाप्युपद्रवरूपा ज्ञेया । CK.

CHAPTER IX

1-2. Ck says that this order (of chapters) is different as (after the eighth) the chapters redacted by Caraka are those five concerning with arśa, atīsāra, visarpa, madātyaya and dvivraṇīya.[1]

3. Buddhi is reasoning, smṛti is memory and tapas cāndrāyaṇa etc.[2]

GD takes buddhi as of conclusive nature and jñāna the knowledge of truth.[3]

4. Antagonistic food such as fish with milk, defective as artificial poison and also that causing excessive pathos.[4]

In 'bhayaharṣapūrva', 'pūrva' means 'kāraṇa' (cause), thus it would mean 'mental injury due to fear or exhilaration'. Anger etc. also may damage the mind.[5]

GD reads 'manovighāta' and interprets it as 'affliction of mind due to desire, anger etc'.[6]

5. The mention of 'buddher nivāsam' as epithet of hṛdaya indicates derangment of intellect seated in heart which is affected in the disease.[7] The 'dhamanīs' related to hṛdaya are particularly psyche-carrying or it may mean the whole body permeated by mind.[8]

JN adds that hrdaya is also seat of knowledge, memory etc.[9]

6. In this verse, general symptoms of insanity are given but some take them as prodrome.[10]

'Saṃjñā' is interpreted as 'knowledge by naming'.[11]

---

1. अयं क्रमश्चरकसंस्कृतां पञ्चाध्यायीमर्शोतिसारवीसर्पमदात्ययद्विव्रणीयरूपां परित्यज्य ज्ञेयः । CK.
2. बुद्धिः ऊहापोहवती, स्मृतिः अतीतार्थविषयज्ञानं, तपः चान्द्रायणादि । CK.
3. बुद्धिर्व्यवसायात्मिका, ज्ञानं तत्त्वज्ञानम् । GD.
   बुद्धिः वस्तूनामवबोधः, स्मृतिः स्मरणम् , ज्ञानं तत्त्वतः अवधारणं, तत्त्वज्ञानमित्यर्थः तपः द्वन्द्वसहनं कृच्छ्रचान्द्रायणव्रताद्यनुष्ठानञ्च । **JN.**
4. विरुद्धं पयःसंयुक्तमत्स्यादि, दुष्टं गरादि अत्यर्थदोषजनकञ्च । CK.
5. अत्र पूर्वशब्दः कारणवाची, तेन भयहर्षकारणको मनोऽभिघात इत्यर्थः ।...भयहर्षावुपलक्षणौ, तेन क्रोधादयोऽपि मनोऽभिघातका अत्र ज्ञेयाः । CK.
6. मनोविघातः कामक्रोध.....चिन्तोद्वेगादिभिर्विहन्यते मनः । GD.
7. हृदयोपघाताद् बुद्ध्युपघातो वक्ष्यमाणो युक्त एव, आश्रयोपघातेनाश्रितस्योपघातः सिद्ध एव । CK.
8. स्रोतांसि च मनोवहानीत्यनेन हृदयदेशसंबन्धिधमन्यो विशेषेण मनोवहा दर्शयति, किंवा, केवलमेव शरीरं मनोऽभ्यनुस्यूतं जग्राह । CK.
9. बुद्धेः ज्ञानस्मृत्यादीनां चापि निवासं आश्रयं हृदयम् । JN.
10. धीविभ्रम इत्यादिना सामान्यमुन्मादपूर्वरूपमाहेत्येके । CK.
11. संज्ञा नामोल्लेखेन ज्ञानम् । CK.

GD contradicts the view that it is prodrome as it does not tally with that mentioned in the section on nidāna.[1]

11-12. The word 'citam' indicates greater aggravation of pitta as aggravation of doṣa is greater if preceded by accumulation. Others take it as 'aggravated'.[2]

13-14. 'Soṣmā kapha' denotes that kapha when associated with ūṣmā causes insanity and not alone Or 'ūṣmā'may mean 'power' and thus 'soṣmā kapha' would mean 'powerful kapha'.[3]

GD does not agree to it. He says that both these views are incorrect because it would tell upon the independent causation of the doṣa. In fact, every thing is pāñca-bhautika and thus kapha, inspite of having properties such as guru, śīta etc., gets aggravated in association with ūṣmā produced by initiating tejas.[4]

JN, however, takes a different view. According to him, 'soṣmā' originally qualifies the patient and by its relation secondarily kapha. Thus it is a symptom meaning 'desire for hot things'. He also refutes the view that 'ūṣmā' means pitta because in that case it would be dual.[5]

15. Some say that the word 'tādṛk' indicates that only that is to be rejected which is caused by all the etiological factors and has all the symptoms and not that which is weaker in these respects.[6]

GD, in addition, comments that only the tridosaja type where therapeutic measures are not conflicting is mentioned as curable.[7] Commenting on Suśruta's classification, he says that the type caused by psychic factors (mānasa duḥkhaja) which is described by Suśruta as the fifth type is, in fact, included in three doṣaja types, similarly, that caused by poisons is covered by disorders of poisoning.[8]

1. नेदं सामान्यं पूर्वरूपं, निदानस्थानोक्तसामान्यपूर्वरूपानैक्यात् स मूढचेता इत्यादिरूपाणामनन्तरोक्तानामपि सामान्यलिंगत्वाच्च। GD.
2. चितमित्यनेन चयपूर्वकत्वेन पित्तस्य महान्तं कोपं दर्शयति, चयपूर्वको हि दोषकोपो बलवत्वान्महान् भवति। अन्ये त्विह चितशब्देन प्रकोपमिच्छन्ति। CK.
3. सोष्मा कफ इति सह ऊष्मणा कफ उन्मादं करोति न केवल इति, उन्मादकरणे कफस्योष्मसहितत्वरूपं स्वभावं दर्शयति। किं वोष्मशब्देन वीर्यं शक्तिरूपमुच्यते, तेन सोष्मा कफ इति उत्क्लिष्टशक्तिक: कफ इत्यर्थ:। CK.
4. सोष्मा सपित्त: कफ प्रवृद्ध इत्याहुरेके....अन्ये तु शक्तिरूष्मा उत्कृष्टशक्ति: कफ: इत्याहु:; द्वयमप्येतन्न साधु पृथग्दोषभवाभावप्रसंगात्। सर्वो हि पाञ्चभौतिकस्तेन श्लेष्मा गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलगुणोऽपि स्वारम्भकतेजस उद्रेकेण शीतविपर्ययेण खलूष्मणा सहित: प्रवृद्धो भवति, न तून्मादरोगे शीतगुणेन प्रवर्धति कफ:। शीतगुणानप्यतिरेकेण प्रवृद्ध: श्लेष्मा सोष्मा भवति, तदारम्भकतेजस उद्रेकात्। GD.
5. सोष्मा आतुर:, तत्संबन्धित्वेन इह कफोऽपि सोष्मा उच्यते, येन तज्जन्यत्वेन कफजोन्मादे सोष्मत्वमपि लिंगम् इति व्यज्यते। सोष्मत्वमुष्णाभिलाषित्वम्। JN.
6. केचिदत्र तादृक्शब्देन य एव समस्तहेतुज: सर्वलक्षणश्च स एव वर्ज्यो न त्वल्पहेतुलक्षण इति वदन्ति। CK.
7. भैषज्यविधि: यत्र त्रिदोषजे विरुद्धो न भवति स एव साध्यत्वेनोक्त:। GD.
8. यस्तु सुश्रुतेन मानसदु:खज: पंचम उक्त: स च वातादिजेषु त्रिष्वन्तर्भवति।......विषजश्च विषरोग एवान्तर्भूत:। GD.

17. The word 'aniyata' means that there is no fixed time as in vātika etc. In case of the reading 'niyata', it denotes regular in particular date etc.[1]

24-33a. 'Viśeṣávid' indicates that intake of sneha is useful only in uncovered vāta and is contra-indicated in the covered one.[2]

33b-42a. The explicit mention of the word 'aṣṭāviṃśati' denotes separate use of each drug of triphalā. Others say that by 'tālīśapatram' there may not be any doubt of two drugs (tālīśa and patra) so to eliminate it the word 'aṣṭāviṃśati' is used. Others, however, say that to denote the title 'aṣṭāviṃśatyauṣadha' it is so mentioned.[3]

Ck has discussed at length the topic of the use of the group of drugs collective or otherwise. He says that if durgs are mentioned chiefly, each drug of the group should be taken separately and not collectively but where the quantity is main, the group should be taken as whole[4] and also where it is mentioned chiefly and specifically.[5]

42b-44. By 'sthirādi' Ck takes 'sthirādi (laghu) pañcamūla and completes the number (twenty one) by taking drugs upto viḍaṅga on the authority of Jatūkarṇa.[6]

Here decoction should be taken four times of ghee like milk.[7] By the word 'ekaviṃśati' some take cooking of ghee twenty one times.[8]

GD contradicts those who take decoction in the quantity equal to that of ghee.[9]

57-63a. Some say the verses beginning with 'ugragandham' as unauthoritative.[10]

63b-76a. 'Agada' means 'anti-poison'.[11] 'Gandha' here means 'aguru etc. (except

---

1. अनियत इति वातिकादिवन्न आहारजीर्णादिकालनियतः। ये तु "नियत" इति पठन्ति, तेषां वक्ष्यमाणनियततिथ्यादीनां ग्रहणमभिप्रेतम्। CK.
2. विशेषवदिति वातस्य निरावरणरूपं विशेषं जानन् स्नेहपानं वातजे दद्यादिति दर्शयति, सावरणे तु तन्निषिद्धमेव। CK.
3. अत्र यद्यपि त्रिफलायाः प्रत्येकमेको भागो गृह्यते उत्सर्गतः तथाऽपि त्रिफलायाः प्रत्येकभागग्रहणदार्ढ्यार्थमष्टाविंशतिभिरित्युक्तम्। ....अन्ये तु तालीशपत्रमित्यत्र तालीशं च पत्रं चेति द्रव्यद्वयग्रहणशंका स्यात्, तेनाष्टाविंशतिपदेन सा न भवत्वेतदर्थमष्टाविंशतिभिरिति कृतं, त्रिफलायाः प्रत्येकं ग्रहणं न्यायसिद्धमेवेति वदन्ति। अन्ये त्वष्टाविंशत्यौषधमिष्यत इत्यादावष्टाविंशत्यौषधसंज्ञया व्यवहारोऽस्य भवतीत्येतदर्थमष्टाविंशतिभिरिति कृतम्। CK.
4. द्रव्यप्राधान्येनोपदिश्यमानं भागमानं प्रयोगेषु प्रतिद्रव्येष्वेव भवति न समुदाये। यदा तु मानप्राधान्येन निर्देशस्तदा समुदितस्यैव द्रव्यस्य मानग्रहणम्। CK.
5. यदा समुदायप्रधाननिर्देशो विशेषाल्लिख्यते, तदा प्रत्येकनिर्दिष्टलिंगानामपि समुदायस्य भागो भवति। CK
6. स्थिरादीनीत्युक्ते विदारिगन्धादिपञ्चमूलमपि स्यादत आह....विडंगान्तशब्देन च कल्याणोक्तैकविंशतिस्थिरादिद्रव्यग्रहणमेव भवति। CK.
7. अत्र क्षीरेणैव चातुर्गुण्ये प्राप्तेऽयं कषायः.....चतुर्गुणो ज्ञेयः। CK.
8. केचित्त्वेकविंशतिपदेनैकविंशतिवारान् सर्पिस्तयैव विधया पक्तव्यमिति वदन्ति। CK.
9. तत्रान्ये व्याचक्षते...स्थिरादिक्वाथो भागानुक्तौ सर्पिःसम इति..तन्न यौक्तिकमुपलभामहे। GD.
10. उग्रगन्धमित्यादिकं केचिदनार्षं वदन्ति। CK.
11. अगद इति विषहरः। CK.

tagara)' (see su.ch.5).[1]

76b-77. 'Tiktaka' means mahātiktaka. Jīvanīya ghrta is that described in vātarakta and miśraka sneha is that described in treatment of gulma.[2]

78. Though the use of meat is contra-indicated in insanity, it also acts as remedy like fear and exhilaration. Others, however, say that its contra-indication is only in the exogenous type and thus there is no conflict in its use in the innate type. Ck emphasises on the former argument.[3]

85-86. Though it is not mentioned in the beginning, it is dealt with here because of its relevance as in the chapter on tṛṣṇā, an additional tṛṣṇā caused by heavy food is described. But it may even be covered by anxiety etc. If insisted on five types, it may be included in the vātika type because it causes aggravation of vāta. Similar explanation may be given in the type caused by desire etc.[4]

---

1. गन्धैरिति अगुर्वाद्यैस्तगरवर्जितैः । CK.
2. तिक्तकं महातिक्तकम् । जीवनीयं सर्पिर्वातरक्ते वक्ष्यते, मिश्रकः स्नेहः गुल्मचिकित्सितोक्तः । CK.
3. मांसं च यद्यपि .....उन्मादे निषिद्धं तथाप्येवंविधप्रयोगेण मांसस्य यौगिकत्वमाह, यथा भयहर्षयोरुन्मादकारणत्वेऽपि तौ पुनरुन्मादे विधेयत्वेनोच्येते.....अन्ये तु निवृत्तमांसत्वमागन्तून्मादप्रशमनमिति व्याख्यानयन्ति, तेनेह निजे मांसविधाने भिन्नविषयतया न विरोध इति वर्णयन्ति। किन्तु निदानोक्तस्यापि मांसस्य यत् स्वजन्यव्याधिप्रशमकत्वं तदप्यतिदृष्टत्वादविरुद्धमेव, तेन पूर्वमेव समाधानमत्र समीचीनमिति पश्यामः ।CK.
4. इष्टद्रव्येत्यादिना पूर्वसूत्रितोऽयमुन्मादः प्रकरणाच्चिकित्स्यते, यथा तृष्णाध्याये.....गुर्वन्नजाया अधिकायाश्चिकित्सोच्यत इत्याहुः । किन्तु चिन्तादिदुष्टहृदय इत्यादिनोक्तसामान्योन्मादेन गृहीत एवायमर्थोऽत्र चिकित्सिते इति पश्यामः । पञ्चोन्मादव्यवस्थायामस्य वातिके एवावरोध उचितः, इष्टद्रव्यविनाशस्य वातप्रकोपकारित्वात् । एवं कामादिभवेष्वपि वाच्यम् । CK.

CHAPTER X

3. 'Bībhatsaceṣṭā' means 'frothy discharge from mouth, convulsions in limbs etc.[1]

JN clarifies the nature of the disorder by analysing the derivation of the word 'apasmāra'.[2]

4-5. Ck interprets 'sattva' as 'sattvaguṇa' and not mind.[3] GD takes it as mind.[4]

6-8a. By 'dhamanī', particularly those connected with hṛdaya are taken.[5] Here cause of aggravation of vāta etc. are not mentioned they are the same as in case of insanity.[6]

JN says-the word 'śrita' means established (firmly), not moving away after the attack passes away.[7]

14-15. 'Prabodhana' means 'normal functioning on elimination of doṣa'.[8]

25-27. Though urine is usually taken of cow but here bull's urine is useful.[9]

In apasmāra there is no dual type and as such 'vātaśleṣmātaka' should be interpreted as 'vātātmaka' and 'śleṣmātaka'. Others take it as dual type caused by Prakṛtisamasamavāya as in gulma.[10]

32-33. In the formulation beginning with kaṭabhī, the decoction should be three times of oil, the fourth part being of urine.[11]

41-45. That the urine of brown cow is specifically powerful is indicated by the authoritative words.[12]

1. बीभत्सचेष्टा फेनवमनांगविक्षेपणादिका। CK
2. अप अपगतः स्मारः स्मरणं अनुभूतार्थविज्ञानं यस्मिन् रोगे सोऽपस्मारः। JN.
3. सत्त्वे इति सत्त्वाख्यगुणे.....नतु सत्त्वशब्देन मन उच्यते। CK.
4. सत्त्वे मनसि। GD.
5. हृदयाश्रिता एव धमन्यो विशेषेण गृह्यन्ते। CK.
6. अत्र च वातादीनां प्रकोपे पृथक् पथक् हेतुर्नोक्तः, तस्योन्मादसाधारणत्वेन लब्धत्वात्। CK.
7. श्रिता आश्रिताः स्थिताः, वेगविरतौ न तु गताः। JN.
8. प्रबोधनमिति दोषविरहितत्वेन सम्यक्स्वव्यापारकरम्। CK.
9. अत्र च यद्यपि-"स्त्रीणां तीक्ष्णं गवां मूत्रं न तु पुंसां तथाविधम्। पित्तांशिकाः स्त्रियो यस्मात् सौम्यास्तु पुरुषाः स्मृताः" इत्यनेन स्त्रियाः मूत्रं प्रशस्तमुक्तं, तथाऽपीह विशेषपरिग्रहात् पुंल्लिङ्गयोरेव मूत्रं यौगिकमिति। CK.
10. वातश्लेष्मातके इति द्वन्द्वापस्मारानिर्देशाद् वातात्मके श्लेष्मात्मके चेति ज्ञेयम्ः अन्ये तु गुल्मवदनुक्तमपि प्रकृतिसमसमवायारब्धद्वन्द्वजं "वातश्लेष्मात्मके" इत्यनेन सूचितमपस्मारं वदन्ति। CK.
11. कटभीत्यादौ कटभ्यादीनां चतुर्णामपि त्वचं गृहीत्वा क्वाथः स्नेहत्रिगुणः कर्तव्यः, चतुर्थस्तु मूत्रभागेनैव स्नेहसमेन पूर्यते। CK.
12. कपिलानां गवां मूत्रे विशेषकरी शक्तिर्भवतीति आप्तवचनादुन्नीयते। CK.

By 'lavaṇāni' five common salts or all those mentioned under the lavaṇa varga may be taken as available.[1]

53. The symptoms of exogenous one are only added to those caused by doṣas, they can't stand independently. Hence there is no separate exogenous type of apasmāra as of unmāda. It is only a later association. Others, however, maintain that there is no restriction to the number of types and as such it relates to independent exogenous apasmāra with regard to its symptoms and treatment. [2]

54-63. Ck comments that though these verses are read by the scholars of Sindhu and Kashmir regions, the elders take them as unauthoritative.[3]

1. लवणानि सैन्धवादीनि पञ्च, किंवा, लवणवर्गोक्तानि सर्वाण्येव यथालाभं ग्राह्याणि। CK.
2. तेनागन्तुलिङ्गं दोषजेषु भवति, न च दोषलिंगं विनाऽऽगन्तुलिंगता संभवति। ततश्चागन्त्वपस्मारः पृथङ्न भवति, किन्तु दोषजस्यानुबन्धरूपः पश्चात्कालीनः स आगन्तुः, तेन "चत्वारोऽपस्माराः" (सू.अ.19) इति यदुक्तं तस्यागन्तुरनुबन्धो भवत्येव कदाचिदिति। अनेनानुबन्धरूपतैव भूतापस्मारे दर्शिता, न तून्मादवत् स्वातन्त्र्येण कर्तव्यं भूतानाम्।.....अन्ये तु भीमदन्तादयः स्वतन्त्रागन्त्वपस्मारलक्षणचिकित्सानिर्देशार्थमत्र ग्रन्थं वर्णयन्ति, न संख्यानियमश्च दोषजापस्माराणामेवं भवति। CK.
3. अस्मिन् प्रदेशे सैन्धवाः काश्मीराश्च "भगवन्" इत्यादिना अतत्त्वाभिनिवेशस्य लक्षणचिकित्साग्रन्थं पठन्ति, स चानार्ष इति वृद्धाः। CK.

CHAPTER XI

1-2. The disease causedby 'kṣatakṣīṇa' and sexual indulgence etc. is the chief one and is called 'uraḥkṣata' by placing cause as effect. When the reading is 'kṣīṇakṣata' it denotes injury in the debilitated person. Others take 'kṣata' and 'kṣaya' as two syndromes. In fact, the disease is one becuase of its mention in singular number and the division is only in symptoms based on causes or such mention of cause and symptoms is significant in prodromal stage for convenience of treatment.[1]

JN comments-how kṣatakṣaya differs from yakṣmā because of similar pathogenesis and non-mention of the formur in enumeration of disorders? The answer is-both are different. Kṣatakṣaya is anubandhya (chief) and when it is neglected, yakṣmā is associated later on. Both are also mentioned separately. There is also difference in pathogenesis. In yakṣmā, it arises independently after uraḥksata whereas in case of kṣatakṣaya, kṣaya follows uraḥkṣata and yakṣmā is only associated later.[2]

4-8. 'Vyādhi' denotes 'kṣatakṣaya' others take it as 'kṣata'.[3] It should not be confused with rājayakṣmā because uraḥkṣata is caused only by tridoṣa, its pathogenesis and symptoms also are different.[4]

Ck interprets 'pramitāšana' as 'constant use of single rasa' or 'eating late'.[5]

GD says the disease as of two type-one due to overexertion and the other caused by debility.[6]

JN contradicts both Ck and GD. He says that debility caused by loss of semen and ojas is not kṣatakṣaya but yakṣmā caused by debility.[7]

---

1. तत्र क्षतक्षीणरूपाद् वक्ष्यमाणस्त्रीसेवादिकारणकशुक्रौजःक्षयाच्च जातो व्याधिः प्रधानम् 'उरो विरुज्यते' इत्यादिना वक्ष्यमाणलक्षणकः कारणे कार्योपचारात् "उरःक्षत" इत्युच्यते। यदा "क्षीणक्षत" इति पाठः.....पूर्वरूपावस्थायां व्याधिप्रतिक्रियार्थं ज्ञेयम्। CK.
2. ननु क्षतक्षयो राजयक्ष्मणोऽभिन्न एव तुल्यसम्प्राप्तिकत्वात्.....रोगाधिकारे पृथगनुद्देशाच्च।.....उभयोर्भिन्नत्वात्। तथा च "उपेक्षिते भवेत्तस्मिन्ननुबन्धो हि यक्ष्मणः" इत्यनुबन्ध्यानुबन्धत्ववचनात् अस्मन्नये क्षतक्षयो यक्ष्मणो भिद्यते। भेदेन निर्देशश्चापि।.....एवमनयोर्भेदात् सम्प्राप्त्योरपि भिन्नत्वम्। तथा च-एकत्र उरःक्षते जाते यक्ष्मणः स्वातन्त्र्येण सम्प्राप्तिः, अन्यत्र च क्षयस्य, यक्ष्मणस्तत्रानुबन्धरूपत्वम्। JN.
3. व्याधिरिति वक्ष्यमाणलक्षणः क्षतक्षयाख्यो व्याधिः, अन्ये तु व्याधिशब्देन क्षतमेवाहु। CK.
4. न चास्मिन् राजयक्ष्मरूपता शंकनीया, यत उरःक्षतस्त्रिदोषजन्य एव, भिन्नसम्प्राप्तिश्च.....लक्षणानि भिन्नान्येव। CK.
5. प्रमिताशनम् एकरसाभ्यासः, किंवाऽतीतकालभोजनम्। CK.
6. इति द्विधा क्षतक्षीणम्। GD.
7. जल्पकल्पतरुकारस्तु व्याचष्टे-वक्षसि विक्षते.....स्त्रीष्वतिप्रसक्तस्य.....इति द्विधा क्षतक्षीणः।..... एवं चक्रपाणिरपि मन्यते। तच्चिन्त्यम्। तथा च शुक्रौजसोःक्षयात् यः क्षयः स न क्षतक्षयः किन्तु क्षयहेतुकयक्ष्मा। JN.

12b-13. 'Avyakta' means 'incomplete in symptoms due to slightness'.[1]

In v. 13, specific prodroma are mentioned of kṣata as well as kṣīṇa. Others take it as symptoms of two phases of the disease.[2]

GD discussing the nature of pūrvarūpa says that it always precedes the disease and can't be found in the present stage which is rūpa. Thus in case of kṣatakṣīṇa, there is no pūrvarūpa different from rūpa. Whatever rūpa is slightly manifested before the appearance of disease is known as pūrvarūpa.[3]

15-20. Some read 'dvivatsakām' (V.16) meaning two parts or types of kuṭaja.[4] By 'madhūka', its flowers should be taken.[5]

GD reads "samustātiviṣām paṭhām savatsakām" taking 'vatsaka' as 'seeds of vatsaka (kuṭaja).[6]

21-24. The word 'yuktyā' indicates that honey should be added in the quantity by which pills may be prepared.[7]

35-43. Marica etc. collectively should be taken in quantity of half pala; the elders, however, take separately half pala.[8] Distinguishing between 'sudhā' and 'amṛta', Ck says that the former is terrestrial whareas the latter celestial nectar.[9]

GD and JN take each of marica etc. in quantity of half pala.[10] About 'sudhā', JN says that it is food of 'bhogins[11] (nāgas).

44-47. Milk may be four times of ghee or decoction.[12]

50-55. According to Ck, the quantity of honey in 'sarpirguḍa' should be equal to

1. अव्यक्तमिति अल्पत्वेन यथोक्तलक्षणतोऽसंपूर्णम्। CK.
2. कासो वैशेषिकः इति विशिष्टः.....अन्ये तु उरोरुगित्यादिनाऽवस्थाद्वयस्य लक्षणद्वयमेतद् वर्णयन्ति। CK.
3. एतेन सर्वेषामेव व्याधीनामव्यक्तलक्षणमपि पूर्वरूपमुच्यते, तत्तु दोषविशेषकृतत्वात् केचिदाहुर्विशिष्टपूर्वरूपं व्याधेरिति, तच्च न प्रागुत्पत्तिलक्षणमेवेति.....उरःक्षतक्षीणयोः पूर्वरूपं नास्त्यतिरिक्तं रूपात्.....तत्तदेव लक्षणं प्रागुत्पत्तेरव्यक्तं यज्जायते तत्प्रागुत्पत्तिलक्षणं तस्य पूर्वरूपं न त्वपरं पूर्वलक्षणमस्ति, व्याधेः स्वभावादिति। GD.
4. अत्र ये 'द्विवत्सकाम्' इति पठन्ति ते वत्सकभागद्वयं ग्राहयन्ति, किंवा वत्सकद्वयमेव द्विवत्सकशब्देन गृह्यते। CK.
5. मधूकशब्देनेह मधूकपुष्पं ग्राह्यम्। CK.
6. सवत्सकबीजां पाठाम्। GD.
7. युक्त्येति यावता मधुना गुटिकाः भवन्ति तावन्मानं मधु देयम्। CK.
8. पलार्धकत्वमिह मरिचादीनां मिलितानां, समाहारप्रधानत्वान्निर्देशस्यः वृद्धास्तु प्रत्येकमेव पलार्धकत्वं वदन्ति। CK.
9. सुधा भौमी भोज्या, अमृतं तु देवभोज्यम्। CK.
10. पञ्चानां प्रत्येकं पलार्धकम्। GD.
    मरिचादिकं प्रत्येकमर्धपलमितम्। JN.
11. सुधा भोगिभोज्या, अमृतं देवभोज्यम्। JN.
    Accordingly the CK's reading may be 'bhaugi' instead of 'bhaumi' as in GD's edition.
12. क्षीरं चात्र चतुर्गुणं घृतात् , किंवा क्वाथचतुर्गुणं क्षीरम्। CK.
    क्षीरं क्वाथाद् घृताद्वा चतुर्गुणम्। JN.

that of tvadkṣīrī etc.[1] GD takes it as one-fourth.[2]

56-61. Wrapping of boluses is done to enhance their potency.[3]

66-69. In 66, the correct reading as accepted by Ck is drākṣāṃ navamāmalakaṃ as evident from his comm. (drakṣāmityādau) and f.n. in GD's comm. The present text found in nirnayasagar edition is that accepted by GD.

70-77. Ck says that cowmilk here is mentioned as source (of ghee) and not for cooking as in this case modaka can't be prepared with addition of powder.[4]

GD reads "gokṣīrād dvyāḍhakaṃ"

1. समध्वंशानित्यनेन मधुनः त्वक्क्षीर्यादिसमानतामाह। CK.
2. चतुर्थांशं मधु दत्वा। GD.
3. भूर्जपत्रवेष्टनं च शक्त्युत्कर्षार्थम्। CK.
4. गोक्षीरेत्यादौ गोक्षीरं कारणतयोच्यते न घृतपाकार्थं, तथाहि सति प्रक्षेप्यचूर्णेन मोदका न भवेयुः। CK.

CHAPTER XII

1-2. In kṣatakṣīṇa there is injury to marmas, in śotha also the same is present [as cause] hence due to similarity of cause, the treatment of śotha is described after that of kṣatakṣīṇa.[1]

3. 'Prakopa' here means 'cause of prakopa (aggravation). 'Rūpa' denotes symptoms as well as prodrome.[2]

JN says that because of being means of the knowledge of disease samprāpti is also included in 'rūpa'.[3]

4. 'Agadaveda' is veda (source of knowledge) of regaining health. [4] 'Ekāṅgaja' here means 'that produced in half or one of the organs of the body.'[5]

GD interprets 'agadaveda' as 'Āyurveda'.[6]

Śotha caused by dual and triple doṣas is included in 'vātika' etc.[7]

5-6. 'Abhakta' means 'abstenance from food' or 'unwholesome food.[8]

GD says that 'dadhi' etc. are related to 'anna' but combines 'āma' with 'mṛt'. [9]

JN reads 'abhukta' and interprets it as 'fasting'. By 'āma' he rightly takes uncooked but also puts alternative as 'undigested juice.[10]

7. 'Bāhya' means superficial, thus it indicates that śotha does not affect the deep layers of skin.[11] 'Ca' indicates that exogenous śotha also has got three types as in case of innate one.[12]

---

1. क्षतक्षीणे मर्मोपघातो भवति, शोथेऽपि मर्मोपघातः कारणं, तेन समानहेतुतया क्षतक्षयमनु शोथचिकित्सितमुच्यते। CK.
2. प्रकोपयतीति प्रकोपो हितुरित्यर्थः, किं वा कार्यकारणयोरभेदोपचारात् प्रकोपशब्देन श्वयथुकारणमुच्यते। रूपशब्देन रूपपूर्वरूपयोर्ग्रहणम्। CK.
3. व्याधिज्ञापकतया सम्प्राप्तिपूर्वरूपयोः इह रूपशब्देन ग्रहणम्। JN.
4. अगदाथ आरोग्यार्थो यो वेदः सोऽगदवेदः। CK.
5. तत्रैकांगजेनार्धगात्राश्रितावयवाश्रितयोरिह ग्रहणं ज्ञेयम्। CK.
6. अगदवेदसिन्धुरायुर्वेदसिन्धुः। GD.
7. द्वान्द्विकसान्निपातिकानामिह वातिकादिष्ववरोधः। JN.
8. अभक्तं अभोजनं विगुणञ्च भोजनम्। CK.
9. अन्नस्य दध्यादिप्रत्येकेनोपसृष्टत्वम्। आममृत् अपक्वमृत्। GD.
10. अभुक्तमभोजनमुपवासश्च।.....आममपक्वम्, आमः अपक्वरसो वा। JN.
11. बाह्या इति अगम्भीराः, एतेन गम्भीरत्वग्दूषकत्वं शोथस्य न भवति। CK.
12. चकारादागन्तुरपि यथोक्तभेदात् त्रिविध इत्यर्थः। CK.

8.The word 'sirā' denotes channels in general.[1] Utsedha' (protuberance) is the specific sign of the disease. [2]

9. 'Adhaḥ' means 'pakvāšaya' etc. Pakvāšaya is the seat of vāyu.[3] 'Kvacit' means in throat, palate etc.[4]

BY 'ūrdhva', JN takes 'āmāšaya' which is the seat of kapha.[5]

10. 'Davathu' is distress in eye etc.[6] JN interprets is as burning sensation. [7]

12. 'Harṣa' is tingling sensation or horripilation. [8] Some read 'nimittataḥ' instead of 'animittataḥ' which means 'by measures for pacifying vāta such as oil massage, fomentation, pressing etc'. [9]

14. In night due to obstruction in channels the body fluid increases and because of inactivity also kapha increases and as such kaphaja type of šotha aggravates in night. On the contrary, during day the channels are clear and due to activity also kapha does not aggravate but vāyu and as such vātaja šotha is more pronounced in day.[10]

15. Vomiting etc. refers to the complications of šotha as enumerated in C.Su. 18[11]

16. The disease may be known as curable with difficulty if all the symptoms of the easily curable are not present.[12]Here the word 'doṣa' has come twice. The first one denotes dosa in general while the second one means particular doṣa. Others take the former as dūṣya and the latter as doṣa. In the former interpretation 'doṣa' includes 'dūṣya' as well. [13]

---

1. सिराशब्देन स्रोतसां सामान्येन ग्रहणम्। CK.
2. उत्सेधेनाव्यभिचारिणा लिङ्ग्यत इति उत्सेधलिङ्गः। CK.
   उत्सेधलक्षणं स्फीतलक्षणम्। GD.
   उत्सेधः औन्नत्यं एव लिङ्गं स्वरूपं अव्यभिचारिलक्षणं यस्य तम्। JN.
3. अध इति पक्वाशयप्रभृतौ। वायोः स्थानं पक्वाशयः। CK.
4. क्वचिदिति कण्ठताल्वादिदेशे। CK.
5. ऊर्ध्वमामाशयः श्लेष्मणः स्थानम्। JN.
6. दवथुः उपतापश्चक्षुरादौ। CK.
7. दवथुः दाहः। JN.
8. हर्षः "झणझणिका" इति ख्याता वेदना, किंवा रोमहर्षः। CK.
9. केचित् "निमित्ततः" इति पठन्ति, तेन "स्नेहोष्णमर्दनाभ्याञ्च प्रणश्येत् स च वातिकः" इति यदुक्तं, तदेवेदमुच्यते। CK.
   निमित्ततः निमित्तेन स्नेहस्वेदादिना। JN.
10. रात्रौ स्रोतोरोधजेन देहक्लेदेनाचेष्टया च कफस्य वृद्धत्वात् तज्जनितशोथो बलवान् भवति, दिवा तु स्फुटस्रोतसि शरीरे चेष्टायुक्ते न कफो बली भवति किन्तु वायुः, तेन वातशोथो दिवा बली भवति, कफशोथस्तु हीयते। CK.
11. वमिपूर्वकैरिति त्रिशोथीये "छर्दिः श्वासोऽरुचिस्तृष्णा ज्वरोऽतीसार एव च। सुप्तिः शोषः सदौर्बल्यः शोथोपद्रवसंग्रहः॥" (सू० अ० 18) इत्यनेनोक्तैः। CK.
12. कृच्छ्रसाध्यलक्षणं च सुखसाध्यलक्षणासंपूर्णतायां ज्ञेयम्। CK.
13. दोषशब्देन वातादयो गृह्यन्ते.....तेनैव तद्विशिष्टवाचकतया बलदोषकालविदिति वचनं न पुनरुक्तम्। अन्ये तु, प्रथमेन दोषशब्देन दूष्यधातुग्रहणं, द्वितीयेन तु वातादिग्रहणमित्याहुः। प्रथमव्याख्याने तु दोषशब्देनैव दूष्यस्यापि दोषाधारस्य ग्रहणं ज्ञेयम्। CK.

17-19. Ck says that doṣas are verily immature in earher stage.[1]

21-22. In šotha, kapha doṣa is to be tackled first, hence treatment of kaphaja šotha is described first.[2]

Here iron should be taken killed as in rasāyana. Its quantity should be little and not equal (to other drugs) as it creates complications.[3]

23-28. The quantity (one prastha=640ml.) of milk is too much and as such it should be taken after reducing to one-half by boiling.[4] In the formulation beginning with 'mayūraka', the quantity of milk and drugs should be the same as in the proceding one.[5] In the formulation dantī etc. milk is too much in comparision to drugs and as such it should be reduced.[6]

29-31. The word 'vaihāyasa' is interpreted as 'antarīkṣa'[7] (open space). JN interprets it as 'on a support suspended in space'.[8]

34-38. Here six types of udararoga are indicated leaving two ones e.g. chidrodara and jalodara which are incurable.[9]

GD reads 'kṣaudraghṛtapradigdham' and interprets that is should be taken mixed with honey and ghee.[10]

39-40. Here, Ck says, in two prastha of triphalā etc. four times water should be given decocted to one-fourth as in other āsavas. Others, however, in powder itself add half droṇa water. Or powder should be taken in quantity of kuḍava, and honey double of that.[11]

1. अपक्वता च प्रायो दोषाणां प्रथमदुष्टौ भवति। CK.
2. अत्र कफदोषस्यैव प्रथमं चिकित्स्यत्वेन व्योषमित्यादिना कफशोथचिकित्सामाह। JN.
3. मारितमेवात्र अयोरज इच्छन्ति, रसायनेऽपि मृतायोरजस एव प्रयोगोपदेशात्। अयोरजो न समं तुल्यमानं, अयो हि दुष्परिणामं, तेनाय:- प्रयोगेऽल्पमेव लोहं मात्रानुसारेण ज्ञेयम्। CK.
   अयोरजः शोधितमारितपुटितलोहचूर्णम्। GD.
   सायोरजस्काः मारितपुटितलोहचूर्णसहिताः। JN.
4. पुनर्नवेत्यादौ प्रस्थमानं क्षीरमतिबहुत्वात्तदर्धावशिष्टं पक्त्वा पेयम्। CK.
5. मयूरकमित्यादावपि पूर्वयोगोक्तं क्षीरं द्रव्यमानं च ज्ञेयम्। CK.
6. अत्र च भेषजापेक्षया क्षीरस्य बहुत्वात् स्तोकक्षीरदानं केचिदिच्छन्ति साधनत्वेन कर्तव्यमिति। CK.
7. वैहायसे इति अन्तरिक्षे। CK.
8. विहाय आकाशम् , तदवलम्ब्य स्थिते वैहायसे शिक्ये। JN.
9. षड्जठराणीति भेषजासाध्यौ छिद्रदकोदरौ वर्जयित्वा। CK.
10. क्षौद्रघृतप्रदिग्धं.....पिबेत्। GD.
11. फलत्रिकमित्यादौ त्रिफलादीनां चतुर्गुणं जलं दत्वा पादावशेषः कषायः आसवान्तरे दृष्टत्वाज्ज्ञेयः।.....अन्ये तु चूर्णे एव द्रोणार्धं परं जलं ददति। किंवा, कुडवमानत्वं चूर्णस्य देयं, तेन द्विरंशं क्षौद्रमिति द्विकुडवमिति यावत्। CK.

43-46. 'Catvāri lavaṇāni' means 'four salts except sāmudra one'[1] In this formulation water should be four times of powder.[2]

According to GD, dry radish should be cooked in eight times water reduced to one fourth. In this other powders should be added and again cooked till it becomes thick. He also criticises those who advocate addition of powders when alkaline water, after cooking, becomes thick.[3]

JN is not clear and presents both alternatives.[4]

47-48. Increase by half pala is for both fresh ginger and jaggery combined and not separately as in that case the dose would be too much which may produce loss of appetite etc. By increasing half pala daily it would be five palas in ten days.[5]

49. The word 'tathaiva' denotes that this should be increased by half pala daily and also be taken with jaggery as in preceding formulation.[6]

50-52. In this formulation, the quantity of decoction is one kaṃsa (ādhaka) and as such daśamūla is taken in the same quantity e.g. 64 palas. Others read as "dvipañcamūlasya tulākaṣāye kaṃso'bhayānāṃ ca śataṃ guḍasya".[7] As the quantity of trikaṭu and trisugandha is not mentioned it should be decided on the basis of other leha formulation. In agastyaharītakī, pippalī powder is added in quantity of four palas in one tulā (100 palas) of jaggery. In cyavanaprāśa, two pala pippalī powder is added in half tulā (50 palas) of sugarcandy. Likewise, here also in one tulā of jaggery four palas of pippalī powder should be added. As regards trisugandha, it should be taken in quantity of two palas as is cyavanaprāśa caturjata is taken in quantity of one pala.[8] The

1. चत्वारि लवणानि सामुद्रवर्जम्। CK.
2. अत्र जलमानमपि चूर्णचतुर्गुणं देयम्। CK.
3. मूलकशुण्ठकानां.....भस्मनो द्रोणं.....अष्टगुणे तोये पक्त्वा चतुर्थांशशेषितं.....तावत् पक्तव्यं यावत् घनं.....स्यात्। यस्तु क्षारोदकं पक्त्वा घनीभूते क्षारद्रव्यादिकं प्रक्षिप्य गुडिकां कृत्वा व्यवहरति, तदसंगतम्, तत्सलिलेन साध्यमालोड्येति वचनात्। GD.
4. सर्वं सलिलेन चतुर्गुणेन आलोड्य.....मूलकशुण्ठकभस्मस्रावितोदकेन सर्वमालोड्य वा। JN.
5. अर्धपलाभिवृद्धिश्च इह गुडनागराभ्यां ज्ञेया, अन्यथा केवलार्द्रकवृद्ध्या.....भूरिमात्रतयाऽग्निवधादिदोषकारकं स्यात्। अर्धपलादारभ्य प्रतिदिनमर्धपलवृद्ध्या दशभिर्दिनैः पञ्चपलं भवति। CK.
6. पूर्वयोगवदर्धपलाभिवृद्धिः गुडयुक्तत्वं चेत्यादि सर्वं तथैवेति पदेन गृह्यते। CK.
7. द्विपञ्चमूलस्येत्यादौ कंसः क्वाथो भवति, तावन्मानं दशमूलं चतुःषष्टिपलं ग्राह्यम्। अन्ये तु "द्विपंचमूलस्य तुलाकषाये कंसोऽभयानां च
8 व्योषत्रिसौगन्ध्ययोः मानानिर्देशेन अन्यत्र लेहान्तरोक्तचूर्णमानानुसारेण मानं ज्ञेयम्। अगस्त्यहरीतक्यां गुडतुलायां पिप्पलीचूर्णपलचतुष्टयमुक्तं, तथा च्यवनप्राशे मत्स्यण्डिकार्ध तुलायां पिप्पलीचूर्णपलद्वयमुक्तं, तद्वदिहापि गुडशते व्योषस्य कटुद्रव्यस्य पलचतुष्टयम्। तथा च्यवने चातुर्जातकस्य गन्धार्थस्य पलमुक्तं तदनुसारेणेह द्विपलं त्रिसौगन्ध्यम्। CK.

word 'kiñcit' in relation to yāvaśūka should be interpreted as half the quantity of śuṇṭhī etc. Others take it as karṣa. Jatūkarṇa takes trisugandha each one karṣa and trikaṭu and yavakṣāra each one pala.[1]

GD relates 'prasthārdhamātra' with both vyoṣa etc. and madhu and thus takes powder of trikaṭu and trisugandha combined half prastha one pala and ten māṣa. He also takes 'kiñcit' *as* 'karṣa'. GD criticises Ck in this respect.[2]

JN relates 'kiñcit' with all of them-trikaṭu, trisugandha and yāvaśūka and takes it as one karṣa.[3]

53-54. Here drugs are three pala, they should be boiled in eight times water reduced to one-fourth e.g. six pala.[4]

55-57. Some read as 'bilvāt palam'. In this case, bilva is taken one pala and other drugs one karṣa.[5]

64-67. 'Gandha' means 'aromatic drugs of agurvādi gana'.[6] JN interprets as 'uśīra' etc.[7]

75. In the first half of the verse, the disorder described is cause by tridoṣa and is named 'śiraḥśotha'. In other texts, it is known as 'upaśīrṣaka'.[8] JN says that in kaṇṭhaśālūka, there is predominance of kapha as mentioned in Suśruta.[9]

76. In biḍālikā, tridoṣa is the originating cause with predominance of raktapitta.[10]

GD and JN accept the reading "śvasanocchvasograḥ" instead of "śvasanāsu cograḥ".

87. In spite of having slight difference arbuda should be treated like granthi.[11]

---

1. किञ्चिच्छब्दस्याल्पवचनत्वादत्रोक्तनागरादिचूर्णादर्धमानं यावशूकस्य ज्ञेयम्। केचित्तु किञ्चिच्छब्दं कर्षपर्यायं वदन्ति, तन्त्रान्तरप्रत्ययात्। जतूकर्णसंवादात् त्रिसौगन्ध्यस्य प्रत्येकं कर्षमानत्वं, त्र्यूषणयवक्षाराणां तु प्रत्येकं पलम्। CK.
2. व्योषं त्रिसौगन्ध्यचूर्णं मिलित्वा प्रस्थार्धमात्रं प्रत्येकं दशमाषकाधिकपलमानं, यावशूकात् किञ्चिच्च कर्षमानम्।.....यस्त्वेनां कंसहरीतकीं व्याख्याय प्रतिसंस्कृत्य दशमूलीहरीतकीतिनाम्नोक्ता तत्र प्रमादेन व्योषादीनां प्रस्थार्धमात्रमित्यनेन अन्वयं न बुद्ध्वा तेषां मानमनुक्तं मत्वा पलादिमानं मानानुक्तेरुक्तम्। GD.
3. तत्र व्योषं त्रिकटुचूर्णं किञ्चित् कर्षम्।.....त्रिसौगन्ध्यचूर्णञ्च किंचित् यावशूकात् चूर्णादपि यवक्षारचूर्णादपि किञ्चित् कर्षम्। JN.
4. पटोलमूलेत्यादौ क्वाथ्यद्रव्यपलत्रयमष्टगुणजलपरिभाषया क्वथनीयं, ततश्चतुर्भागावशेषेण षट्पलमानः कषायो भवति। CK.
5. सचित्रकेत्यादौ केचित् "बिल्वात् पलं" इति पठन्ति। तन्मते बिल्वं पलमानं, शेषं तु कार्षिकम्। CK.
6. गन्धैरगुर्वादिभि:। CK.
7. गन्धैरुशीरादिभि:। JN.
8. शिरसः सुघोरमित्यत्र लक्षणं त्रिदोषकृतं, नाम च "शिरःशोथ"-इति विज्ञेयं, तन्त्रान्तरेऽयं "उपशीर्षक" इत्युक्तः। CK.
9. ते एव दोषाः कफोल्वणाः सुश्रुते कफसम्भवत्ववचनात्.....शालूकं नाम शोथं कुर्वन्ति। JN.
10. बिडालिकायां त्रिदोषाश्रयः कारणत्वेनानुवर्तते।.....इयं च त्रिदोषजाऽपि रक्तपित्ताधिका ज्ञेया। CK.
11. अविशेष इव अविशेष इह ज्ञेयः।.....तस्मात् स्तोकविशेषे सत्यपि स्रावाद्यविशेषाद् ग्रन्थिविशेषचिकित्सैवातिदिश्यतेऽर्बुदे। CK.

88-90a. Here vidārikā has been said as from kapha and vāta but in Suśrutasaṃhitā it is tridoṣaja and as such it should be taken as tridoṣaja having more kapha and vāta and less pitta.[1]

GD reads 'samūlā' instead of 'saśūlā' and intreprets it as 'that which does not move on pressure'.[2]

94-95. The raktaja type of bradhna described by Suśruta should be included in pittaja one.[3]

GD and JN read 'vrddha' instead of 'bradhna'.

99-100. The word 'raktapāka' means having 'pāka of rakta' and not 'pāka with red colour'.[4]

1. विदारिकेह कफवाताभ्यामुच्यते, सुश्रुते विदारिका "सर्वजां सर्वलक्षणा" इति पठिता, तेनेहापि कफवाताधिका हीनपित्ता च विज्ञेया। CK.
2. समूला न या चलति प्रपीडनेन सा समूला पिडका। GD.
3. सुश्रुते तु रक्तजोऽपि ब्रध्न उक्तः। स इह पित्तजे एवान्तर्भावनीयः। CK.
4. रक्तस्य पाकेन युक्तं रक्तपाकं, न तु रक्तवर्णमात्रम्। CK.

CHAPTER XIII

9-11. 'Agnidoṣa' here means 'agnimāndya (sluggishness of digestive fire) as the same aggravates three doṣas and thereby causes udararoga.[1] 'Mala' means vāta etc. as well as faeces etc.[2] 'Malina' means 'that which causes impurity such as incompatible food etc.[3]

GD interprets 'malina' (as dirty) such as śaka etc.[4] JN, in this respect, follows CK.[5]

16-19. Ck informs of a textual variation e.g. "baddhodāvartahetukā" instead of "rūkṣodāvartahetukā".[6].

20-22. In verse 20 pathogenesis is described of four doṣaja types and that described earlier is generally for all the udararogas- thus say some commentators. Others say that it is only to add the involvement of channels carrying sweat and body-fluid and as such should not be taken as repetition.[7]

GD commenting on v.22, says that the word 'plīha' includes yakṛt also and as such the number (eight) of types is not tṛansgressed.[8]

23-25. In vātodara kapha is subsidiary.[9]

26-28. Here also vāta and kapha are subsidiary and pitta is chief. It destroys dhātvagni in other places and then affects the digestive fire in āmāsaya.[10]

35-38. Enlargement of spleen is of two types-one by displacement due to pressure etc. and the other due to increase in blood.[11]

---

1. अग्निदोषोऽत्राग्निमान्द्यमेव विवक्षितं, तस्यैवेहोदरकारणदोषत्रयकर्तृत्वमुक्तम्। CK.
2. मला वातादयः पुरीषादयश्च। CK.
3. मलिनैरिति दोषकारकैर्विरुद्धाहारादिभिः। CK.
4. मलिनैः शाकाद्यैः। GD.
5. मलिनैः मलकरैः अपथ्यैः। JN.
6. "रूक्षोदावर्तहेतुका"-इत्यत्र "बद्धोदावर्तहेतुका" इति वा पाठः। CK.
7. रुद्ध्वेत्यादिना चतुर्णां दोषजन्यानामुदराणां सामान्यात् संप्राप्तिमाहः, "पूर्वं या संप्राप्तिरुक्ता सा सर्वोदराणाम्" इत्येके वदन्ति। "रुद्ध्वेत्यादिना पूर्वं संप्राप्त्यनुक्तस्य स्वेदाम्बुवाहिस्रोतोदुष्टिरूपस्याभिधानादपौनरुक्त्यम्" इत्यन्ये। CK.
8. प्लीहशब्द इह यकृदुपलक्षक इति नाष्टत्वहानिः। GD.
9. अत्र कफस्याप्राधान्यम्। CK.
10. अत्रापि अनिलकफावप्रधानौ, पित्तं तु प्रधानम्। निहन्त्यामाशये वह्निमित्यनेन स्थानान्तरस्थधात्वग्निवधं कृत्वा। CK.
11. प्लीहवृद्धिर्द्विविधा-संक्षोभादिच्युतस्य वा वृद्धिः, अच्युतस्य वा शोणितवृद्ध्या वृद्धिर्भवति। CK.

'Ādi' in 'rasādi' denotes māṃsa etc. also which indicates increase of blood by diet and movements.[1]

The enlargement of spleen due to displacement is of four types caused by vāta etc. and with that caused by increased blood it comes to five.[2]

GD and JN read "atyāšitasya" instead of "ašitasyāti" (v.35).

39-41. All the five causes produce only one disorder e.g. obstruction in anal passage and not different five types.[3]

42-44. Ck informs of a textual variation "udakodarasya doṣāṇāṃ ca" instead of "yathābalaṃca doṣāṇām".

45-49. 'Picchā' (slim) appears before water collects. Picchā is like gummy exudation. Others take it as similar to scum of boiled rice.[4]

The word 'acikitsya' excludes severe measures like application of poisons, surgical operation etc.[5]

50-51. Baddhaguda, dakodara and chidrāntra are mostly incurable but are sometimes cured with treatment applying poison and surgical interference.[6]

59-67. The word 'mārga' here means 'mukha' (opening).[7]

72-73. 'Višuddha' means (purified) without emesis as it is contra-indicated in udararoga.[8] 'Cūrṇāyaskrti' means 'iron preparations mixed with powders (such as navāyasa) or it may mean cūrṇa and ayaskrti separately.[9]

75-89a. The symptoms of (vitiated) blood should be known as mentioned in

1. शोणितं वा रसादिभ्य इति अत्रादिशब्दः प्रकारवाची, तेन रसस्य कारणस्य वृद्ध्या कार्यस्य रक्तस्य वृद्धिस्तथा मांसादिभ्योऽपि रक्तवृद्धिर्भवति, तेनाहारविहारेभ्यो रक्तवृद्धिरुक्ता भवति। CK.
2. प्रथमं या च्युतस्य वृद्धिरुक्ता सा वातादिसन्निपातत्वेन चतुर्विधा ज्ञेया, तेन रक्तजप्लीहवृद्ध्या समं पञ्च प्लीहदोषा ये उक्तास्ते संगता भवन्ति। CK.
3. पक्ष्मबालैरित्यादिना अनेकहेतुकृतो गुदनिरोधः, तेन गुदनिरोधकत्वरूपेणैकरूपमेव बद्धगुदोदरं जनयति। तेन पक्ष्मादिगुदनिरोधहेतुपञ्चकजन्यत्वाद् बद्धगुदोदराणां पंचत्वं नोह्यम्। CK.
4. अत्र जलजन्मपूर्वरूपं पिच्छोत्पद्यते।.....पिच्छासदृशो भागः पिच्छा, अन्ये तु भक्तमण्डसदृशीं पिच्छामाहुः। CK.
पिच्छासदृशो भागः पिच्छा, पिच्छा शाल्मलिनिर्यासः। JN.
5. अचिकित्स्यमिति विषप्रयोगशस्त्रप्रणिधानादिदारुणकर्मव्यतिरिक्तक्रियया अचिकित्स्यम्। CK.
6. जातोदकं छिद्रान्त्रं च प्रायो विनाशाय भवति कदाचिद् विषशस्त्राभिमतचिकित्सया जातोदकं छिद्रं बद्धगुदं च सिध्यतीति प्रायःशब्देन दर्शयति। CK.
7. स्रोतोमार्गनिरोधनादिति स्रोतोमुखनिरोधनादित्यर्थः। मार्गशब्दोऽत्र मुखवाची। CK.
स्रोतोमार्गनिरोधनं स्रोतोद्वारनिरोधः। JN.
8. विशुद्धमित्यत्र वमनं विना विशुद्धो ज्ञेयः, वमनस्योदरे निषिद्धत्वात्। CK.
9. चूर्णयुक्ता अयस्कृतयः चूर्णायस्कृतयः.....किंवा चूर्णान्यत्रैव वक्ष्यमाणानि, अयस्कृतयस्तु रसायनोक्तलोहप्रयोगे ज्ञेयाः। CK.

vidhišonitīya chapter (Su. ch. 24) and other texts.[1] Pippalī here means 'vardhamāna pippalī' as in rasāyana.[2]

Kṣāras and ariṣṭas refer to those mentioned in grahaṇī roga and arša or here itself.[3] 'Dīpanīya' means the drugs mentioned in pippalyādi gaṇa.[4]

GD reads "dīpanīyarasānvitaiḥ" instead of "dīpanīyasamāyutaiḥ" (v.88) and interprets as appetising rasas such as sour, bitter and pungent.[5] JN interprets it as 'processed with dīpanīya dravyas'.[6]

89b-93a. Though non-unctuous enema is contra-indicated in baddhodara, chidrodara and dakodara, it is prescribed with unctuous enema because the disease in such condition is amenable only to this treatment.[7]

111-112a. Some read 'snehanīyāni" instead of "dīpanīyāni".[8]

112b-116a. Ck says that word 'dvi' (V.113) relates to both 'ardhapalika' and 'prastha' thus the former would mean one pala and the latter two prasthas. In Kaṣhmir recension, there is explicit mention of one pala of each drug.[9]

GD, however, takes half pala of each drug while JN takes one pala.[10]

116b-118a. The quantity of yavakṣāra should also be as that of citraka.[11]

138b-140. As liquid for cooking ghee is not mentioned water should be taken. Or it may be cooked with the butter-milk produced in the process.[12]

---

1. तत्र रक्तस्य लक्षणानि विधिशोणितीयोक्तानि, तन्त्रान्तरे.....इत्यादीनि ज्ञेयानि। CK.
2. पिप्पलीर्वा प्रयोजयेदिति रसायनोक्तपिप्पलीवर्धमानं प्रयोजयेत्। CK.
3. क्षारारिष्टगणानिति ग्रहण्यर्शोवक्ष्यमाणक्षारारिष्टसमूहान् , इहापि च विडंगमित्यादिना क्षारं, तथा रोहीतकलतेत्यादिनाऽरिष्टं च वक्ष्यति। CK.
4. दीपनीयसमायुतैरिति पिप्पल्यादिदीपनीयगणसंस्कृतैः। CK.
5. दीपनीयरसैरम्लतिक्तकटुकैः। GD.
6. दीपनीयरसान्वितैः दीपनीयद्रव्यैरुपसंस्कृतैः। JN.
7. बद्धच्छिद्रदकोदरिणां च यद्यप्यास्थापनं निषिद्धं, तथाऽपि तदेकसाध्यायामवस्थायां निरूहानुवासनमिह ज्ञेयम्। CK.
8. "दीपनीयानि" इत्यत्र केचित् "स्नेहनीयानि" इति पठन्ति। CK.
9. द्विशब्दः प्रस्थेन तथाऽर्धपलिकैरित्यनेन च योज्यः। एतेन पिप्पल्यादीनां द्विरिति द्विगुणार्धपलैः षट्पलानि भवन्ति, प्रस्थेन च द्विशब्दयोजनाद् घृतप्रस्थद्वयं भवति। काश्मीरे तु "पलिकै पिप्पलीक्षरैर्द्विप्रस्थं सर्पिषः पचेत्" इत्येव पठ्यते। CK.
10. पिप्पल्यादिभिः कल्कैः प्रत्येकमर्धपलिकैः। GD.
    द्विः अर्धपलिकैः द्विगुणार्धपलैः एकपलिकैरित्यर्थः। JN.
11. यवक्षारस्यापि चित्रकवत् पलं देयम्। CK.
12. तत्र प्रथमे घृते द्रवानुक्ते जलेन किंवा प्रकृतदधिमथितेनोद्घृतघृतेनैव पाकः। CK.

CHAPTER XIV

4. 'Prakopa' here means 'origin of disease.'[1]

5. 'Bīja' here is 'sperm and ovum' that when affected by the genetic factor initiating the anal folds becomes cause of the congenital piles. The seed which initiates the body other than anal folds is not affected and as such does not cause any other disorder.[2] 'Apacāra' means unwholesome diet and movements which particularly vitiate the portion of sperm and ovum.[3]

GD takes 'bīja' as ārtava.[4]

14-16. The words 'usṇa' (in v.15,16) denote 'hot in touch' and 'hot in effect' (uṣṇavīrya) respectively.[5] There is also textual variation as "kaṭvamlalavaṇakṣāra" instead of "kaṭūṣṇalavaṇakṣāra".

GD reads "kaṭūṣṇalavaṇāṇnāni". JN reads "katvamlalavaṇakṣāra" and interprets 'uṣṇa' both as in contact and effect.[6]

33-37. Surgical operation should be performed properly only by the trained surgeon.[7]

38-61. The piles predominant in vāta and kapha are called dry as there is association of slimy discharge and not bleeding.[8]

In Caraka rakta has not been mentioned as a causative factor like tridoṣa and as such vitiation of rakta should be taken as that of pitta, but Suśruta has mentioned causation of rakta separately and also one of the types based on it.[9]

---

1. प्रकोपस्य रोगोत्पादस्य हेतुः, तथा ह्यत्र प्रकोपशब्देन रोगोत्पादं वक्ष्यति। CK.
2. बीजमिह शुक्रशोणितम्। तच्च गुदवल्यारम्भकेण बीजेनोपतप्तं सत् सहजानां कारणं भवति। गुदवल्यारम्भकेण च दुष्टेन बीजेन शरीरारम्भकस्य बीजस्यायमेवोपतापो यत् स्वयमदुष्टस्य दुष्टेन संबन्धः। ततश्च गुदवलीबीजदोषात् गुदवलीस्वेवार्शोजन्म भवति, शेषावयवारम्भकं बीजमदुष्टत्वान्न विकारं जनयति। CK.
3. अपचार इति अनुचिताहारविहाररूपः शुक्रशोणितभागविशेषदूषकः। CK.
4. गुदवल्यारम्भकार्तवभागस्य बीजस्योपतप्तम्। GD.
5. कटूष्णेत्यादौ प्रथममुष्णपदमुष्णस्पर्शोपदेशार्थं, द्वितीयमुष्णपदमुष्णवीर्योपदर्शनार्थनार्थम्। CK.
6. उष्णमुष्णस्पर्शमुष्णवीर्यञ्च। JN.
7. शिक्षितेनैव शस्त्रकर्म विधानतः कर्त्तव्यम्। CK.
8. वातश्लेष्मोल्वणानीत्यत्र यद्यपि कफजे स्राव उक्तः, तथाऽपि स पिच्छारूपानुबन्धः न तु रक्तस्रावः, तेन शुष्कार्शोग्रहणं, पिच्छास्रावस्तु शुष्कार्द्रकारणमेलकेऽपि भवति। CK.
9. यद्यपि पञ्चात्मा मारुतः पित्तमित्यादौ रक्तं नोक्तं तथापि समानप्रकोपणतया पित्तप्रकोपेणैव तत्प्रकोपोऽप्युन्नेयः। सुश्रुतस्तु दोषवद् रक्तस्यापि पृथक् जनकत्वमाह।.....वस्तुतस्तु तदाश्रितदोषैर्जातत्वेन दोषजत्वेनैव संग्रहात् अस्मत्तन्त्रे रक्तजानां न पुनः पृथग् वचनम्। JN.

62-71. Bhallātaka powder should be taken one tenth of saktu (parched grain flour). Others take equal quantity of both to be used in small quantity.[1]

72-75. Interpreting "vyaktāmlakaṭukaṃ" Ck says that it is "vyaktāmlaṃ" and "kaṭu" because after fermentation acidity is manifest and not pungency.[2] In the formulation, quantity of powder and butter-milk is the same as in takrāriṣṭa of grahaṇīcikitsā.[3]

GD reads as "vyaktāmlaṃ kaṭukaṃ."

76-88. In the case where digestive fire is too mild, only butter-milk should be given in morning as well as in evening. On gradual improvement of agni, the evening meal should consist of avalehikā, peyā, odana and yūṣa (or māṃsarasa) mixed or processed with butter-milk while the morning diet would consist of butter-milk only.[4] The three types of butter-milk should be used in kapha-pitta-vāta (doṣa), mildest-milder-mild(agni) and inferior-medium-superior (strength) respectively.[5] 'Śatam' (v. 88) means 80 vātika and 20 kaphaja disorders.[6]

GD interprets it differently. He divides it according to doṣa and agnibala (power of digestion) such as fatless butter-milk should be given in case of predominance of kapha and mildest digestion; that with 50% fat should be given in predominance of vāta-kapha and slightly mild digestion and that with full fat should be given in predominance of vāta and where digestion is not mild.[7]

JN follows Ck.

89-96. 'Grāhī' means' ten drugs in purīṣasaṅgrahaṇīya group[8] (see Su.ch.4).

GD takes from 'grāhī' the drugs such as bilva and pāṭhā etc.[9]

JN follows GD.

1. भल्लातकचूर्णस्य सक्त्वपेक्षया दशमो भागः;.....अन्ये तु तर्पणभल्लातकचूर्णयोः समानयोः स्तोकस्य प्रयोगमाहुः । CK.
2. व्यक्ताम्लं कटु चेति व्यक्ताम्लकटुकं, न तु कटुत्वमपि व्यक्तमत्र, सन्धानेन व्यक्तकटुतानुत्पादात्। CK.
3. तक्रारिष्टे तु ग्रहणीचिकित्सायां.....इत्युक्ततक्रारिष्टानुसारेणेहापि तक्रचूर्णमानव्यवस्था। CK.
4. पूर्वाह्ने तक्रमेव केवलं पेयं, .तत्रात्यर्थंमृद्वग्निना सायमपि तक्रमेव सेव्यम्।.....किंचित् प्रवृद्धेऽग्नौ प्रातस्तक्रमेव पेयं, सायं तु लाजसक्तूनां तक्रयुक्ताऽवलेहिका देया। ततस्तु क्रमेणाग्नौ वृद्धे तक्रपेया तक्रौदनं तक्रसंस्कृतयूषादिभोजनानि सायं देयानि, प्रातस्तु तक्रमेव, सप्ताहादिस्तक्रकालो ज्ञेयः । CK.
5. रूक्षमित्यादिनोक्तं त्रिविधं तक्रं कफपित्तवातेषु दोषेषु, मन्दतम-मन्दतर-मन्देष्वग्निषु, बलेषु चाधममध्यमोत्तमेषु यथासंख्यं ज्ञेयम्। CK.
6. शतमिति विंशतिः श्लेष्मविकाराः, अशीतिर्वातविकारा इति मिलित्वा विकाराणां शतम्। CK.
7. रूक्षं तक्रं कफोल्वणेऽत्यर्थमन्दानले, अर्धोद्धृतस्नेहं वातकफोल्वणे किञ्चिन्मन्दानले, अनुद्धृतघृतं वातोल्वणे मन्दानलाभावे प्रयोजयेत्। GD.
8. ग्राहिभिर्युतमिति वर्चोग्राहिदशसंस्कृतम्। CK.
9. ग्राहिभिर्बिल्वशलाटुपाठादिभिः । GD.

103-118. In cavyādi ghrta (v. 105), jaggery and alkali should be added after the ghee is cooked.[1]

JN has interpeted both ways-before or after cooking.[2]

In v. 103, JN says that here ghee is not to be cooked and criticises GD who has read 'sādhayet' instead of 'dāpayet' and thus has advocated cooking of ghee. Ck comments that some take ghee as uncooked which means that generally it is taken as cooked.[3]

130-134. In pippalyādi taila (v. 131-132) some, on the basis of other texts, take water also as four times but it is not correct because the latter is a diferent formulation.[4]

GD clarifies it that milk two times and water equal to that should be given making the liquid four times in total.[5]

135-136. The word'ānuvāsanika' here means 'the drugs pippalī etc.' (v. 131) and not the ten drugs enumerated in the context of mahākaṣāyas (su. ch. 4). To eliminate it, the epithet 'dārvantaih' has been given.[6]

GD reads the other version (dārvantairauṣadhairdehyāḥ stabdhāḥ śūnāḥ guderuhāḥ) but interprets the word "dārvyā"[7] which is mentioned as another version in nirnayasagar edition. JN has accepted the latter version.

137. 'Dāśamūlika' means 'added with decoction of daśamūla'.[8]

138-169. By 'triphalā' (v. 145) should be taken the combined one in quantity or three palas.[9] In 'harītakī etc. (v. 148), the fruits of harītakī should be taken as devoid of seeds, thus it comes to the quantity of half prastha. However, Jatūkarṇa has read this in double quantity.[10]

GD takes each of the triphalā drugs in quantity of three pala.[11] He also takes one

1. घृते सिद्धे गुडादीनां प्रक्षेप्यत्वं ज्ञेयम्। CK.
2. सिद्धं.....गुडक्षारसमन्वितं गुडक्षारप्रक्षेपयुक्तं वा। JN.
3. इह अपक्वमेव घृतम्।.....चक्रपाणिरपि अपक्वमेव केविद् घृतमिच्छन्ति इति व्याचष्टे। इत्थं च जल्पकल्पतरुकार: दापयेदित्यत्र साधयेदिति पठित्वा यत् पिप्पल्यादिकल्कैर्घृतस्य पाकमाह तच्चिन्त्यम्। JN.
पिप्पलीनागरेत्यादौ अपक्वमेव केचिद्घृतमिच्छन्ति। CK.
4. पिप्पलाद्ये तैले केचित् तन्त्रान्तरदर्शनात्तोयमपि चतुर्गुणं वदन्ति, तन्न, तन्त्रान्तरोक्तं योगान्तरमेव पश्याम:। CK.
5. द्विगुणक्षीरसंयुतं द्विगुणजलञ्च तैलं विपक्तव्यम्। GD.
6. आनुवासनिकैरिति अनुवासनतैलसाधनार्थमुक्तै: पिप्पल्यादिभि:। षड्विरेचनशताश्रितीयोक्तानुवासनोपदर्शककषायग्रहणप्रतिषेधार्थं दार्वन्तैरिति विशेषणं, तेन दार्वन्तेनोक्तान्येव गृह्यन्ते। CK.
7. दर्व्या दण्डविशेषेण। GD.
8. दाशमूलिकमिति दशमूलकषाययुतम्। CK.
9. त्रिफलाया इति मिलितत्रिफलाया एव पलत्रयं, निर्देशस्य मानप्रधानत्वात्। CK.
10. हरितकीत्यादौ फलशब्देन निरस्थिहरीतकीं ग्राहयति, तेन हरितकीप्रस्थार्धं, किन्तु जतूकर्णेऽयं योगो द्विगुणमानेन पठित:। CK.
11. त्रिफलाया: प्रत्येकं दलानां त्रिपलं दापयेत्। GD.

prastha of deseeded harītakī fruits.[1]

JN follows, in the former case, Ck and, in the latter, GD.[2]

185-192. In kuṭajādi rasakriyā (v. 188-192), kuṭaja bark is one tulā (100 palas), this should be boiled in water one drona reduced to one-eighth.[3]

GD reads 'ardharasam', instead of 'gatarasam', thus takes the decoction reduced to only one-half.[4]

The word 'ubhayabhāga' denotes either upward or downward type because both appearing simultaneously is incurable.[5]

193-198. GD reads 'kuṭajaphalakalka' instead of 'kuṭajaphalavalka'. He interprets 'sadāḍimarasa' as 'with decoction of pomegranate fruit-rind.'[6]

JN reads 'tvak' instead of 'valka' thus making no differe ce in sense. He takes decoction of the root of ḍādima plant.[7]

199-211. By 'navanītaghrta' (v. 211), some take goat's butter and ghee as she-goat is haemostatic in nature.[8]

JN reads "sapayo māṃsaṃ' instead of "māṃsaṃ and interprets both milk and meat of goat.[9]

222-223. Ghee is called as avapīḍaka which is taken after meal or in large quantity.[10]

GD interprets it as that prepared with decoctionand paste of bark of vaṭa etc.[11]

JN interprets it, on the authority of Vāgbhaṭa, ghee used in avapīḍaka way e.g. before as well as after meals in large quantity.[12]

---

1. हरीतकीफलस्यास्थिरहितस्य प्रस्थम्। GD.
2. हरीतकीविभीतकामलकानां.....मिलितानां त्रिपलं दापयेत्। JN.
   हरीतकीफलानां निरस्थीकृतानां प्रस्थम्। JN.
3. कुटजत्वच इत्यादौ पलशतं तुला, जलद्रोणेन साध्यम् , अष्टभागावशेषः कषायो ग्राह्यः। CK.
4. यावदर्धरसमर्धद्रोणावशिष्टम्। GD.
5. उभयभागरक्तपित्तस्यासाध्यत्वादुभयभागशब्देन केवलोर्ध्वगं केवलाधोगं चेष्यते। CK.
6. सदाडिमरसं दाडिमफलत्वक्क्वाथचतुर्गुणम्। GD.
7. दाडिममूलक्वाथे चतुर्गुणे। JN.
8. अन्ये तु नवनीतं घृतं च छागं वदन्ति, यतो अजा रक्तस्तम्भनात्मिका प्रोक्ता। CK.
9. छागं मांसं दुग्धं च। JN.
10. अवपीडकसर्पिः भोजनस्योर्ध्वं यत् पीयते, किंवा भूरिमात्रं सर्पिरवपीडकमुच्यते। CK.
11. अवपीडकद्रव्यैः वटादिवल्कलैः क्वाथकल्कैः पक्वसर्पिर्भिः। GD.
12. अवपीडकयोजनया प्रयुक्तैः सर्पिर्भिः। अवपीडकं भक्तभोजनात् प्राक् ह्यस्तने अन्ने जीर्णे च उत्तमया मात्रया योजनाद्व्यम्। JN.

CHAPTER XV

1-2. 'Grahaṇīdoṣa' means 'defect of agni situated in grahaṇī', thus because of identity of substratum and dependent factor 'grahaṇīdoṣa' also denotes defect of agni.[1]

Ck says grahaṇidoṣa as a product of piles but JN takes them as mutually causative.[2]

3-4. Before dealing with disorder of agni, the functions of normal dehāgni are mentioned as knowledge of physiology should precede that of pathology.[3]

While interpreting Ck has defined the terms (v. 3) such as-'āyus' as continuance of consciousness, 'varṇa' (complexion) as fair etc., 'bala' as power inferable from exercise etc., 'utsāha' as making effort even in hard works, 'upacaya' as development of body, 'ojas' as essence of all dhātus situated in heart, 'tejas' as body-heat or semen, 'agni' as five bhūtāgnis and seven dhātvagnis and prāṇa as five types of vāyu or prāṇa alone. Dehāgni is the chief agni situated in abdomen (jāṭharāgni).[4]

GD interprets 'agnayaḥ' as 'dhātvagni' only.[5]

JN has interpreted the terms more or less, on Ck's line.[6]

6-8. Samāna vāyu, if normal, kindles the fire otherwise makes it irregular. These liquid etc. assist the fire in its function.[7]

GD and JN read "udīryyaḥ parvanena tu" and "audaryaḥ pavanena tu" instead of "udaryaḥ pavanodvahaḥ."

9-11. In the preceding verses gross digestion has been described, now the process

---

1. ग्रहणीमाश्रितोऽग्निदोषो ग्रहणीदोषः एवं चाश्रयाश्रयिणोरभेदोपचारात् ग्रहणीदोषशब्देन ग्रहण्याश्रितोऽग्निदोषोऽपि गृह्यते। CK.
2. अर्शःकार्यत्वाद् ग्रहणीदोषस्य। CK.
   अर्शोतिसारग्रहणीविकाराणामन्योन्यहेतुभूततया। JN.
3. प्रकृतिज्ञानानन्तरत्वाद् विकृतिज्ञानस्य प्रथमं तावदविकृतस्याग्नेः रूपमाह। CK.
4. आयुः चेतनानुवृत्तिः, वर्णः गौरादिः, बलं शक्तिः व्यायामाद्यनुमेया,.....उत्साहः दुष्करेष्वपि कार्येष्वध्यवसायः, उपचयः देहपुष्टिः, ओजः हृदयस्थं सर्वधातुसाररूपम् , तेजः देहोष्मा शुक्रं वा.....अग्नय इति भूताग्नयः पंच, धात्वग्नयः सप्त इति द्वादशाग्नयः, प्राणा इति प्राणापानोपलक्षिताः पंचापि वायवः, किंवा प्राणवायुरेव,.........। देहाग्निहेतुका इति देहपोषकप्रधानजाठराग्निकारणकाः। CK.
5. देहाग्निर्जाठराग्निः....., अग्नय इति धात्वग्नयः। GD.
6. वर्णः गौरादिः भौतिकः, स्वास्थ्यमारोग्यम् , उत्साहः अनालस्यम् , उपचयः पुष्टिः.....तेज ऊष्मा। JN.
7. अयं च समानः प्राकृतत्वाद् बाह्यो वायुरिव अग्नेः संधुक्षणो भवति न वैषम्यकरः, विकृतस्तु वैषम्यं करोति। .....एते च द्रवादयः, पाचकस्याग्नेः सहायाः भवन्ति। CK.

of subtle digestion is described.[1]

'Prapāka' means 'initial digestion'.[2] Ck informs of a variant "madhurāt prāk" of "madhurādyāt" 'Vidagdha' is the intermediate stage between digested and undigested e.g. semi-digested.[3] Ck interprets 'accha' as 'non-solid'.[4] The word 'śoṣyamāṇasya' indicates that the effect of fire is not so downwards as upwards.[5] This is known as 'avasthāpāka' (stage-wise digestion) of food.[6]

The question arises that if the six rasas produce kapha etc. during avasthāpāka then it goes against vipāka because avasthāpāka may interfere with it, the answer is that it is not so. Avasthāpāka does not hamper the niṣṭhāpāka rather both perform their own functions. The difference is that madhura etc. produce more kapha whereas in case of kaṭu etc. it would be less. Moreover, vipāka takes place at the time of division of rasa and mala and is thus different from avasthāpāka temporally too.[7] Others say that kapha etc. do not arise generally during avasthāpāka from food having six rasas but the manifest madhura rasa, in initial digestion, produces kapha and so amla and kaṭu produce pitta and vāyu.[8]

Others, however, maintain that such transformation is not caused by agni but specific impact of location of kapha etc.[9]

The view that in avasthāpāka kapha and pitta are only agitated and not aggravated as aggravation takes place only in niṣṭhāpāka does not seem to be reasonable. In fact, these dosas are aggravated by avasthāpāka and are transformed into mala after niṣṭhāpāka.[10]

---

1. एवं स्थूलपाकक्रममभिधाय अवान्तरमणुपाकक्रममाह। CK.
2. प्रपाकत इति प्रथमपाकतः, प्रशब्द आदिकर्मणि। CK.
3. विदग्धस्येति पक्वापक्वस्य। CK.
4. अच्छमिति अघनम्। CK.
5. शोष्यमाणस्य वह्निनेति यद्यप्यूर्ध्वदाहक्षमो वह्निः, तथाप्यस्याधोगतस्य वह्निना शोष्यमाणत्वं पक्वाशयगतस्याप्युपपन्नम्। यतश्चाधोगमने सम्यग् वह्निव्यापारो नास्ति, अतः "पच्यमानस्य" इति पदं परित्यज्य "शोष्यमाणस्य" इति कृतम्। CK.
6. एवमीदृशः षड्रसस्याहारस्यावस्थापाको भवति। CK.
7. ननु यद्यत्रावस्थापाकवशात् षण्णामेव रसानां कफादिकर्तृत्वमुच्यते, तदा - " कटुतिक्तकषायाणां विपाकः प्रायशः कटुः" इत्यादिना यो विपाक उच्यते, स विरुध्यते, अवस्थापाकेनैव बाधितत्वात्। मैवं, न ह्यवस्थापाकोऽयं रसस्वभावं निष्ठापाकं बाधते, किन्त्ववस्थायां स्वकार्यं करोति, तेन रसादयोऽपि स्वकार्यं कुर्वन्ति, अवस्थापाकोऽपि स्वकीयं कार्यं करोति.....अयन्तु विशेषः - यन् मधुराख्यस्यावस्थापाकस्य मधुरादयः श्लेष्मजनकाः रसाः अनुगुणाः भवन्ति तदा स बहुश्लेष्माणं जनयति, यदा त्ववस्थापाको विपरीतकटुकादिपरिगृहीतो भवति तदा स्तोकमात्रं कफं जनयतिः एवं पित्तजनकेऽवस्थापाकेऽपि वाच्यम्।.....विपाकस्तु रसमलविवेक समकालो भिन्नकाल एवावस्थापाकैः सममिति न विरोधः। CK.
8. अन्ये त्वाहुः-न षड्रसादप्यन्नात् सामान्येनावस्थापाके कफाद्युत्पत्तिः, किन्तु षड्रसादन्नात् प्रथमे पाके मधुरोऽयमुद्भूतो रसः स कफं जनयति, तथा पित्तं विदाहावस्थायामुद्भूतादम्लरसादुत्पद्यते, एवं वायुरपि आहारकटुतावस्थायां भवतीति। CK.
9. अन्ये त्वाहुः यत् नान्नस्याग्निसंयोगान् मधुराद्यावस्थिकं भवति, किन्तु कफादिस्थानेषु मनुष्याणां स्वभावादेव मधुरादयो रसास्तिष्ठन्ति, ते चान्नं स्वस्वभावं नीत्वा कफादीन् जनयन्ति। CK.
10. यत्तु, अनेनावस्थापाकेन कफपित्तयोरीरणमात्रं क्रियते न तु वृद्धिः,वृद्धिः निष्ठापाके एव भवतीति वदन्ति, तदुपपत्तिशून्यं भाति, किंच, अवस्थापाकात् कफपित्तयोर्वृद्धिः, तथा निष्ठापाकाच्च मलरूपतया उत्पाद इति युक्तं पश्यामः। CK.

GD reads "madhurākhyāt" instead of "madhurādyāt." He also terms kapha, pitta and vāta produced by avasthāpāka as mala.[1]

JN clarifies the transformation in three stages as frothing, clarity and solidity.[2]

Smell etc. in food nourishes the senses and sense organs. Sense organs are, according to Āyurveda, pañcabhautika and every moment subject to decay and as such for maintenance they need nourishment.[3]

GD reads "hyupakṛta" instead of "hyupahita" and "prāṇādī" instad of "ghrāṇādī".

JN follows GD.

13-14. Explaining the mechanism of bhautika agni, Ck says that these are situated within food substances and being kindled by jāṭharāgni digest the intrinsic material and thus produce their respective qualities.[4] Though dravyas (Pārthiva etc.) are digested by bhūtagnis, the manifest result is that they acquire the specific qualities and that is why it is said that qualities rather than substance are produced. This shows that by agni qualities are produced and not substance.[5] Or if the word 'āhāraguṇa' is divided, it would mean that bhūtāgnis digest both substance and qualities. In this case, jāṭharāgni digests all the food essence, excreta and vipāka while bhutāgnis produce their respective qualities.[5] This mechanism of bhūtāgins is also active in dhātus as they are also composed of five bhūtas.[7]

Dravyas and guṇas nourish similar dravyas and guṇas. Thus dravyas, pārthiva etc., nourish dhātus, doṣas and malas while guṇas such as smell, unctuousness, hotness, heaviness etc. nourish similar guṇas in the body. By nourishment of guṇas that of draya is also understood as without nourishing dravya it is not possible to nourish guṇas.[8]

1. षड्रसस्यान्नस्य भुक्तमात्रस्य प्रपाकतः पाकारम्भात् मधुराख्यात् भावात् यः फेनभाव उदीर्यते स कफो नाम मलः।.....तत् पित्तं नाम मलम्।.....वायुर्नाम मलः स्यात्। GD.
2. अन्नस्य पाकात् प्राक् फेनभावः, ततः अच्छता, ततः पिण्डितभावः। JN.
3. देहाश्रितान् गन्धादीन् पोषयति, तथा घ्राणादीनि च.....इष्टैर्गन्धादिभिः प्रीणाति।.....इन्द्रियाण्यपि हि पांचभौतिकान्यस्मद्दर्शने, तानि च प्रतिक्षणं क्षीयमाणानि। CK.
4. भौतिकवह्निव्यापारमाह-.....भौमादयः पञ्चोष्माणः पार्थिवादिद्रव्यव्यवस्थिताः जाठराग्निसंधुक्षितबलाः अन्तरीयं द्रव्यं पचन्तः स्वान् स्वान् पार्थिवादीन् पूर्वपार्थिवगन्धत्वाद्यविलक्षणान् गुणान् निर्वर्तयन्ति। CK.
5. यद्यपि भूताग्निना पार्थिवादिद्रव्यं पच्यते, तथाऽपि पार्थिवादिद्रव्याणां पाकेनैतदेव जननं यद् विशिष्टगुणयुक्तत्वं, तेन पाकेन जन्यमानेऽपि द्रव्ये गुणा एव जन्यन्त इत्यभिप्रायेण पार्थिवादीनाहारगुणान् जनयन्तीत्युच्यते। अनेन गुणजननमेवाग्निनोच्यते, न द्रव्यजननम्। CK.
6. किं वा, आहाराश्च गुणाश्चेति विग्रहादाहारशब्देनाहाराधिकरणरूपं द्रव्यमपि गृह्यते।.....तत्र जाठराग्निः सर्वानेवाहाररसमलविपाकान् पचति, भौतिकास्त्वग्नयः स्वान् स्वान् गुणान् जनयन्ति। CK.
7. अयं च भूताग्निव्यापारो धातुष्वप्यस्ति, यतो धातुष्वपि पञ्चभूतानि सन्ति। तत्रापि धात्वग्निव्यापारे भूताग्निव्यापारश्च जाठराग्निक्रमेणैवोक्तो ज्ञेयः। CK.
8. सजातीया द्रव्यगुणाः सजातीयान् द्रव्यगुणान् पुष्णन्ति। तेन द्रव्याणि पार्थिवादिद्रव्यरूपाणि देहधातुदोषमलाख्यानि पुष्णन्ति, गुणास्तु पाकस्थितगन्धस्नेहौष्ण्यगौरवादयः देहगन्धस्नेहौष्ण्यगौरवादीन् पुष्णन्ति।.....द्रव्यपोषणं तु गुणपोषणेन लभ्यते, गुणपोषणं द्रव्यपोषणमन्तरा कर्तुमशक्यत्वात्। CK.

15. In this verse function of dhātvagni is described.[1] Though in šukra there is no excrete, it is mentioned so on the basis of the majority.[2] 'Punaḥ' means 'after digestion by jāṭharāgni'.[3]

16. The word 'prasādaja' relates to all rakta etc. as they all originate from the essence portion of the preceding dhātu. From excrete portion, kapha etc. are produced.[4] As šukra is devoid of excrete, it only gives rise to foetus from its essence portion and not to any thing from excrete. Some say moustache as excrete of šukra but it is not supported by any authority. Moreover, if it is so then moustache might appear on women's face too as they have also šukra though not capable of producing garbha.[5]

Others read 'garbhaprasādajam' denoting ojas.[6]

In 'prasādaja''ja' (jāta=arisen) is for nourishment and not for primary origination as rakta etc. are produced right from the foetal stage and are nourished by rasa etc. right since then.[7]

Regarding origin of dhātus, there are three views of commentators-(1) Dhātus are produced by complete conversion of the preceding dhātu into the successive one such as rasa digested by its own agni is coverted into rakta and so on such as curd is produced by milk, butter by curd and so on.[8] (2) Rasa itself drenches rakta first and by contact with the seat of rakta it experiences similarity with it and also nourishes rakta by its similar portion. Thereafter it goes to māṃsa and nourishes it in the same way. Thus rasa itself drenches the successive dhātus gradually and nourishes them such as water flowing though tributary channels irrigates the plots of land one after the other.[9] (3) Rasa produced from food traverses by different channels to rasa, rakta etc. and nourishes them with similar portion. So dhātu which is nearly situated is nourished earlier than the one which is distant. Tnus nourishment of dhātus is effected by different channels such as pigeons coming to thrashing ground take away the grains to their

1. भूताग्निव्यपारं दर्शयित्वा धात्वग्निव्यापारं दर्शयन्नाह। CK.
2. शुक्रस्य यद्यपि किट्टवान् पाको न भवति, तथाऽपि बहूनां किट्टवत्त्वाद् द्विविधमिति निर्देशश्छत्रिणो गच्छन्तीति न्यायाज्ज्ञेयः। CK.
3. पुनरिति जाठराग्निपाकानन्तरम्। CK.
4. प्रसादजशब्देन रसादिभ्यः प्रसादांशजन्या रक्तादयः, किट्टांशजन्यास्तु वक्ष्यमाणाः कफादयः। CK.
5. शुक्रात्तु निर्मलतया प्रसादज एव गर्भो भवति, न तु मलजन्यं किञ्चित्। केचित्तु शुक्रमलतया श्मश्रूणि वदन्ति, तन्न, तन्त्रेऽनभिधानात्। तथा शुक्रमलं यदि श्मश्रूणि स्युस्तदा स्त्रीणामपि सशुक्रतया श्मश्रूणि भवेयुः, स्त्रियश्च सशुक्रा एव, परं तासां शुक्रं गर्भारम्भकं न भवतीत्यादि प्रतिपादितं प्राक्। CK.
6. अन्ये तु गर्भप्रसादजशब्देन नपुंसकेन ओजोऽभिदधति। CK.
7. प्रसादज इत्यत्र जातशब्दः पोषण एव वर्तते, नापूर्वोत्पादे, रक्तादयो हि गर्भात् प्रभृत्येवोत्पन्ना रसादिभिः पोष्यन्ते। CK.
8. तत्र रसः स्वाग्निपच्यमानो रक्ततां याति, रक्तं मांसतामित्यादि पूर्वपूर्वधातुपरिणामादुत्तरोत्तरधातूत्पादः, यथा क्षीराद्दधि भवति, दध्नो नवनीतं, नवनीताद्घृतं, घृताद् घृतमण्ड इत्येकः पक्षः। CK.
9. किंवा, रस एव रक्तं प्रथमं प्लावयति, तत्र च रक्तस्थानसंबन्धाद् रक्तसादृश्यमनुभवति, रक्तं च रक्तसमानेनांशेन पोषयति। ततो रक्तमाप्लाव्य मांसमाप्लावयति, तत्रापि मांसपोषणं करोति, मांससादृश्यतामनुभवति, एवं उत्तरोत्तरधातून् रस एवाप्लावयति वर्धयति च ; यथाः केदारनिषिक्तं कुल्याजलं प्रत्यासन्नां केदारीं तर्पयित्वा क्रमेण केदारिकान्तराणि आप्लावयति। CK.

respective places by different passages and reach there shortly or lately according to distance.[1]

Thus these three are the ways of nourishment of dhātus by the likeness of milk-curd, field-channel and thrashing ground-pigeon-out of them the first or the second one is reasonable but the third one is improbable. This point has been fully explained in Su. ch. 28.[2]

In the above chapter (Su.ch. 28), rasa is mentioned apart from āhāra-rasa but here why there is only one rasa? In fact, rasa is of two types-sthayī (stable) and poṣaka (nourishing). In the first reference both are mentioned separately but here they are said as one.[3]

17. Breast-milk etc. though support the body do not nourish other dhātus and as such are known as 'upadhātu'. On the other hand, rasa etc. which support the body as well as nourish the other dhātus are known as dhātus.[4]

Śukra produces ojas and as such is included in dhātus. In fact, ojas is neither dhātu nor upadhātu but being essence of the seven dhātus is included in the same. That is why its agni is also not mentioned separately.[5]

Commenting on this verse GD says. In women, śukra is cooked by its own agni and thus becomes mostly as menstrual blood and a little as śukra.[6]

18-20a. 'Nakha' (nails) should also be taken as excrete of asthi on the authority of Suśruta. Caraka also once said that nails are supported by excrete but in the context of anatomy he enumerated them as bones.[7]

---

1. किं वा, आहाररस उत्पन्नो भिन्नैरेव मार्गैः रसरुधिरादीनि समानेनांशेन तर्पयतिः तत्र च यः प्रत्यासन्नो धातुस्तत्पोषको धतुभागस्तं शीघ्रं पुष्णातिः यस्तु विदूरो धातुस्तस्य विदूरमार्गतया चिरेण पोषणं भवति, एवं भिन्नैरेव मार्गैः धातूनां पोषणं भवति ; यथा खले उत्पतितानां कपोतानां भिन्नदिग्गामिनां स्वीयस्वीयमार्गेणैव गच्छतां गम्यदेशस्य प्रत्यासन्नविप्रकृष्टत्वादिभेदेन शीघ्रं चिरेण च गमनं भवति, तद्वत्। CK.
2. इति क्षीरदधिन्याय-केदारीकुल्यान्याय-खलेकपोतन्यायात् त्रेधा धातुपोषणक्रमः। तत्रेह शब्दार्थपर्यालोचनया केदारीकुल्यान्यायः क्षीरदधिन्यायो वा संगत एव, खलेकपोतन्यायस्तु मनाग् दुर्घटः।.....प्रपञ्चितं चैतद् विविधाशितपीतीये, तत्रैवानुसरणीयः प्रपञ्चः। CK.
3. ननु विविधाशितपीतीये......रसद्वयं स्वीकृतम् इह त्वेक एव रक्तपोषको रस इति कथं न विरोधः मैवं,.....यतो द्विविधो रसः स्थायी पोषकश्चेति। तेन तत्र धातुपोषकपोष्यरसांशयोर्भेदविवक्षया भेद उक्तः, इह स्थायिपोषकरसांशावप्येकतया निर्दिष्टौ। CK.
4. ते च स्तन्यादयो धात्वन्तरापोषणाच्छरीरपोषका अप्युपधातुशब्देनोच्यन्ते, रसादयस्तु शरीरधारकतया धात्वन्तरपोषकतया च धातुशब्देनोच्यन्ते। CK.
5. शुक्रं तु ओजोजनकत्वाद् धात्वन्तर्गतमेव। ओजस्तु इह न धातुषु नाप्युपधातुषु पठितं, तस्य सप्तधातुसाररूपतया सप्तधात्वन्तर्गतत्वादेव, अत एव तस्याग्निरपि पृथङ् नोक्तः। CK.
6. शुक्रं स्वगताग्निना पक्वं प्रायेण भवत्यार्त्तवं रक्तं, स्वल्पन्तु शुक्रं वर्तते। GD.
7. अस्थिमलं नखोऽपि सुश्रुतप्रामाण्यादुन्नेयः। तत्र हि "नखलोम च" (सु.सू.46) इत्यनेनास्थिमलत्वं नखस्योक्तम्। उक्तं च "विविधाशितपीतीये" किट्टात् केशनखादयः पुष्यन्ति (सू.28) इति, किन्तु शारीरेऽस्थिगणनायां "विंशतिर्नखाः" (शा.7)

GD clarifies that excrete of solid food is faeces while that of liquid one is urine.[1] JN follows it.[2]

20b-35. Some say that rasa dhātu takes six days in its conversion into śukra dhātu while in Suśruta's view this period is one month.[3] Caraka's view is that this process of transformation of dhātus is moving on constantly like a wheel and as such there can be no fixation of time which may vary according to the condition of agni. If it is strong, the process may take less time otherwise it may be prolonged. Suśruta also has indicated this position by citing the examples of sound, flame and water-stream denoting fast, medium and slow speed of the process respectively[4]

36-38a. By 'rasa', rasadhātu is taken or some liquid dhātu such as rakta etc.[5]

38b-41. Bhūtāgnis are five, dhātvagnis are seven and agni for digestion of food (jāṭharāgni) is one. Other agnis relating to malas and upadhātus are included in bhūtāgni or they are ignored as they are not so important.[6] Grahaṇīdoṣajān' denotes particularly the four disorders of grahaṇī and generally mildness of digestive fire, indigestion etc. which are located in grahaṇī. In the present context it denotes the disorder which arises due to abnormal functioning of grahaṇī which is not found in indigestion etc.[7]

Regarding bhūtāgnis and dhātvagnis, JN says that they are parts of jāṭharāgni.[8]

51. The word 'yuktaḥ' means 'samaḥ' (normal) or it may mean balance of all the three doṣas. The word 'samaḥ' denotes samāna vāyu assisting agni.[9]

इत्यनेनास्थित्वेन प्रोक्ताः । CK.

1. भौमान्नस्य भूमेः किट्टं विट्, आप्यान्नस्यापां किट्टं मूत्रम् । CK.
2. किट्टं घनं विट्, अच्छं तु मूत्रम् । JN.
3. षड्भिरहोरात्रै रसस्य शुक्रस्पतया परिवर्तनं भवतीति केचिदिच्छन्ति.....यदुक्तं सुश्रुते.....एवं मासेन रसः शुक्रीभवति इति । CK.
4. स्वमतमाह-सन्तत्येत्यादि । भोज्ये उपयुक्ते सति धातूनां रसादीनां चक्रवत् परिवृत्तिर्भवति अविश्रान्ता समुत्पत्तिर्धातूनां भवति । चक्रदृष्टान्तेन तु परिवृत्तिकालानियमं दर्शयति, यथा चक्रं.....एवं धातवोऽपि अग्न्यादिसौष्ठवाच्छीघ्रमेव परिवर्तन्ते, अग्न्यादिवैगुण्ये चिरेण परिवर्तन्ते इति । एवं सुश्रुतेनापि.....दृष्टान्तत्रयेण रसपरिणामोऽपि अग्न्यादिभेदेन प्रकृष्टाप्रकृष्टकालज उक्त एव । CK.
5. रसरूपो धातुः, किंवा रसतीति रसो द्रवधातुरुच्यते, तेन रुधिरादीनामपि द्रवाणां ग्रहणं भवति । CK.
6. भौतिकाः पञ्च, धात्वग्नयः सप्त, अन्नपक्तैकः । अत्र च यान्यग्न्यन्तराणि उपधातुमलादिगतानि तान्यप्यवरुद्धानि भूताग्निष्वेवः किंवा, अप्राधान्यादन्यान्यकिंचित्कराणि नोक्तानि । CK.
7. ग्रहणीदोषजानिति ग्रहण्याश्रितदोषजान् । एतेन वक्ष्यमाणलक्षणाश्चत्वारो ग्रहणीविकारा विशेषेण ग्रहणीदोषशब्दवाच्याः गृह्यन्ते, तथाऽग्निमान्द्याजीर्णादयश्च ग्रहण्याश्रिताः रोगाः गृह्यन्ते । अग्निमान्द्याजीर्णादयस्तु यद्यपि ग्रहण्याश्रितत्वेन ग्रहणीरोगा एवं तथाऽपीह ग्रहणीरूपनाडीव्यापारवैपरीत्येन ये जायन्ते त एव मुख्यग्रहणीशब्दवाच्याश्चत्वारो रोगाः ।.....न चेयं पक्वान्नविमोक्षलक्षणा दुष्टिरग्निदोषे आमाद्यजीर्णे वा । CK.
8. देहाग्नेरंशभूता ऊष्माणो हि ते । JN.
9. युक्त इति समः । किंवा युक्तवायुतया धातुसाम्यं करोति, युक्तशब्देन च कफपित्तसाम्यमग्नौ गृह्यते ।.....समशब्देन समानो वायुरग्निसहायो गृह्यते । CK.

51b-54. The word 'vā' (v. 52) denotes aggregation, thus it would mean 'slightly digested as well as undigested'. Vidahyate' also means 'being semidigested'.[1]

55. In pūrvarūpa, 'vidāha' means 'particular burning sensation'.[2] GD interprets it as 'semidigestion'.[3]

56-57. Ck takes left side by 'pārśvataḥ' as grahaṇī and guda are situated in that side.[4]

58-72. Some do not take agnimāndya etc. within grahaṇīdoṣa as such consider V. 71 as unauthoritative but in Ck's view there is no any conflict because agnimāndya etc. are already mentioned under grahaṇīdoṣa.[5]

82-86. In this formulation, juice of suṣavī is to be taken in place of water and taking other liquids such as sour gruel etc. the total quantity should be one droṇa.[6] Kṣāras should be added after the ghee is cooked.[7]

88-93. In this formulation, vinegar etc. each of the thirteen liquids should be in quantity equal to ghee.[8] Interpreting the word 'sāme', Ck says that it qualifies grahaṇiroga or faeces. He adds that āma is of many kinds and quotes Bhoja and Īśvarasena in this connection.[9]

94-95. 'Āmadoṣa' here denotes grahaṇīdoṣa.[10]

96-97. In citrakādya guṭikā, by 'lavaṇāni' some take three salts but five salts should be taken as they are mentioned in dīrghañjīvitiya chapter (Su. 1) and are also available.[11]

1. पक्वमामं वेति वाशब्दः समुच्चये, तेन किंचित् पक्वं, किंचिदपक्वञ्च।.....विदह्यते इति पक्वापक्वं भवति। CK.
2. पूर्वरूपे विदाहेऽन्नस्येति विशिष्टो दाहो विदाहः। CK.
3. विदाहो अर्धपरिपाकः। GD
4. पार्श्वतः सृजतीति वामपर्श्वतः सृजति, यतः ग्रहणीगुदौ वामपार्श्वाश्रयौ, तेन वामे पार्श्वे पक्वं सृजतीति युक्तम्। CK.
5. यश्चाग्निरित्यादिश्लोकं केचिद्वैशेषिकग्रहणीदोषव्यतिरिक्ताग्निदोषत्रयस्य ग्रहणीरोगान्तर्निवेशनमसंगतमिति कृत्वाऽनार्षं वदन्ति, किन्तु तं चापीतिपदेनाग्निमान्द्यादीनां प्राकृतानां सामान्यग्रहणीदोषाबाधे सति न किंचिद् विरोधं पश्यामः। सामान्यग्रणीदोषेऽपि अग्निमान्द्यादय उक्ता एवेति दर्शितमेव। CK.
6. द्वे पञ्चमूले इत्यादौ सुषवीस्वरसो जलस्थानीयः, आरनालादि क्वाथ्यं च मिलित्वा द्रोणं मानं ग्राह्यम्। CK.
7. युक्तित इत्यनेन तु योग्ये काले क्षारयोगमाह, स च योग्यकालोऽत्र घृतावतारणकाल एव। CK.
8. शुक्तादित्रयोदशद्रवाणां प्रत्येकं स्नेहसमत्वम्। CK.
9. सामे ग्रहणीगदे, केचित् "सामे पुरीषे" इति वदन्ति। आमं चानेकविधमाहुः, यदुच्यते-'आममन्नरसं केचित् केचित्तु मलसञ्चयम्। प्रथमां दोषदुष्टिं च केचिदामं प्रचक्षते।।' इति। भोजोऽप्याह-आमाशयस्थः कायाग्नेर्दौर्बल्यादविपाचितः। आद्य आहारधातुर्यः स आम इति संज्ञितः।।' इति। ईश्वरसेनोऽप्याह-'एवमामाशयेऽप्यन्नं बहु सम्यङ्न जीर्यति। चीयमानं तदेवान्नं कालेनामत्वमाप्नुयात्।' इत्यादि। CK.
10. आमदोषशब्देन ग्रहणीदोषिणोऽभिप्रेतत्वात्। CK.
11. लवणानि चेत्यत्र कपिञ्जलाधिकरणन्यायेन लवणत्रयमिच्छन्ति, किन्त्वनियते स न्यायो भवति। इह तु पञ्चलवणानां प्राधान्येन दीर्घञ्जीवितीये निर्दिष्टत्वात् पञ्चलवणस्य च शक्योपादानत्वात् पञ्चैव लवणानि ग्राह्याणि। CK.

111-112a. The four sours are the first four ones mentioned in hṛdya group (Su. ch. 4) e.g. vṛkṣāmla, amlavetasa, dāḍima and badara. Others, however, take four sours prescribed in the following cavyādi formulation. In other taxts, vṛkṣāmla, mātuluṅga, badara and amlavetasa are said as four sours.[1]

GD takes the first one while JN favours the second one with slight modification.[2]

117-121. Butter-milk, in spite of sourness, does not aggravate pitta because of madhurapāka nor does it pacify it.[3] The fresh butter-milk does not cause acidity but otherwise it does.[4]

GD reads "dīpanaṃ grāhi lāghavāt" and interprets that it is grāhī due to lightness.[5] JN reads as GD but relates 'lāghava' to both dīpana and grāhī.[6]

129-131. 'Taṇḍulāmbu' is 'water taken after washing the rice grains.' Others take it as rice grains kept with double quantity of sours for a long period.[7]

JN follows Ck.[8]

132-133. 'Guḍaśītāmbu' means 'cold water mixed with jaggery'. The latter should be added in the quantity which gives only colour and sweetness.[9]

134-140. The word 'bhūnimbādyena' denotes mixing of these drugs with those mentioned in bhūnimbādya formulation (v. 132-133), others say the intake of cold water with jaggery as vehicle as prescribed therein.[10]

141-145. 'Paṭu' is interpreted as 'stimulant of senses' by Ck. GD and JN take it as 'salt'.[11]

---

1. चतुरम्लं हृद्यवर्गे प्रथमोक्तं वृक्षाम्लाम्लवेतसदाडिमबदररूपमाहुः। अन्ये तु चव्यत्वगित्यादिप्रयोगवक्ष्यमाण-कपित्थचुक्रिकावृक्षाम्लदाडिमानां ग्रहणमाहुः। तन्त्रान्तरे तु " वृक्षाम्लमातुलुंगाम्लबदराम्लाम्लवेतसैः। चतुरम्लमिदं प्रोक्तं पञ्चाम्लं तु सदाडिमम्।।" इत्युक्तम्। CK.
2. चतुर्णामम्लानामम्लवेतसवृक्षाम्लकोलदाडिमानाम्। GD.
   चतुर्णामम्लानां दाडिमकपित्थवृक्षाम्लाम्लीकानाम्। JN.
3. अम्लत्वात् पित्तप्रकोपणे प्राप्ते मधुरपाकितया पित्तं न प्रकोपयति, नापि पित्तं प्रशमयतीत्याहुः। CK.
4. सद्यो मथितमेव तक्रं पच्यमानावस्थायां विदाहकृन्न भवति, किंचित्कालस्थितं तु विदाहि भवत्येव। CK.
5. लाघवात् तक्रं ग्राहि। GD.
6. लाघवात् लघुत्वात् अग्नेः दीपनं, ग्राहि मलसंग्राहकं च। JN.
7. तण्डुलाम्बुनेति तण्डुलधावनाम्बुना, अन्ये तु तण्डुलाद् द्विगुणमम्लं तण्डुलेन समं चिरं स्थितं तत्तण्डुलाम्बु वदन्ति। CK.
8. तण्डुलाम्बुना तण्डुलधावनोदकेन। JN.
9. गुडयुतं शीताम्बु गुडशीताम्बु। गुडश्चात्र गुडवर्णतामाधुर्यापत्तिमात्रो देयः। CK.
10. भूनिम्बाद्येनेति भूनिम्बाद्युक्तद्रव्यगणेन यथोक्तमानेन योजयेद् वचादीन्। अपरे तु भूनिम्बाद्येनेति वचनेनात्र भूनिम्बाद्युक्तगुडशीताम्बुपेयतामस्याप्यतिदिशतीति वदन्ति। CK.
11. पटुना इन्द्रियोत्तेजकेनेत्यर्थः। CK.
    पटुना लवणेन। GD.
    पटु लवणं सैन्धवादि। JN.

181-182. Buffalo's urine is to be taken equal to powder as in the preceding formulation.[1]

183-187. Those who read the first half of the v. 183 as "catuṣpalaṃ sudhākāṇḍat triphalālavaṇāni ca" take four palas combined with triphalā and lavaṇa.[2]

188-194a. Because of association of curd, ghee and oil combined should be taken in quantity of three kuḍavas.[3]

201b-205. The word 'sneha' (v. 202) denotes ghee as it is indicated here.[4] 'Avipakva' qualifies 'purīṣa' and does not indicate 'āmarasa' as in that case sneha is contra-indicated. In case of immaturity of faeces due to sneha, the use of the latter is already contra-indicated. Moreover, because of processing with appetisers it becomes useful in immature faeces, the unctuousness being helpful in favouritising vāta[5] (which kindles fire.)

Commenting on this GD says that the patients of grahaṇī disorder suffer from three disorders of agni (manda, tīkṣṇa and viṣama). This relates to mandāgni.[6]

206-211a. Ck clarifies distinction among kṣāma, kṣīṇa and kṛśa. Kṣāma is inactive, kṣīṇa is debilitated and kṛśa is emaciated.[7] GD reads as 'kāmakṣīṇakṛśān' and interprets as 'markedly debilitated'.[8] JN follows GD and interprets it as 'excessively debilitated.[9] Ck says that here meat-soup of herbivorous animals like cow etc. is contra-indicated. Though meat of such animals is described as heavy, here relatively light should be taken and light food should be given with this meat soup. Others, however, interpret differently. Others interpret lightness by processing with sour etc.[10]

1. चूर्णसमत्वं माहिषमूत्रस्य, पूर्वप्रयोगदृष्टत्वात्। CK.
2. चतुष्पलमित्यादौ "चतुष्पलं सुधाकाण्डात् त्रिफलालवणानि च" इति ये पठन्ति, ते त्रिफलालवणैर्मिलित्वा चतुष्पलं वदन्ति। CK.
3. दधिसाहचर्याद् घृततैलस्यापि मिलित्वा कुडवत्रयम्। CK.
4. स्नेहशब्देनात्र सामान्यवाचिना सर्पिरेवोच्यते, सर्पिष एवात्राधिकारात्। CK.
5. अविपक्वमिति पुरीषविशेषणं, तेनाविपक्वशब्देनेह रसामस्य ग्रहणं न भवति, रसामे.....स्नेहो निषिद्धः, स्नेहापक्वपुरीषं प्रति स्नेहप्रयोगो विरुद्ध एव। किंच दीपनीयौषधसंस्कारादपि स्नेहस्य संस्कारगुणाविधातादेव अपक्वपुरीषं प्रति हितत्वं भवति, स्नेह गस्तु वातप्रगुणताकरणत्वेन सहायतया उपादीयते। CK.
6. समाग्निवर्जत्रिधाग्निरपि ग्रहणीरोग उक्तः, तत्र मन्दाग्निक्रियामाह.....त्रिधाग्निश्च ग्रहणीरोगी। GD
7. क्षामो व्यवसायशून्यः, क्षीणो दुर्बलः, कृशो हीनमांसः। CK.
8. कामक्षीणकृशान् यथेष्टं क्षीणान् कृशान्। GD.
9. कामं अतिशयं क्षीणाः दुर्बलाः। JN.
10. प्रसहानां द्वैविध्यान्मांसाशिनामिति विशेषणं, तेन तृणादप्रसहानां गवादीनां निषेधः। ननु प्रसहाः "गुरूष्णस्निग्धमधुराः" इत्यन्नपाने उक्तं, इह तु लघुतीक्ष्णेत्यादिना कथं लाघवमुच्यते तेषाम् ? नैवं, भोजयेल्लध्विति योजनात्। तेन प्रसहानां मध्ये ये लघवस्तेषां रसेनात्र लघ्वन्नं भोजयेत्।.....अन्ये तु प्रसहान्तरापेक्षया ये प्रसहाः लघवस्तेषामिह लघुशब्देनोपादानम्। तथाऽन्ये अम्लादियोगात् संस्कारेणेह लाघवं साधयन्ति। CK.

CHAPTER XVI

1-2. The disease 'pāṇḍuroga' is caused predominantly by pitta. Because of the prominance of pallor in skin it is called 'pāṇḍu'.[1]

3. Sušruta has described only four types of pāṇḍuroga. There the disorder caused by earth-eating is included in sannipātaja but Caraka describes five types.[2]

GD discusses in detail the place of earth-eating as causative agent. He says- though it aggravates doṣas, it causes the specific disorder and as such is 'ubhayahetu'[3] (causing aggravation of doṣa as well as specific disorder).

JN says that in Sušruta the type caused by earth-eating is included in doṣaja types.[4]

4-6. 'Ojas' here may be taken as raktadhātu or in the original sense of essence.[5] Though pitta and rakta have similar nature, here aggravation of the former does not lead to increase of the latter, rather it is decreased because of depletion of the nutrient rasa by pitta.[6] Similarly, abnormal pitta produces abnormal complexion.[7]

The word 'pittapradhāna' indicates that in all types pitta is the root cause. The other doṣa relatively predominant causes vātika etc. There can't be dual types but only sannipātaja.[8]

12. Ck informs about a variant 'svedābādha' in place of 'svedābhāva'.[1]

13-16. 'Annadviṭ' means 'aversion to food' and 'aruci' is inability to take desired food'.[2] Aversion to cold, even in paittika disorder, is due to specific nature of the disease.[3]

GD and JN accept the variant "syuradhvārohaṇāyāsaiḥ" in place of "bhavantyārohaṇāyāsaiḥ"

---

1. "पित्तप्रधानपाण्डुरोगचिकित्सितमुच्यते। "पाण्डुना.....प्रधानेन वर्णेनोपलक्षितो रोगः पाण्डुरोगः। CK.
2. ......सुश्रुतोक्तचतुःसंख्यात्वं निषेधयति।.....तत्र हि मृद्भक्षणजः सन्निपातजे एवावरुद्धः। CK.
3. किमर्थं मृद्भक्षणकारणाद् भिद्यते इति चेन्न, कषायादिमृद्भक्षणकुपिता वातादयः पाण्डुरोगमेवारभन्ते, नान्यरोगमारभन्ते।.....वातादीनां कोपं जनयति, तथा पाण्डुरोगञ्च जनयतीत्युभयहेतुर्मृदिति। GD.
4. तत्र मृद्भक्षणजस्य दोषजेष्ववरोधः। JN.
5. ओजसो रक्तधातुरूपस्य.....किंवा ओजस एव दश गुणाः। CK.
6. यद्यपि रक्तपित्तयोरेकयोनित्वात् पित्तेनेह रक्तवृद्धिर्भाव्या, तथाऽपीह रक्तक्षयो रक्तपोषकरसस्य पित्तेन क्षपणाद् रक्तपोषकसारभागानुत्पादाच्च। CK.
7. यद्यपि पित्तं तेजोरूपतया वर्णकरमिहोच्यते.....तथाऽपि विकृतत्वात् पित्तमिह विकृतवर्णकृदेव भवति। CK.
8. पाण्डुरोगेषु सर्वेषु पित्तमारम्भकमुक्तं.....सर्वत्र पित्तं प्रधानं सदपि योऽन्यो दोषः प्रधानतयाऽऽरम्भकस्तेन दोषेण पृथग्दोषजो व्यपदिश्यते.....नहि सति पित्तप्राधान्ये द्वावितरौ दोषावारम्भकौ भवतः.....द्वन्द्वजः पाण्डुरोगोऽस्ति.....सति पित्तप्राधान्ये तदितरयोः प्राधान्येन प्रकोपे तज्जपाण्डुरोगस्य सन्निपातजत्वव्यपदेशात्। GD.
9. "स्वेदाबाधः" इति केचित् पठन्ति। CK.
10. अन्नद्विडित्यनेन अन्नाग्रह उच्यते, अरुचिमानित्यनेन प्रार्थितान्नभक्षणासामर्थ्यमुच्यते। CK.
11. शिशिरद्वेषिता च पित्तरोगेऽप्यस्मिन् रोगमहिम्ना भवति। CK.

19-22. Though all pāṇḍu is caused by pitta, paittika is so called as it is not associated with other doṣas and is caused by strong pitta like paittika raktapitta. To denote the severity of pitta, paittika constitution is also mentioned in causation.[1]

In "tṛṣṇāmūrcchāpipāsārtaḥ" (v. 20) "tṛṣṇāmūrcchā" means 'fainting due to thirst', thus there is no repetition by 'pipāsā'. Others interpret 'tṛṣṇā' as 'hunger', some, however, read "tṛṣṇāmūrcchāparītasya"[2] the other variant is "chardimūrcchāpipāsārtaḥ" accepted by GD and JN.

27-30. Here, in spite of association of doṣas, it is named by earth and not doṣas as the former decides the specific symptoms and line of treatment.[3]

GD says that astringent earth etc. aggravate not only vāta etc. but due to specific nature aggravate tridoṣa with predominance of one of the doṣas.[4]

34-39a. Pāṇḍuroga itself, due to specific etiology, attains the stage of kāmalā etc. that is why Hārīta mentions kāmalā etc. as pāṇḍuroga. Suśruta, however, describes it separately. Vāgbhata takes middle course and says that it may be either as a sequel to pāṇḍu or without it independently like pramehapiḍakā.[5] Some say that kāmalā located in koṣṭha and śākhā and having little pitta may be independant also that is why its etiology and symptoms are described at the end of this chapter.[6] The word 'bahupittā' indicates little amount of pitta in the other type merely dependent on śākhā.[7]

'Kumbhakāmalā' is the term for a stage of located in koṣṭha.[8]

JN clarifies that kāmalā is of two types-koṣṭhāśrayā and śākhāśrayā' as mentioned in aṣṭodarīya chapter. The former is 'bahupittā' and is described here while the latter is 'alpapittā' and would he described later.[9]

39b-43. The word 'tābhyām' may denote the two disorders or two therapeutic measures.[10]

1. सर्वोऽपि पाण्डुरोगः पित्तजः, तथाऽप्ययं विशेषेण दोषान्तरासंपृक्तप्रबलपित्तजन्यत्वात् पैत्तिक इत्युच्यते, यथा पैत्तिकं रक्तपित्तम् , अत एवात्र पित्तातिप्रबलतोपदर्शनार्थं पित्तलस्येत्यनेन पित्तप्रकृतिताऽपि कारणत्वेनोक्ता। CK.
2. तृष्णानिमित्ता मूर्च्छा तृष्णामूर्च्छा, तेन पिपासया समं न पौनरुक्त्यम्। अन्ये तु तृष्णामिह क्षुधामाहुः, केचित् "तृष्णामूर्च्छापरीतस्य" इति पठन्ति। CK.
3. अत्र च दोषसंबन्धे सत्यपि मृदेव व्यपदेशिका, न दोषाः, तस्य एव चिकित्साभेदलिंगभेदकर्तृत्वात्। CK.
4. कषायाद्येकैका मृदेव स्वप्रभावात् पित्तप्रधानांस्त्रीन् दोषान् कोपयति। तत्र कषाया वातप्रबलपित्तप्रधानत्रिदोषं कोपयेत् , ऊषरा पित्तप्रधानं, मधुरा पित्तप्रधानकफबलत्रिदोषं कोपयेत्। GD.
5. पाण्डुरोगस्यैव हेतुविशेषेण कामलादिरूपाऽवस्था उत्पद्यते, अत एव च हारीते कामलादीनामपि पाण्डुरोगत्वमेवोक्तम्.....अन्या तु सुश्रुतोक्ता कामला भिन्ना भवति.....वाग्भटेऽपि "भवेत् पित्तोल्वणस्यासौ पाण्डुरोगादृतेऽपि च ' इति। इह तु पाण्डुरोगेऽपि भवेत् पाण्डुरोगाद् विनापि भवेत् , यथा प्रमेहाश्रिताः पिडकाः प्रमेहेषु भवन्ति विना प्रमेहमपि भवन्ति। CK.
6. कोष्ठशाखाश्रया' बहुपित्ता पाण्डुरोगपूर्विका भवति, या तु केवलं शाखाश्रया अल्पपित्ता च वक्तव्या सा स्वतन्त्राऽपि भवतीति केचित्। अत एव.....वक्ष्यति। CK.
7. बहुपित्तेत्यनेन केवलं शाखाश्रयाया अल्पपित्तत्वं सूचयति, अम्लकटुतीक्ष्णोपयोगं शाखाश्रयिपित्तस्य कोष्ठानयनार्थं वक्ष्यति। CK.
8. कुम्भकामलेति अवस्थाभेदेन कोष्ठगतकामलायाः संज्ञा, कुम्भः कोष्ठः, तदाश्रया कामला कुम्भकामला। CK.
9. कोष्ठाश्रया शाखाश्रया च इति द्विविधा मता, उकतञ्चाष्टोदरीये.....बहुपित्तेति कोष्ठाश्रया सैव हेतुलक्षणाभ्यामिहोच्यते। शाखाश्रया तु अल्पपित्ता वक्ष्यमाणा पश्चात्। JN.
10. ताभ्यामिति पाण्डुरोगकामलाभ्याम्..........ताभ्यामिति वमनविरेचनाभ्याम्।CK.

50. By 'pathyāvṛnta' some take fruit of harītakī devoid of seeds.[1]

GD interprets 'śata' as 'śata pala'.[2]

51. GD reads "dantyāḥ śatapalarase" instead of "dantyāścatuṣpalarase".

72-80a. A different formulation of 'maṇḍūra- vaṭaka' has been described in v. 102-105a. Because of this, placing of Ck's comm. on this has been confused. In fact, the comm. on v. 102-105a should have been placed here.

128-130a. This treatment is simultaneously kapha-decreasing and pitta-increasing in order to bring the doṣa situated in śākhā to koṣṭha.[3]

132-134a. Halīmaka is mentioned as 'lāghava' and 'alasa' in other texts.[4]

1. अन्ये तु पथ्यावृन्तचूर्णं हरीतकीफलस्यैव चूर्णं तदस्थिशून्यमित्याहुः । CK.
2. पथ्यायाः शतपलस्य । GD.
3. बर्हीत्यादिना कफहरं पित्तवृद्धिकरञ्च समं चिकित्सितं प्राह, यतः शाखाश्रयदोषस्य वृद्धिःकोष्ठानयनार्थम् । CK.
4. अयमेव तन्त्रान्तरे लाघवसंज्ञया अलससंज्ञया चोच्यते, उक्तं हि सुश्रुते..... इति । CK.

CHAPTER XVII

1-2. Pāṇḍuroga is one of the causes of hikkā and śvāsa and as such the chapter on the latter diseases follows that on the former. Hikkā and śvāsa, because of thier similar etiology and treatment, are described in one chapter.[1]

3-7. 'Dvividhā' means 'of two types' such as samānya-asāmānya (general and specific), mṛdu-dāruṇa (mild and severe) or nija-anija (endogenous and exogeneous). 'Triprakopaṇā' means three irritating causes such as intellectual error, consequence and unsuitable contact of senses.[2]

GD interprats 'dvividha' as saumya-āgneya, nija- āgantu and Śārīra-mānasa (psychic-somatic).

JN takes it as mṛdu-dāruṇa, nija-āgantu and śārira-mānasa.[4]

8-9. Here pitta's role is only due to contact in upper part and not as initiating cause like kapha and vāta. 'Pitasthāna' means 'āmāśaya'.[5]

10-16. Beginning from 'rajasā' (v.11) is vāta-aggravating etiology and from 'niṣpāva' onwards (v. 14b-16) is kapha-aggravating one. Their separate description indicates their independent role and not subsidiary.[6]

'Dvandva' means 'duals' such as guru-laghu, sīta- uṣṇa etc. which are mutually antagonistic.[7]

17-18a. This is general pathogenesis, specific one would be dealt further.[8]

---

1. पाण्डुरोगकारणत्वाद् हिक्काश्वासयोः पाण्डुरोगानन्तरमभिधानम्।.....हिक्काश्वासौ च समानकारणचिकित्सितत्वादेकाध्याये एवोक्तौ। CK.
2. द्विविधा इति सामान्यासामान्यभेदेन, किंवा मृदुदारुणभेदेन, निजानिजभेदेन च।.....त्रिप्रकोपणा इति असात्म्येन्द्रियार्थसंयोग-प्रज्ञापराध-परिणामकारणकाः। CK.
3. द्विविधाः सौम्याग्नेयभेदान्निजागन्तुभेदाच्छारीरमानसभेदात्। GD.
4. द्विविधा मृदुदारुणभेदेन निजागन्तुतया शारीरमानसभेदेन चापि। JN.
5. पित्तस्थानसमुद्भवावित्यनेन पित्तस्योर्ध्वस्थानसंबन्ध एव, न तु वातकफवदारम्भकत्वमिति दर्शयति, पित्तस्थानशब्देनामाशयोऽभिप्रेतः। CK.
6. अत्र च रजसेत्यादिना प्रायो वातप्रकोपकगणो विच्छिद्योक्तः.....निष्पावेत्यादिना कफकारणतया हिक्काश्वासयोः कफप्रकोपकहेतुगणोऽभिहितः।.....वातकफयोरत्र स्वहेतुकुपितत्वेन स्वातन्त्र्यं दर्शयति, नानुबन्धरूपत्वम्। CK.
7. गुरुलघू द्वन्द्वौ शीतोष्णौ द्वन्द्वौ। GD.
   द्वन्द्वं परस्परविपरीतगुणद्वयम्। JN.
8. इयं हिक्काश्वासयोः साधारणी संप्राप्तिः, वैशेषिकीं चाग्रे वक्ष्यति। CK.

21-26. Ck interprets 'tejas' as agni, GD takes it as physical halo and JN takes both.[1]

2. अम्बुसंभवत्वेन चास्य वर्षाप्रकोपित्वं वक्ष्यमाणं युक्तम्, अम्बुयोनिभूतत्वेन चास्य जलेन प्रभावात् प्रशमनं क्रियते इति ज्ञेयम्। CK.
3. उपक्रमाः चिकित्सानुष्ठानभेदाः। CK.
4. पराधिकारत्वाद् विषस्य सर्पा इत्यादिना जंगमस्थावरयोनिद्वयं संक्षेपादेवाह। CK.
5. स्थावरजे विषे मूलजानीति पदं मूलजस्य बहुत्वात् प्राधान्याच्च, तेन पत्रपुष्पादिजानामपि विषाणां ग्रहणम्।.....कन्दस्त्विह मूलविशेषत्वान् मूलशब्देनैव गृहीतः। CK.
मुस्तकादि कन्दविषाणि, तथैवमादीनि चान्यानि मूलजानि स्थिराणि चेत्युक्त्या पत्रपुष्पादीनि संगृहीतानीह चान्यानीति पदेन, ततो न विरोधः। GD.
6. एतेषां च संज्ञासंबन्धे शबरकिरातादय एव तद्विद्याः प्रमाणं, ते हि गुरुपरम्परया व्याख्यानयन्ति। CK.
7. तच्च चिरकारिरोगजनकमप्राणहरम्। CK.
8. सुश्रुतेऽपि त्रिविधमेव विषमुक्तं। (सु० क० अ० 2) ....यत्तु दूषीविषमग्रे वक्ष्यति तत् त्रिविधान्तर्गतं दर्शयिष्यामः। गरं तु द्विविधं-निर्विषद्रव्यसंयोगकृतं, तथा सविषद्रव्यसंयोगकृतं च। तत्राद्यं गरसंज्ञं, उत्तरं तु कृत्रिममिति व्यवस्था। तेनेमामेव व्यवस्थां गृहीत्वोक्तं रसायने "दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे "इतिः तथा वृद्धकाश्यपेऽप्युक्तं-"संयोगजं च द्विविधं तृतीयं विषमुच्यते। गरं स्यादविषं तत्र सविषं कृत्रिमं मतम्।" इति। CK.

15-17. Vegetable and animal poisons are mutually antagonistic due to their opposite pathways. This statement does not go against the Caraka's proposition that the anti-poison property of poison is due to their prabhāva (specific action) because if prabhāva is not accepted as cause here, then general emetics and purgatives may also have that property but it is not so. Thus prabhāva is the responsible factor in anti-poison action as well as in upward and downward movements.[1]

GD interprets that this applies only to fangs and roots and not to other parts.[2]

18-23. Suśruta has described seven vegas (impulsive stages) according to crossing of seven kalās one after the other. Here, in addition, the eighth stage is beyond that and fatal moving to the affected site in case of bite and to heart in that of internal poisons. Thus there is no conflict with Suśruta.[3] In fourth stage and onwards medas etc. should be understood as dūṣya on the authority of Suśruta.[4] The purpose of describing the impulsive stage in animals and birds is that one should take their meat leaving the affect part.[5]

24-27. Unmanifest rasa increases kapha as both are products of jala.[6] 'Vyavāyī' means that which spreads everywhere like oil on the surface of water.[7] Here antagonistic effect of individual property is based on the specific nature of poison and thus, due to prabhāva, roughness causes aggravation of vāta and not decrease of kapha etc.[8] Suśruta has mentioned 'pākitva' (inflammatoriness) in view of chronic poisons which may be considered in case dūsivisa.[9]

28-30. Though poison and wine vitiate all the three dosas, the predominance of one of doṣas is according to location and constitution of the patient.[10]

---

1. तस्मादिति परस्परं विरुद्धमार्गगामित्वात्।.......ननु"विषं विषघ्नमुक्तं यत् प्रभावस्तत्र कारणम् "इति आत्रेयभद्रकाप्यीये प्रभावेण विषस्य विषहरणाभिधानोपपत्तिवर्णनं तद् विरुध्यते: मैवं, यदि द्रव्यप्रभावः कारणं न स्यात्तदा यत् किञ्चिदूर्ध्वभागं मदनफलादि तद् दंष्ट्राविषहरं स्यात् , यच्चाधोभागं त्रिवृतादि तन्मौलविषं निहन्यात् , न चैतद् दृष्टं, तस्मात् प्रभावस्यैवात्मगुणतामात्रकारणमेतदधोभागत्वमूर्ध्वभागत्वं चेति। CK.
2. जंगममिह दंष्ट्राविषं, दंष्ट्राविषमूलविषयोरेवोर्ध्वगत्यधोगतिस्वभावात् परस्परोपघातित्वं न त्वन्येषां पुष्पादिलालादिविषाणां गतिभेदेऽपि परस्परोपघातित्वं, तत्स्वभावात्। GD.
3. सुश्रुते एकैककलाक्रिमेण सप्त वेगा उदीरिताः, इह कलालंघनेनैव सप्त वेगाः, अष्टमे तु सप्तकलालंघनोत्तरकालं मारको वेगो दष्टस्य दंशदेशगमनाय पीतविषस्य हृदयगमनाय भवतीति सुश्रुतेन सममविरोधः। CK.
4. चतुर्थादिवेगेष्वनुक्तमपि मेद आदिदूष्यमुन्नेतव्यं, सुश्रुतवचनात्। CK.
5. एतद्विषवेगाभिधाने च प्रयोजनं यद् विषवेगमृतस्यापि मांसमुपयोज्यं पीतविषस्य हृदयं दष्टस्य च दंशदेशं मुक्त्वेत्याद्युक्तविधानेन । CK.
6. अव्यक्तरसत्वं च कफकोपनाय अव्यक्तरसत्वकफयोरेकजलरूपकार्यत्वाद्भवति। CK.
7. व्यवायित्वं सर्वतः प्रसरणशीलत्वं पानीयपतिततैलवत्। CK.
8. अत्र च गुणानां प्रतिनियमेन विरुद्धकर्मकरणे विषस्याशिवत्वमेव नियामकं ज्ञेयं, तेन रौक्ष्यादिभिः श्लेष्मक्षयादि नाशङ्कनीयम्। CK.
9. सुश्रुते च विषगुणे यत् पाकित्वमुक्तं तदाशुकारिविषे निष्प्रयोजनमिति नेहोक्तं, तथाहि-विषं नैतावन्तं कालमपेक्षते येन यावत्तस्य पाको भवत्यविचार्यः। सुश्रुते च कालान्तरप्रकोपित्वमपि दूषीविषगोचरतयोक्तं, तदिहापि दूषीविषे चिन्तनीयमिति। CK.
10. विषं मद्यं च यद्यपि त्रिदोषकोपनं तथाऽपि स्थानप्रकृतिविशेषप्राप्त्या तदनुगुणदोषप्रकोपमधिकं करोति, शेषयोस्तु मनागित्यर्थः। CK.

31. Poison which aggravates after sometime is known as 'dūṣīviṣa'. Such poison is usually 'gara' and may be either animal or vegetable product.[1]

GD says-dūṣīviṣa may be of vegetable or animal source or artificial. Its potency is suppressed by some antagonising agent and it is not eliminated out of the body.[2]

35-37. 'Ariṣṭā' is of two types-binding above the affected place with incantation or simple thread etc. 'Upadhāna' is application of some drug on head for drawing out the poison. 'Hṛdayāvaraṇa' is protection of heart. 'Prativiṣa' means use of another poison (which acts as antidote). 'Mṛtasañjīvana' means 'reviving the consciousness of the patient who is quite unconscious like dead.[3]

39-43. 'Prakṛti' here means 'nature of bodily dhātus etc.[4]

51-53. 'Upadhi' means the application of drug on head after incising in order to extract the poison.[5]

GD reads "lepauṣadha" instead of "lepaupadhi".

61-64. 'Avamārjana' means 'pressing the poison downwards (in opposite direction).[6] Though 'sveda' is contraindicated in case of poisoning, it is useful in certain conditions. It is also not enumerated under twenty four measures of treatment like food etc. However, it may be taken by 'agni' and food etc. may also be understood by 'praśamana'.[7] 'Sirā' means 'sirāvyadha' (venesection) and 'karma' pañcakarma, or 'sirākarma pañcavidham' may mean 'puncturing of five veins'.[8]

GD reads 'apamārjana' instead of 'avamārjana'.

123a-129. Details of the types of serpents (darvīkara etc.) are not given here as it belongs to others' jurisdiction.'[9]

Though poison is said as of unmanifest rasa, the mention of kaṭu rasa etc. here is

1. कालान्तरप्रकोपि विषं दूषीविषम्।.....एवंभूतं च गरमेव प्रायो भवति, तथा स्थावरं जंगमं च भवति। CK.
2. दूषीविषञ्च स्थावरजङ्गमकृत्रिमान्यतमं विषं विषघ्नौषधादिभिर्हतवीर्यं देहादनिर्गतं विषम्। GD.
3. अरिष्टा द्विविधा-मन्त्रेण रज्ज्वादिभिर्वा विषोपरिबन्धः; उपधानं विषसंक्रमणार्थं मस्तके भेषजदानम्। हृदयावरणं हृदयरक्षाकरमौषधम्। प्रतिविषं विषान्तरप्रयोगः। मृतसंजीवनं विषेण मृतस्यामृत इव संजीवनकरं भेषजम्। CK.
4. प्रकृतिरिति देहधात्वादिस्वभावः। CK.
5. उपधिर्यो मूर्ध्नि काकपदं कृत्वा विषहरणाय दीयते। CK.
6. अवमार्जनमिति विषस्य प्रतिलोमेन मार्जनम्। CK.
7. स्वेदो यद्यपि प्रतिषिद्धः स्वेदाध्याये, तथाऽप्यवस्थाविशेषे " वातस्थाने" इत्यादिना विधीयते। स्वेदस्तु पेयादिभोजनादिविधानवदस्य प्रयोगाच्चतुर्विंशत्युपक्रमेषु नोक्तः, किंवा, अग्निशब्देन स्वेदोऽपि गृह्यते, पेयादि चोपशमनशब्देनावश्यं बोद्धव्यम्।CK.
8. सिरा इति सिराव्यधः कर्म पंचविधं वमनादिः किंवा सिराकर्म पञ्चविधमिति पञ्चसिराव्यधः। CK.
9. दर्वीकरादीनां प्रपंचस्त्विह पराधिकारत्वेन न कृतः। CK.

made from the point of view of anurasa like presence of kaṭurasa in the sun or slight predominance of kaṭu etc. in anurasa itself.[1]

137-139. Earlier colour of bites are mentioned and here that of fangs is described. In fact, there is no any contradiction between the two as the earlier one relates to the poison located at the bite whereas he present one is related to that which is spread in the body.[2]

140-143. Particular mention of faeces and urine is made only because of giving two derivations of the word 'kīṭa' (kiṭṭāt kīṭāṇ) otherwise they are other sources of their origin as mentioned by Suśruta.[3]

In Suśruta-samhitā kīṭas have been described as sixty seven in number which aggravate vāta, pitta, kapha and sannipāta but here they have been said as of two types-dūṣīviṣa (chronic poisons) and prāṇahara (acutely fatal). Similar classification has been adopted in case of lūtā etc.[4]

144-146. Ck says that the interested people should see the details in the texts of Suśruta etc. Here they have not been given as they belong to other speciality.[5]

161-164. Even though in condition of anger the poison circulates all over the body of the serpents, it is particularly situated in fangs like semen which though pervading the whole body is situated particularly in testicles.[6]

GD clarifies it further.[7]

175-188. In dog where tridoṣas are aggravated and alarka-graha seizes symptoms of poisoning headache etc. are found. Some say that these symptoms are also transmitted to the patient bitten by it.[8]

---

1. विषं च यद्यप्यव्यक्तरसमुक्तं, तथापीह कटुकादिरसाभिधानमनुरसाभिप्रायेण ज्ञेयं, यथा आतपे कटुकत्वं, तद्वदिहापि, किंवा, अव्यक्तरसतायामेव मनाक्कटुकादीनामधिकत्वं ज्ञेयम्। CK.
2. ननु पूर्वं दर्वीकरादीनां दंशस्य वर्णभेद उक्तः, इदानीं तु दंष्ट्राभेदेन वर्णभेद उच्यते......अत्रोच्यते दंष्ट्रानुकारिवर्णता दंशमात्रस्थिते विषे भवति, दर्वीकराद्युल्लेखविहितस्तु यो वर्णो दोषकृतः सप्रविसृते विषे भवतीति अवस्थाभेदान्न विरोधः। CK.
3. विण्मूत्रादिति कीटशब्दनिरुक्त्यर्थमनयोरुपादानं, तेनान्यान्यपि सर्पशुक्रशवपूत्यण्डानि कीटकारणानि भवन्तीति ज्ञेयम, उक्तं हि सुश्रुते...... । CK.
4. कीटाश्च यद्यपि सुश्रुते वातपित्तकफसन्निपातकोपनाः कुम्भीनसादयः सप्तषष्टिः प्रतिपादिताः, तथाऽपीह संज्ञेयाभिधित्सया दूषीविषप्राणहरभेदेनैवोच्यन्ते, एवं लूतादिष्वपि संज्ञेयभेदाद् द्वैविध्योक्तिर्ज्ञेया। CK.
5. ....तासां....सुश्रुतादिषु प्रपञ्चार्थिभिः प्रपञ्चोऽनुसरणीयः, इह तु तन्त्रकारेण पराधिकारत्वात् प्रपञ्चो न क्रियते। CK.
6. सर्वदेहाश्रितं क्रोधादिति सर्वेहाश्रितमपि दंष्ट्रास्वेव विषं विशेषेण ज्ञेयम् , यथा शुक्र सर्वशरीरगमपि वृषणयोरेव विशेषेणाधितिष्ठति। CK.
7. शुक्रवत् सर्वदेहगतं विषं सर्पः क्रोधाद् दंष्ट्रास्वागतं विमुञ्चति। GD.
8. यत्रैव च शुनस्त्रिदोषकोपो भवति दैवादलर्कग्रहावेशात् तत्रैव सविषशिरोभितापित्वादि भवतीति ज्ञेयम्। केचित्तु शिरोभितापादि यथोक्तं कुक्कुरे तथा तद्दष्टे च भवतीति वदन्ति। विस्तरश्चास्य सुश्रुत एव। CK.

GD reads "syāt" in place of "śvā".

229-242a. Ck says that one māṣa (gram) of unkilled copper powder should be given as this only causes emesis.[1]

1. सूक्ष्मित्यादौ अमृतताम्रचूर्णं माषमानं यावद् देयम्, अमृतेनैव वमनं भवति। CK.

CHAPTER XXIV

1-2. Because of similarity of causing mental derangement and other toxic symptoms, the treatment of alcoholism follows that of poisons.[1]

3-5. Praise followed by censure of wine shows that it produces good results if taken methodically otherwise it causes harmful effects.[2] It is called 'surā' because it is related to 'sura'[3] (gods).

6. 'Yoni' means source such as cereals etc. as described in sūtrasthāna.[4]

11-20. 'Saṃskāra' (processing) means external as well as internal. The former by bath, clothing etc. and the latter by intake of food according to constitution.[5] Ck has given examples of 'arthin' (needy) as Baladeva, Caṇḍī, Yakṣa etc.[6]

21-25. 'Mārdvīka' and 'mādhava' (v. 25) are related to kapha and pitta in reverse order e.g. mādhava in kapha and mārdvīka in pitta.[7] GD reads 'mādhvīka' insteed of 'mārdvīka'.

26-28. There are merits as well as demerits in wine. According to suitability, it is wholesome to some persons while unwholesome to others. In first stage it is useful while in the second one it is harmful.[8]

It becomes 'viṣavat' poison-like because of producing mental confusion etc.[9]

29-36. Wine affects with its ten properties all the ten properties of ojas, not two or three of them.[10] Differentiating between the properties 'āśuga' and 'vyavāyī', Ck says that āśuga is that which moves fast whereas vyavāyī pervades everywhere[11]

---

1. मोहजनकत्वसामान्यात् तथा विषसमानगुणजन्यत्वाच्च विषचिकित्सितमनु मदात्ययस्य चिकित्सितमुच्यते। CK.
2. सुरैरित्यादिना मदिरास्तुत्या तथा वक्ष्यमाणनिन्दया विधिना पीयमानसुरायाः शुभफलमविधिपानाच्चात्यर्थनिन्दितफलवत्त्वं दर्शयति। CK.
3. सुरयोगात् सुरेति चोपदिष्टा। CK.
4. योनिः कारणं, तद्विशेषाः-धान्यफलमूसारपुष्पपत्रकाण्डत्वचः शर्करानवमाः सूत्रस्थानोक्ताः। CK.
5. शरीरे स्नानवस्त्रादिभिर्बाह्य आभ्यन्तरश्च प्रकृत्याद्यपेक्षया स्निग्धोष्णादिभिः कृतः संस्कारः। CK.
6. अर्थिनो बलदेव-चण्डी-यक्षादयः। CK.
7. कफपित्ताधिकेभ्य इत्यादौ विपर्ययतन्त्रयुक्त्या कफाधिकेभ्यो माधवं, पित्ताधिकेभ्यस्तु मार्द्वीकम्। CK.
8. यस्मादेवं स्वभावं तस्माद् गुणदोषे च तं मद्यमपेक्षेते, किंचित् पुरुषमपेक्ष्य यौगिकत्वाद गुणकरं, किंचित्त्वयौगिकत्वाद्दोषकरं, यथा-प्रथमे मदे गुणकरं, दोषकरं च द्वितीये मदे इति भावः। CK.
9. विषवदिति मोहादिकर्तृत्वात्। CK.
10. दशापि गुर्वादीनोजोगुणान् संक्षोभ्य, न द्वित्रादिकैः। CK.
11. आशुगत्वव्यवायित्वयोश्चायं विशेषः-यदाशुगं शीघ्रं गच्छति, व्यवायि तु सर्वव्यापकम्।

'Vikāsī' is 'khara' which being opposite to 'ślakṣṇa' counteracts it.[1]

Though vikāsī, āśuga etc. are not read among twenty (gurvādi) guṇas, their nature as guṇa is established because of infinite number of guṇas. Only the prominent ones are enumerated among twenty.[2]

Passages (ten dhamanīs) of rasa, vāta etc. are attached to hṛdaya. Dhamanīs carrying rasa also carry vāta etc. though sattva etc. are present all over the body, they are mainly seated in hṛdaya.[3]

37-38. Commenting on the word "avihate" Jejjaṭa says that here is "a" for "īṣat" (slight) or it may be taken as exception to the general rule.[4] Ck takes it as exception.[5] The word 'hṛt' here includes buddhi etc. the awakening of buddhi etc. in the first stage is due to specific action of wine.[6]

41-51. There are only three stages of narcosis in which sattva, rajas and tamas are predominant respectively.[7]

Ck elucidating it further says that though three stages of narcosis are described, there is a distinct phase after the second stage and in the beginning of the third one which has been despised badly. Thus all these phases come under the three stages and as such there is no fourth stage.[8] This intermediate stage between second and third one, is not mentioned by Susruta.[9]

52-60. Here wine has been censured according to one of the views (v. 52-57). Author's view has been given from 'satyam' onwards (v. 58-60). The idea is that these demerits are observed in wine when it is used improperly and not otherwise.[10]

---

1. विकासित्वं विकसनशीलत्वं खरत्वमिति यावत्। तच्च श्लक्ष्णविपरीतत्वादेव श्लक्ष्णतां हन्ति। CK.
2. एते विकासित्वाशुगत्वादयो गुणा यद्यपि विंशतिगुणगणनायां न पाठितास्तथाऽसंख्येयत्वाद्गुणानामेषामपि गुणत्वं सिद्धं, ये तु तत्र पठितास्ते तावदाविष्कृततमा ज्ञेयाः । CK.
3. रसवातादिवहानां दशधमनीनां हृदयं स्थानम, रसवहा एव या दश धमन्यो हृदयाश्रया उक्तास्ता एव वातादिवहाः । .....सत्त्वादीनान्तु सर्वशरीरचराणामपि विशेषेण हृदयं स्थानमुक्तम्। CK.
4. यथा अल्पाशने अनशनमल्पबललाभे च अबलवत्वम् , अल्परात्रिस्वप्ने च सकलरात्रिजागरणवत्। अथवा परिकल्प्यापवादविषयं मुनिना उत्सर्गशास्त्रं प्रवर्तितम्। JJ.
5. मद्यं चेतो विक्रियां नयतीत्युत्सर्गविधेः प्रथममदेऽपवादमाह। CK.
6. हृदयशब्देनेह तस्योपचाराद् हृदयाश्रिता बुद्ध्यादयोऽभिधीयन्ते।.......बुद्ध्यादिबोधनं प्रथममदकार्यं मद्यस्य प्रभावात्। CK.
7. तस्मात् त्रय एव मदाः.....ततश्चाद्यया मदवृत्त्या सत्ववृत्तिः.......द्वितीयया तु रजोवृत्तिः....तृतीययाविर्भूतया तमोवृत्त्यावरणलक्षणकाष्ठप्राप्त्या.....निष्क्रियः । JJ.
8. यद्यपि त्रिविधो मद उक्तः, तथापि द्वितीयमदावसाने तृतीयमदाप्राप्त्यवस्थाया एव अत्यर्थनिन्द्यतां दर्शयन् तृतीयमदस्यात्यन्तनिन्द्यतां दर्शयति....परमार्थतोऽन्यमदकालाभावाद् द्वितीयान्ततृतीयमदाद्यभिधानमेवात्र तृतीयमदात्यर्थनिन्दार्थं, न चतुर्थमदोपदर्शनम्।CK.
9. सुश्रुते तु नैष सन्धिमद उक्तः । CK.
10. प्रेत्य चेहेत्यादिना एकीयमतं मद्यनिन्दकं दर्शयति....सत्यमित्यादिना स्वमतमाह। एते दोषाः मद्यस्यैकीयमतोक्ता अहितादिधर्मयुक्तस्यैव भवन्ति, न हिताल्पमात्रविधिपीतस्येति भावः । CK.

'Yuktiyuktam' means 'planned according to place, time, doṣa etc.'[1] 'Prāṇa means 'that which promotes vitality'.[2]

61. All these qualities are in the first stage of intoxication.[3]

62-67. Explaining the utility of wine in the diseases caused by itself (v. 64), Jejjaṭa says that wine is contrary to both doṣa and vyādhi.[4] (disease). Ck, however, takes it as hetuviparītārthakārī (producing effect contrary to cause) due to prabhāva.[5] That wine possesses both hypnotic and awakening effect is due to its specific nature which provides normal sleep. Or it may be acting be acting by counteracting the causes of sleeplessness and by removing the obstructions in the psychic channels.[6]

The word 'pravayasam' is interpreted as 'old persons' by both Jejjaṭa and Ck but GD takes it as 'youthful ones'.[7]

68-73. Division of food and drinks into three is made by Jejjaṭa and Ck according to three doṣas but GD interprets them in a different way.[8] The principle of proper application of wine is that it should be contrary to the properties of food etc. such as after taking vāta-promoting food anti-vāta type of wine should be taken.[9]

80-87. Commenting on 'madyapānvayah' Jejjaṭa says that those born in family of alcoholic addicts are more or less immune to the effects of alcohol like the poison-girl who does not have the effect of poisons.[10]

Ck follows the same.[11]

---

1. युक्त्या देशकालमात्राद्यपेक्षया योजनया युक्तम्। CK.
2. प्राणहेतुत्वात् प्राणाः । CK.
   प्राणाः प्राणहेतुः, आयुर्धृतमितिवत्। GD.
3. सुखमदप्रदमिति सुखप्रदमदं, प्रथमं मदमिति यावत्। अन्ये तु, "मदसुखप्रदम्" इति पठन्ति, तत्रापि मदसुखं प्रथममदारम्भ एव। CK.
4. मद्यन्तु नानाद्रव्यसंयोगादुभयविपरीतम्। JJ.
5. मद्योत्थानां च रोगाणां मद्यमेव प्रबाधकमिति हेतुविपरीतार्थकारिताप्रभावादित्यर्थः । CK.
6. स्वापनं नष्टनिद्राणां बोधनं चातिनिद्राणामिति कार्यद्वयकरणमुचितनिद्राकरत्वप्रभावादेव, किंवा नष्टनिद्राणां निद्राभिघातहेत्वतिचिन्तनादिविस्मारकतया निद्राकरं भवति, अतिनिद्राणां निद्राहेतुमनोवहस्रोतोरोधादिहन्तृतया प्रबोधकं भवतीति ज्ञेयम्। CK.
7. प्रवयसः वृद्धाः । JJ.
   प्रवयसामिति वृद्धानाम्। CK.
   प्रवयसां यूनाम्। GD.
8. त्रीण्यन्नानि अशितखादितलीढानि पार्थिवाप्यतैजसानि गुरुलघुमिश्राणि शीतोष्णमिश्राणीत्येवमादीनि। तथा त्रीणि पानानि पार्थिवाप्यतैजसानि-तत्र पार्थिवमिक्षुरसादि, आप्यं क्षीरजलादि, तैजसं घृतादि। GD.
9. तदपि वातादिप्रकृतयो विपरीतगुणं मद्यं पिबेयुः । JJ.
   वातकरमन्नमुपयुज्य वातहरं मद्यं पेयम्। CK.
10. यस्य यद्यद्बीजमभिभावितं तदुत्पादकं तस्य मद्यपान्वयस्य सात्मीभावमासाद्य न मदयति मद्यम् , यथा विषकन्याया विषं सात्मीभावागतं यथास्वं च विषवताम्। JJ.
11. मद्यपान्वया इति मद्यपवंशजाः, तेषां मद्यपानं मद्यसात्म्यत्वादेव न विकारकरं भवति, विषकन्याया विषमिव। CK.

88-97. 'Prāyaḥ' in 'vātaprāya' indicates that all the types of madātyaya are caused by tridoṣa with predominance of one of the doṣa.[1] Pitta and vāta when combined cause emergent effects and kill the patient unless treated properly like rohiṇī and śaṅkhaka etc.[2]

98-100. Though wine is sour and poison unmanifest sweet, most of the properties are similar.[3]

101-106. Here general symptoms of alcoholism are described in v. 101-104a and prodrome in v-104b-106a but the last line does not support it.[4]

Ck says that it may be the general description of alcoholism or symptoms of tridoṣaja type of the disease.[5]

107-111. The disease is to be treated first from the seat of kapha as it arises from that like sannipāta jvara.[6]

Commenting on 'samapītena tenaiva' Ck says that alcoholism is subsided by intake of the same type of alcohol which has caused it but others hold that different type of alcohol is used in its treatment as in case of poisoning where vegetable poison

1. वातप्रायमिस्यादौ प्रायःशब्देनाधिकवाचिना वक्ष्यमाणानां सर्वमदात्ययानां त्रिदोषजन्यत्वं दर्शयति। CK.
2. पित्तप्रकोपो वातोल्वणस्य यतश्चाग्निमारुतौ दहतः शीघ्रमथ संद्यःफलां क्रियामाप्नुतस्तदा द्राक् झटित्येव शान्तिमधिगच्छतः; एवं स्वभावोऽन्येषामपि रोहिणीशङ्खकादीनाम्।.......तस्मात्तात्कालिकं भेषजं प्राप्य सद्यः प्रशान्तिं व्रजति अप्राप्य च हन्तीति। JJ.
3. यद्यपि मद्यमम्लं, विषं त्वव्यक्तमधुरं, तथापि बहुगुणसामान्यात् त एव मद्ये दृश्यन्त इत्युक्तम्। CK.
4. सामान्येन सर्वमदात्यानां रूपं दर्शयति "शरीरदुःखं बलवत्" इत्यादि यावत् "छर्द्यतीसारहृल्लासाः," एतानि पूर्वरूपाण्यामनन्ति व्याख्यातारः 'भ्रमः प्रलापः," इत्यादि यावत् "अशस्तानां स्वप्नानां दर्शनानि च" इति। आह एवं खल्वेष पाठो निरर्थकः स्यात् "मदात्ययस्य रूपाणि सर्वाण्येतानि लक्षयेत्" इति। JJ.
5. शरीरदुःखमित्यादिना सर्वमदात्ययस्य सामान्यं लक्षणं ब्रूते, किंवा त्रिदोषमदात्ययस्य लक्षणम्। CK.
6 कफस्थानानुपूर्व्या चात्र चिकित्सा कफस्थानोद्भूततया प्रथमं कफसंबन्धात् सन्निपातज्वर इव ज्ञेयः। CK.

is used in treatment of animal one and vice versa. Ck concludes in favour of both.[1]

Jejjaṭa says that the same type should be used not the other one as Suśruta also says.[2]

112-116. Some read 'amlarasotkleda' instead of 'annarasotkleda'.[3]

117-135. 'Madodayāḥ' means 'thirst etc. caused by mada'. Some read 'jvarādayaḥ', instead of 'madodayāḥ'.[4]

Why mada is pacified by madya itself is answered on the basis of nature.[5]

'Avadaṁśa' is the food material which is taken before drink.[6]

136-164a. 'Anutarṣa', as interpreted by Ck, is anupāna (post drink) given frequently.[7] In fact, 'anutarṣa' is drink used to quench thirst whereas 'anupāna' is a general post drink,

1. यज्जातीयेन मद्येन मदात्ययो जनितः, नितरां तज्जातीयेनैव शाम्यति। यथा मौलं दंष्ट्रीयेण शाम्यति तथा मद्यमपि विजातीयेन मद्येन शाम्यतीत्येके: किन्तु तेनैवेत्यनेन तामेव मद्यजातिं प्रत्यवमृशति, तेनावश्यं तज्जातीयमेव मद्यं ज्ञेयम्।.....तेन तज्जतीयमन्यजातीयं च मद्यं मदात्यये ज्ञेयम्। Ck.
2. तेनैवेति विशिष्यैवाभिधानात्, तदेव दातव्यं नान्यदिति सौश्रुतेऽप्येवम्। JJ.
3. "अन्नरसोत्क्लेद" इत्यत्र "अम्लरसोत्क्लेद" इति केचित् पठन्ति। CK.
4. मदोदया इति मदनिमित्तास्तर्षादयः। केचित्तु "ज्वरादयः" इति पठन्ति, तत्र ज्वरप्रधानास्तर्षादय इत्यर्थ उन्नेयः। CK.
5. ननु कस्मान् मद्येनैव शाम्यति, कात्र युक्तिः? स्वाभाव्यात्। तस्य हि रोगस्यैष स्वभावो यन् मद्येन शाम्यति यथा तर्पणेन रक्तपित्तं, ज्वरश्च पेयादिभिः। JJ.
6. अवदंशो यमुपयुज्य मद्यं पीयते। CK.
7. अनुतर्षस्येति मुहुर्मुहुर्दीयमानानुपानस्य। एतेन तृषायां मनोदैन्यमात्रहन्तृ यन् मद्यं भवति तदनुतर्षसंज्ञं भवति। CK.

CHAPTER XXV

10. Vāta etc. aggravated by general causes produce particular disorder of vraṇa (wound) due to specific pathogenesis.[1]

22-23. The word 'indriya' here denotes 'indriyādhiṣṭhāna (location of senses) as the former can't be known from inispection.[2] Though the role of anumāna has been made subsidiary here, it is indicated by 'darśana' etc. because inference follows perception and is applied in ultra-sensory objects.[3] The word 'darśana' denotes all the means of perception such as odour etc. Explicit mention of 'sparśa' is because of its wide application.[4]

31-55. The word 'doṣa' here is used in wider sense and denotes factors which cause disorder in wounds.[5]

39b-43. Here surgical operations are said as of six types whereas in śalyatantra they are of eight types. All are included in these six. Or extraction is instrumental work and so is probing an accessory one.[6] Avapīḍana' is pressing to ooze out pus by application of some paste etc.[7] By the word 'taila' ghrta is also taken.[8] Thus taking both oil and ghee it becomes four but looking to its two types of action-purification and healing-the word 'dve' is given. In Kashmir recension, there is 'dvau snehau tadguṇau'.[9] In śalyatantra sixty surgical measures are describved, they all are to be included in these thirty six ones.[10]

---

1. सामान्यवातादिहेतोस्तु विशिष्टव्रणलक्षणकार्योत्पत्तिः सम्प्राप्तिभेदाद् भवतीति ज्ञेयम्। CK.
2. ननु इन्द्रियाणां चक्षुषा परीक्षा नोपपद्यते.......अधिष्ठानानामिन्द्रियशब्दप्रवृत्तिः। JJ.
3. अनुमानं च यद्यपि परीक्षाधिकारे प्रोक्तं....तथाऽप्यत्रानुमानस्य प्रायो व्यापाराभावादनुपादानमिति ब्रूते, किंतु दर्शनादिपूर्वकत्वादनुमानस्य दर्शनादिना अनुमानमप्यतीन्द्रियादिषु ग्राहकं संगृहीतमिति युक्तं पश्यामः। CK.
4. दर्शनशब्दश्चात्र साक्षादुपलब्धिवचनः, तेन व्रणगतगन्धेनापि व्रणपरीक्षणं संगृहीतं भवति। दर्शनशब्देन च गृहीतोऽपि स्पर्श इह भूयसा व्याप्रियमाणत्वात् पुनरुक्तः। CK.
5. कल्पान्तरेणेति व्रणदुष्टिकारककरणयोगभेदेन स्नायुक्लेदादिना। CK.
6. ननु च शल्यतन्त्रे (अष्टविधमुक्तम) त्र कस्मात् षड्विधमेव मन्यते, एष्वेवान्तर्भावात्। अथवाऽऽहरणं यन्त्रकर्म न शस्त्रकर्म, एषणमपि शस्त्रकर्माङ्गं न साक्षाच्छषड्विध शस्त्रकर्मेति पाटनादि, अत्रैवाहरणमेषण च शल्यतन्त्रोक्तमाधिकं कर्मद्वयमन्तर्भावनीयं, किं वेषण शास्त्रकर्मांग न शस्त्रकर्म, तत्तु पृथगेव। CK.
7. अवपीडनं सूक्ष्माततानां कलायादिकल्कैर्निःस्नेहैरालेपः शुष्कोऽवपीड्य पूयं बहिर्निष्कासयति यत्तदवपीडनम्। JJ.
   अवपीडनं कल्कादिना आलेपनं पूयनिर्गमनार्थम्। CK.
8. तेन तैलेन घृतोपचार इत्यनवद्यम्। JJ.
   घृतस्यापि स्नेहत्वसामान्यात् तैलेनैव ग्रहणम्। CK.
9. तेन यद्यपि चत्वारि तैलघृतानि प्रत्येकशोधनरोपणभेदाद् वक्ष्यति, तथापि शोधनरोपणकर्मद्वयकर्तृतया द्वित्वमेवात्र तैलघृतयोर्गणनीयम्। काश्मीरास्तु "द्वौ स्नेहौ तद्गुणौ" इति पठन्ति। CK.
10. एवं षट्त्रिंशदुपक्रमाः भवन्ति, शल्यतन्त्रे तु षष्टिरुपक्रमाः उक्तास्तेऽप्यत्रैवान्तर्भावनीयाः। CK.

Ck reads 'patra' separately from 'chādana'[1] while GD omits 'eṣaṇam'. In the former case, 'bhojyam' will have to be read as 'yojyam' to complete the number thirty six. Other surgical measures mentioned in the chapter tisraiṣaṇīya (su. 11) are included in these six.[2]

63-65a. Ck takes 'balādika' as 'vijayā etc.'[3] (mentioned in v. 47) because he interprets 'vijayā' as 'balā' but it does not seem to be correct. GD is right in taking it as the group 'balā etc.[4] (v. 75-76).

72-79. The balādi formulation (v. 75b-76) is to be used as paste by mixing all the constituents for formulation. Some prepare it by cooking because of its solid form it is called 'snehaśarkarā.[5]

Jejjaṭa interprets it as 'sugar predominated by sneha'.[6]

GD further clarifies that bee-wax combined with sugar should be one-fourth.[7]

95-96. In these two all the fourteen types of bandaging are included.[8]

107-109. Though alkali is not read under the therapeutic measures it is understood by 'śastra' etc. and as such is described here.[9]

---

1. पत्रं छादने इति पत्रमेक उपक्रमः, छादनं तु द्विविधम्। CK.
2. ननु च तिस्रैषणीये शस्त्रप्रणिधानं....एष्वेवान्तर्भावात्। JJ.
"षड्विधशस्त्रकर्मणि तिस्रैषणीयोक्ताधिकदारणादिशस्त्रकर्मावरोधो बोद्धव्यः, तेन न विरोधः। CK.
3. बलादिकं "विजया मधुकं वीरा" इत्यादिना शोथहरोपक्रमोपदिष्टम्। CK.
4. बलादिकं वा बलागुडूचीत्यादिना वक्ष्यमाणम्। GD.
5. अत्र बलादीनि पिष्टानि शर्कराक्षीरमधूच्छिष्टतैलादिभिः समैरुत्कारिकां कृत्वा स्वेदः कर्तव्यः, अन्ये तु बलादिकल्केन तैलादिस्नेहं चतुर्गुणे क्षीरे साधयित्वा स्नेहपादिकं मधूच्छिष्टप्रक्षेपमाहुः। स्नेहस्यात्र संहतावस्थितत्वात् मधुशर्करावत्" स्नेहशर्करा" इति व्यपदेशः। CK.
6. स्नेहप्रधानाः शर्कराः स्नेहशर्कराः। JJ.
7. स्नेहशर्करेति वचनादत्र प्रक्षेप्या शर्करा मधूच्छिष्टं मिलित्वा पादिकमिति। GD.
8. द्विविधेऽप्यस्मिंश्चतुर्दशाप्यनुप्रविष्टाः बन्धाः द्रष्टव्याः स्वस्तिकादयः। JJ.
अत्रैव शल्योक्तचतुर्दशबन्धावरोधः कार्यः। CK.
9. यद्यप्युपक्रमेषु क्षारः पृथङ्न पठितः तथाऽपि शस्त्राग्निव्यापारकर्तृत्वाच्छस्त्राग्न्युपक्रम गृहीत एविति कृत्वा.....क्षारोऽपि विहितः। CK.

CHAPTER XXVI

1-2. The word 'trimarma' denotes the three important vital organs-šira (brain), basti (kidney) and hṛdaya. (heart). This chapter deals the disorders relating to them.[1]

3-4. By the afflication of heart etc. vital breath is also affected and as such they are called as the seat of vitae.[2]

Jejjaṭa takes 'asu' as prāṇa', apāna etc. (types of vāyu) or prāṇa as described in other texts.[3]

5-10. How it is that apāna aggravated creates obstruction to itself It is true like mind which controls itself.[4]

17. 'Teṣāṃ vighāte' is interpreted as 'in case of fail ure of the above remedies'[5] but it may also simply mean' in case of obstruction of these (urine, faeces and flatus). In udāvarta, pitta and kapha are aggravated through vāyu itself.[6] The word 'praguṇa' is interpreted by GD as 'absence of abnormality'.[7]

18. 'Prasannā' is the clear upper portion of wine.[8]

31. Four types of aśmarī are described here. In other texts it is explicitly said as of four types.[9] Though all aśmarī is caused by tridoṣa, it is only to indicate the predominance of one or the other doṣa that it is called as vātaja etc.[10] Secondly, kapha makes the nucleus of aśmarī in vātaja as well as pittaja types. Suśruta has clearly siad all the aśmarīs as dependent on kapha.[11]

---

1. शिरोबस्तिहृदयमर्मरोगचिकित्साभिधानार्थं त्रिमर्मीयचिकित्सित उच्यते। त्रिमर्मशब्देन हि त्रिमर्माश्रिताः रोगास्तेषामुपचार श्चाभिधीयते। CK.
2. हृदयाद्युपघातेन यस्माद् विशेषतः प्राणोपघातो भवति, तस्माद् हृदयाश्रिताः प्राणा उच्यन्ते, यथा भित्त्युपघातोपहन्यमानं चित्रं भित्त्याश्रयमुच्यते। CK.
3. असवः प्राणापानादिवायवो गृह्यन्ते, अथवा तन्त्रान्तरपठिताः प्राणाः गृह्यन्ते। JJ.
4. ननु कथमपानः कुपितोऽपानस्यैव संगं करोतीति मारुतसंगशब्देनोच्यते। ब्रूम........यथा मन मनोनिग्रहं करोति। CK.
5. तेषां विघाते इति फलवर्तिचूर्णानामुक्तानां कार्याकरणे। CK.
   तेषां वर्तिचूर्णानां विघातेषु। GD.
6. उदावर्ते पित्तकफौ वातकोपितावेव ज्ञेयौ। CK.
7. विगुणभावाभावः प्रगुणः। GD.
8. प्रसन्ना मद्योपरि स्वच्छः भागः। CK.
9. चतुष्प्रकारानप्यश्मरीरोगानाह। तन्त्रान्तरेऽश्मर्यस्तु वातपित्तकफशुक्रजा उक्ताः। CK.
10. यद्यपि सर्वाश्मरीषु दोषत्रयजन्यत्वमस्ति............ तथाप्युत्कटैकदोषाभिप्रायेण वातजादिव्यपदेशो ज्ञेयः। CK.
11. वातजायामश्मर्यां प्रबलेन वायुना मूत्रशोषे क्रियमाणे तद्गतः कफ एवाश्मरीरूपः क्रियते। एवं पित्ताश्मर्यामपि ज्ञेयम्। अत एव सुश्रुते श्लेष्माधिष्ठानाः सर्वा एवाश्मर्य उक्ताः। CK.

32-34a. Forms of calculus may be interpreted according to doṣa such as that simulating kadamba flowers or having trangular shape is vātika, as smooth stony paittika and as soft due to kapha and semen.[1]

GD, however, takes it in a general way.

36b-37. Interpreting 'kṣayādvā prakopitam' Ck says-'on deficiency of semen due to excessive sexual intercourse aggravated vāyu carries blood to basti.[2]

Thus eight types of mūtrāghāta mentioned in sūtrasthāna are included in mūtrakṛcchra here. Similarly the thirteen types of mūtrāghāta may be included like eleven types of kṣudra kuṣṭha.[3]

The difference between mūtrāghāta and mūtrakṛcchra is as follows-in mūtrakṛcchra urine comes out with difficulty whereas in mūtrāghāta it is suppressed or totally obstructed. In Suśruta also, this difference is indicated by describing them in different chapters. Others take mūtrāghāta as particular form of mūtrakṛcchra and as such is included in that and not described separately.[4]

GD says that here mūtrāghāta is described by the name of mūtrakrcchra. The other types of mūtrāghāta, vātabasti etc. will be described later on (in siddhisthāna).[5]

51. Tridoṣaja mūtrakṛcchra is to be treated at first from the seat of vāyu and not that of kapha as in case of tridoṣaja jvara.[6]

52-65. Though madya is already taken by 'amla', it is repeated (v-58) because of its pronounced lithontriptic action due to diuretic property.[7]

66-68. In 'śvadaṃṣṭrādighṛta', (v. 67) some take juice of śvadaṃṣṭrā also as eight times but this is not correct. Juice, as a rule, should be taken equal to sneha.[8]

1. कदम्बपुष्पाकृत्यादयो विशेषाः यथायोग्यतया दोषभेदादुन्नेयाः। तत्र वातेन कदम्बपुष्पाकृतिस्त्रिपुटी च, पित्तेनाश्मतुल्या श्लक्ष्णा, मृद्वी कफेन शुक्रेण च। CK.
2. क्षयाद्वा प्रकोपितमिति अतिव्यवायाच्छुक्रक्षये सति वायुनोदीर्य बस्तिमानीतम्। CK.
3. एवं सूत्रस्थानोद्दिष्टा अष्टौ मूत्राघाता मूत्रकृच्छ्रशब्देनेह निर्दिश्य व्याकृताः। ये तु त्रिमर्मीय सिद्धौ त्रयोदश मूत्रमघाता वक्तव्यास्ते सूत्रस्थानेऽसूत्रिता अपि एकादशक्षुद्रकुष्ठवदन्तर्भावनीया। CK.
4. मूत्राघातमूत्रकृच्छ्रयोश्चायं विशेषः-यन्मूत्रकृच्छ्रे मूत्रं कृच्छ्रेण वहति, मूत्राघाते मूत्रं शोष्यते प्रतिहन्यते वा। सुश्रुतेऽपि च मूत्रकृच्छ्रमूत्राघातयोर्विशेषोऽध्यायभेदेनैवोक्तः। अन्ये तु मूत्रकृच्छ्रविशेषनेव मूत्राघातानाहुः, यथायोग्यतया वातपित्तादिचतुर्षु मूत्रकृच्छ्रेषु मूत्राघातानन्तर्भावयन्ति, तेन न पृथङ्मूत्राघाताभिधानम् CK.
5. वातवस्त्यादयो मूत्राघातसंज्ञकाः सुश्रुतोक्ताः दर्शयिष्यन्तेऽत ऊर्ध्वमिति। इति मूत्रकृच्छ्राव्यमूत्राघातनिदानमुक्तं भवति । GD.
6. तच्च समेष्वपि दोषेषु वायोः स्थानानुपूर्व्या चिकित्सितं कर्तव्यं, न ज्वर इव त्रिदोषभैव कफस्थानानुपूर्व्या कर्तव्यम्। मूत्रकृच्छ्रस्य समत्रिदोषारब्धत्वेऽपि वातस्थानभवत्वेन वायुरेव प्रथमं चिकित्स्य इति भावः। CK.
7. मद्यं चाम्लग्रहणगृहीतमपि बस्तिशोधनत्वादश्मरीभेदकत्वप्रकर्षख्यापनार्थं पुनरुच्यते। CK.
8. घृतं श्वदंष्ट्रेत्यादौ साहचर्यात् केचिच्छ्वदंष्ट्रास्वरसमप्यष्टगुणं वदन्ति, तन्न, स्वरसः स्नेहसम एव स्नेहेषु भवति। CK.

GD, however, takes both milk and juice eight times.[1]

70-73. Some take 'vaivarṇya' etc. as complication while others take them as symptoms of hṛdroga.[2]

GD takes them as symptoms.[3]

74-82. Paste of nāgara etc. should be mixed in the decoction of pauṣkara etc.[4] (v. 78).

GD reads differently[5] and takes powder of nāgara etc. to be mixed in the above decoction.[6]

83-88. Honey one-fourth should be added after the preparation of ghee is completed (v. 87).[7]

89.92. In decoction of udumbara etc. (v. 91), the powder of trikaṭu and trivṛt should be added in proportion of one-fourth.[8]

The word 'kalpa' denotes ordinary rasāyana.[9]

93. Laṅghana is prescribed because hṛdaya is seat of kapha.[10]

97-100a. 'Pratiśyāya' is first described because it is chief among the diseases of head and is also cause of numerous head diseases.[11] Though it is already described under the treatment of rājayakṣmā, here it is described independently[12]

100b-102. Those who do not describe mouth diseases separately include them in head diseases.[13] Details of these diseases may be seen in śālākya etc[14]

103-110. 'Mastuluṅga' (v. 105) interpreted as 'mastiṣka'.[15]

1. श्वदंष्ट्रास्वरसेनाष्टगुणेन क्षीरेण चाष्टगुणेन सिद्धं घृतं पेयम्। GD.
2. हृद्रोगजा इति वचनाद्धृद्रोगानन्तरकालभावितया वैवर्ण्यादीनामुपद्रवत्वमिच्छन्ति, ये तु वैवर्ण्यादीनां सामान्यहृद्रोगलक्षणत्वमाहुः, ते हृद्रोगेण समं जायन्ते इति हृद्रोगजा इति विग्रहार्ल्लिगत्वं व्युत्पादयन्ति। CK.
3. हृद्रोगसामान्यलक्षणमाह–वैवरार्येत्यादि। हृद्रोगजा हृदोगे जायन्त इति। GD.
4. क्वाथः कृत इत्यादौ नागरादीनां कल्कं पौष्करादिक्वाथे प्रक्षेपमाहुः। CK.
5. 'सनागराजाजिवचायमानिः सक्षार उष्णो लवणश्च पेयः।' GD.
6. नागरादियमान्यन्तचूर्णयुक्तः पेयः। GD.
7. क्षौद्रान्वितमिति साधनोत्तरकालं पादिकमधुयुक्तम्। CK.
8. उदुम्बरादिक्वाथे भागत्रये त्रिवृत्त्र्यूषणचूर्णं पादिके प्रक्षेप्यम्। CK.
9. कल्पशब्देन च क्षुद्ररसायनमुच्यते। CK.
10. त्रिदोषजे आदौ लंघनविधानं हृदयस्य कफस्थानतया तद्गते त्रिदोषजेऽपि कफ एवादौ लंघनेन जेय इति मत्वा कृतम्। CK.
11. शिरोरोगप्रधानत्वाद् भूरिशिरोरोगहेतुत्वाच्च प्रतिश्यायमेव तावदाह। CK.
12. यद्यपि राजयक्ष्मचिकित्सिते प्रतिश्याय उक्त एव, तथापि तत्र यक्ष्मपूर्वरूपतयोक्तिः, इह तु स्वतन्त्रः प्रतिश्याय उच्यत इति विशेषः। CK.
13. अन्त्र मुखरोगं ये न पठन्ति ते शिरोरोगग्रहणेनैव मुखरोगस्य ग्रहणमिति मन्यन्ते। CK.
14. एषां तु दुष्टप्रतिश्यायक्षवथ्वादीनां शालाक्यादिषु विस्तरः, अत्र तु पराधिकारत्वात् संक्षेप एव। CK.
15. मस्तुलुंगादिति मस्तिष्कात्। CK.

111. Though these symptoms are described as those of head diseases caused by pratiśyāya, the same are of those originated independently.[1]

112-116. Here Caraka has mentioned sixty four mouth diseases according to Videha and not to Suśruta who says sixty five ones.[2] GD reconciles it in a different way.[3]

120-121. Diseases of ear are described in śālākya as twenty eight which are to be included here in these four types as they all are caused by vāta etc.[4]

122-124. There is controvarsy in enumeration of eye diseases-Videha takes seventy six, Karāla ninety six and Sātyaki eighty. Here the views of Karāla have been adopted.[5]

125. 'Tejas' means 'dehoṣmā' (body-heat). Those who read 'tejah savātam' (GD adopts this) take pitta also by tejas.[6]

126. 'Bheṣajasaṅgraha' is interpreted as 'the text describing bheṣaja[7] (drugs). It may mean the formularly.

127.136. In Pratiśyāya vairecanika dhūma is contra-indicated and not snaihika one.[8]

'Śṛṅgāṭa' (v. 132) is confluence of vessels supplying nose, ear and eye.[9] 'aṇu' means 'that which traverse minute passages.' This property is acquired by impregnation, cooking and compression.[10] Powder of yaṣṭīmadhu should be taken one-fourth of sesamum powder.[11]

137-150. Both Ck and GD adopt the reading 'siddham' (v. 137) but they interpret differently. Ck takes it processed with ginger whereas GD with pitta-eliminating drugs.[12]

151-158. In māyūra ghrta formulation, daśamūla etc. should be taken each three

1. भृशार्तीत्यादिना यद्यपि प्रतिश्यायोत्पन्नत्वेन शिरोरोगाणां लक्षणमुच्यते, तथापि स्वतन्त्रोत्पन्नानामपि शिरोगाणामेतदेव लक्षणं ज्ञेयम्। CK.
2. सुश्रुते पंचषष्टिमुखरोगा उक्ताः, तथापीह वैदेहमतानुसारेणाद्रान्तरेणेयं चतुःषष्टिः। CK.
3. चत्वारो ये मुखामयास्तत्र ते संस्थनदूष्याकृतिनामभेदाच्चैकश्चतुःषष्टिधा इति पञ्चषष्टिधा भवन्ति। GD.
4. एते च शालाक्ये यद्यप्यष्टाविंशतिरुक्ताः तथापीह चतुर्ष्वेव कर्णरोगेषु शेषाणामप्यवरोधो व्याख्येयः। CK.
5. नेत्रामयेषु आचार्याणां विप्रतिपत्तिः। नेत्ररोगाणां षट्सप्ततिं विदेहः प्राह, करालस्तु षण्णवतिम् , अशीतिं सात्यकिः प्राह। तेषु करालमतेनैवैतदभिधानम्। CK.
6. तेजःशब्देन देहोष्माऽभिमतः।.....ये तु "तेजः सवातं" इति पठन्ति, ते तेजःशब्देन पित्तमपि वर्णयन्ति। CK.
7. भेषजसंग्रहमिति भेषजाभिधायकं ग्रन्थम्। CK.
8. प्रतिश्याये धूमस्य निषेधो वैरेचनिकधूमाभिप्रायेण कृतः, तेनेह स्नैहिकधूमाभिधानं न विरोधि। CK.
9. घ्राणश्रोत्राक्षितर्पणीनां सिराणां सन्निपातः श्रृंगाटकः। CK.
10. अणुता चास्य अणुस्रोतोऽनुसारित्वात्, तच्चेह भावनया पाकभूयस्त्वेन निष्पीडनविशेषेण च क्रियते। CK.
11. यष्ट्याह्वचूर्णस्याप्रधानत्वात् तिलचूर्णात्पादिकत्वम। CK.
12. "पैत्ते सर्पिः पिबेत् सिद्धम्" इत्यन्त्र श्रृंगवेरसिद्धमेव सर्पिर्देयम्। CK.

palas and peacock also equal to that and boiled in water one droṇa reduced to a quarter which is four times of ghrta which is one prastha. Or daśamūla etc. 40 palas after mixing it with peacock 64 palas is to be decocted in water one droṇa. Or water should be given, as general rule, four times of the total decoctive e.g. daśamūla and mayūra taken together.[1] 'Madhura' denotes ten drugs of jīvanīya gaṇa because they are predominantly sweet.[2]

By the comm. it is clear that the reading accepted by Ck is "daśamūlabalārāsnāmadhukaistripalaiḥ saha"but it is printed as "daśamūlabalārāsnātriphalāmadhukaiḥ saha".

GD adopts the latter reading and has discussed the quantity of ingredients and water in detail. He says that flesh and bone of peacock together with daśamūla etc. should be boiled in eight times water reduced to one-fourth. In this decoction ghee should be cooked with equal quantity of milk.[3]

173-179. 'Śeṣayoṇ' (v. 174) has been interpreted by GD as 'in the remaining two types-sannipātaja and krimija[4] but according to context "śaṇkhayoḥ" is the appropriate reading because the context of sannipātaja and krimija types begin later (with v. 176).

180-198. 'Kālaka' (v. 189) is read as 'kānaka' by GD. Ck reads 'atṛṣṇasya' instead of 'satṛṣṇasya; (v. 196) and says that in case of thirst even the post-meal intake of ghee is contraindicated.[5] Though generally intake of sneha is contraindicated in tāluśoṣa, the particular administration of postmeal ghee is desirable.[6] 'Sirākarma' is venesection which is to be applied in palata and tongue.[7]

214-223. 'Gandhataila' (v. 218) means 'oil mixed with paste of fragrant substances' or 'sesamum oil kept in contact with fragrant substances'.[8] 'Madhuśukta' (v. 220) means vinegar prepared mainly with honey. Some take honey separately which is not correct on the authority of Jatūkarṇa.[9]

1. दशमूलादिभिः प्रत्येकं त्रिपलमानैः समं मयूरं.....जलद्रोणे एव पचेत्। जलद्रोणो ह्यत्र क्वाथार्थः पादावशेषः सन् घृतप्रस्थाच्चतुर्गुणो भवति। किं च दशमूलादीनां चत्वारिंशत्पलेन मयूरेणैकेन सममदूरान्तरं चतुःषष्टिपलं क्वाथ्यं द्रोणमाने जले देयम्। किंवा, दशमूलेन मयूरेण च मिलित्वा यावत् क्वाथ्यं भवति तच्चतुर्गुणं जलमुत्सर्गपरिभाषयैव देयम्। CK.
2. मधुरैरिति जीवनीयगणोक्तैर्दशभिः, जीवनीयानि हि मधुरत्वप्रकर्षादिह मधुरशब्देनोच्यन्ते। CK.
3. पक्षादिवर्जितं मायूरंमांसमस्थि च दशमूलादिभिः सह जलेऽष्टगुणे पक्त्वा चतुर्थांशशेषे तस्मिन् क्वाथे क्षीरसमं घृतप्रस्थं पचेत्। GD.
4. शेषयोः सन्निपातक्रिमिजयोः। GD.
5. अतृष्णस्येति पदेन तृष्णायुक्तस्य तालुशोषे औत्तरभक्तिकमपि सर्पिःपानं निषेधयति। CK.
6. तालुशोषे च....यद्यपि स्नेहपानं निषिद्धं, तथापीह औत्तरभक्तिकसार्पिर्विशेषविधानात् कर्तव्यमेव। CK.
7. सिराकर्मेति सिराव्यधनं, तच्च सुश्रुतवचनात् तालुनि जिह्वायां च कर्तव्यम्। CK.
8. गन्धतैलमिति सुगन्धद्रव्यकल्कयुक्तं तैलं, किंवा, गन्धद्रव्याधिवासितं तिलोद्भवं तैलम्। CK.
9. मधुशुक्तं....मधुप्रधानं शुक्तम,......अन्ये तु मधुशुक्तावुभावपि दापयन्ति, तत्र मधु तैलसमं, शुक्तं तु चतुर्गुणमिति वदन्तिः तन्नातिहृदयंगमम्, यतो जतूकर्णे मधु न पठ्यत एव, मधुनः शुक्तग्रहणेनैव गृहीतत्वात्। CK.

GD interprets (gandhataila) as 'oil kept in contact with flowers by perfume-dealers.'[1]

277-284. Though symptoms of the types, vātika etc., of svarabheda are not described here, they may be taken as described in the treatment of rājayakṣmā. Treatment is repeated because of the context.[2]

287. Doṣas, though possess mutually conflicting properties, do not antagonise each other because of their suitable adjustment by nature. There may be some reason behind it but it is inexplicable and as such there is no ground for logic. Therefore, the conclusions drawn by the author of Candrikā, Gayadāsa, in the Sušurta is not correct.[3]

GD explains it more eleborately. He interprets that doṣas are mutually 'sātmya' because they are 'sahaja' e.g. they originate together.[4]

---

1. गन्धतैलं गान्धिकैः कृतं पुष्पवासितं तैलम्। GD.
2. वातादिस्वरभेदलक्षणं यद्यपीह नोक्तं तथापि राजयक्ष्मचिकित्सोक्तमेव बोद्धव्यम्। यद्यपि तत्र चिकित्सोक्ता तथापीह स्वरभेदस्याधिकृतत्वात् पुनरप्युच्यते। CK.
3. सात्म्यीभावोऽनुपघातकत्वम्। अयं च स्वभावः कर्मजन्यो वा भवतु वस्तुस्वभावाधीनो वा उभयथा वा भवतु, तथाप्यचिन्त्य एव। दृष्टत्वाच्च नात्र युक्तिबाधा प्रभवति। तेन परस्परगुणोपघातव्यभिचारश्चन्द्रिकाकृता सुश्रुते प्रपञ्चितः स न भवति। CK.
4. सहजसात्म्यत्वात् सहजतया सात्म्यत्वात्। यावन्तो भावाः शरीरे जायमाने सहैकत्र जायन्ते केचित् तुल्यगुणाः केचिद्विरुद्ध गुणाः सर्व एव ते सात्म्याः आत्मना सहैकीभावमापन्नाः।.......सहजसात्म्यत्वात् शरीरधातुधारकतया त्वविकृतभूतप्रकृतिरूपेण शरीरेण सह जाता एवैकात्मीभावात् शरीरधात्वपीडकत्वम्। ....सहजत्वात् सात्म्यत्वाच्चेत्येवं न हेतुद्वयम्। GD.

CHAPTER XXVII

1-2. In the preceding chapter a number of diseases have been described which are curable by pañcakarma treatment but there is a disease, ūrustambha, which is not amenable to this treatment. Thus by contrast the latter is described here.[1]

3-15. The word 'doṣaja' (v. 6) is to eliminate disease of mental and exogenous origin as they are known as not responsive to pañcakarma treatment.[2]

Āma doṣa going to thighs does so with tridoṣa.[3] 'Doṣa' here means vāta etc. obstructed by āma. In case of the reading "doṣamadotkataḥ" it qualifies āma.[4] Though ūrustambha is mentioned as caused by tridosa, kapha is predominant.[5]

17-19. Here different symptoms of the diseases are mentioned. Others, however, take it as symptoms of the incurable stage produced by application of sneha.[6] 'Adāhavedanā' is interpreted as 'slight burning sensation and pain' while others take it as 'pain devoid of burning sensation'.[7] In my view, it is 'ādāhavedanā' having 'extensive burning sensation and pain'.

20-24. 'Širovirecana' is not at all applicable and as such has not been mentioned. 'Bastikarma' here means unctuous enema and the non-unctuous one is included in 'virecana'.[8]

25-30a. 'Kṣapaṇa' means 'eradication' and 'šoṣaṇa' drying of liquid portion.[9]

39a-47. Application of sneha is only conditional and as such it does not conflict with the general principle. It may be taken as an exception.[10]

47b-60a. How is it that (in ūrustambha) swimming causes diminution of kapha as

---

1. त्रिमर्मीये च बहून् रोगान् पंचकर्मसाध्यान् दृष्ट्वा पंचकर्मासाध्ये ऊरूस्तम्भे जातस्मरण आचार्यः ऊरूस्तम्भचिकित्सितमेवाह, भवति हि विरोधिदर्शनात् तद्विरोधिस्मरणं यथा नकुलस्मरणात् सर्पस्मरणम्। CK.
2. दोषज इति पदं मानसागन्तुनिरासार्थं, तन्निरासस्तु तयोः पंचकर्माविषयतया प्रसिद्धत्वात्। CK.
3. आमं ऊरुं गच्छत् त्रिदोषसहितमेव याति। CK.
4. दोषः आमसंरुद्धो वातादिः। यदा "दोषमेदोत्कटः "इति पाठः तदाऽऽमस्य विशेषणम्। CK.
5. यद्यपि ऊरूस्तम्भस्य त्रिदोषजन्यत्वमिह तथा सूत्रस्थानेऽपि........तथाऽपि कफप्राधान्यादत्र कफ उपदिष्टः। CK.
6. जंघोरुग्लानिरित्यादि तु लक्षणं भिन्नसामग्रीकं ब्रूते। अन्ये तु सर्वमेवैतदूर्ध्वाधःकृतस्नेहनप्रयोगदोषकृतमसाध्यलक्षणमाहुः। CK.
7. शश्वच्चादाहवेदनेति ईषद्दाहवेदना, अन्ये तु दाहवर्जितवेदनामाहुः CK.
8. शिरोविरेचनं चात्र सर्वथैवासंभाव्यमानत्वादेव नोपन्यस्तमिति ज्ञेयम्।.......बस्तिकर्म चेति स्नेहबस्तिकर्म........तेनानुवासनमेव लभ्यते, निरूहस्तु विरेचनशब्देनैव शोधनाभिधायिना गृहीतः। CK.
9. क्षपणं सर्वथोच्छेदेन, शोषणं द्रवभागविशोषणम्। CK.
10. रूक्षणादित्यादिना स्नेहविधानमावस्थिकं, तेन सामान्येनात्र विहितस्नेहनिषेधेन समं न विरोधः, अस्य विधेरपवादत्वात्। CK.

water is known to increase kapha? The answer is-water checks the exit of heat which is directed inwards and thus destroys the mass of kapha.[1] Vijayarakṣita, in madhukoṣa' cites this as example of 'hetuvyādhiviparītārthakārī vihāra'. Explaining the mechanism of action, he says that because of cold of water body-heat does not go out and thus directed inwards liquifies medas and kapha which subsequently are dried up by exercise thus having become free from obstructions vāyu moves freely in its channels.[2]

---

1. ननु जलप्रतरणं कथमस्य श्लेष्मक्षयकरं भवति, यस्माज्जलसंबन्धमात्रेण श्लेष्मवृद्धिरेव प्राप्ता। उच्यते-जलेन बहि-र्निर्गच्छदूष्मणो निरुद्धस्यान्तःप्रवेशाच्छ्लेष्मसंघातभेदनं भवति, तथा प्रतरणक्रियया श्लेष्मा विच्छिद्यते। CK.
2. हेतुव्याधिविपरीतार्थकारीणि....विहारो यथा-व्यायामजनितसंमूढवाते जलप्रतरणरूपो व्यायामः।......यच्चोरुस्तम्भे जलप्रतरणं, तत्रापि जलस्य शैत्येन बहिरगच्छन् देहोष्मा कुम्भकारपवनन्यायेनान्तः पिण्टितौ मेदःश्लेष्माणौ विलाययति व्यायामश्च तौ शोषयति, ततस्तु निरावरणो वायुः स्वमार्गप्रतिपन्नो भवतीति। Madhukosa on Mādhavanidāna'.1.9.

CHAPTER XXVIII

1-2. In case of derivation of the word 'vātavyādhi' as 'vāta eva vyādhiḥ vātavyādhiḥ" vāta itself disordered and combined with particular dūṣyas attains the form of generalised or localised affections and because of producing pain it is called as vātavyādhi. When, on the other hand, it is derived as "vātādvyādhirvātavyādhiḥ" then vāta doṣa causes the disease by particular pathogenesis.[1]

Though jvara etc. are also caused by vāta, they are produced even without vāta by other doṣa, and as such they are not called as vātavyādhi. Disorders of vāta caused by covering with kapha or pitta are mentioned here as vāta is main there.[2]

Unlike vātavȳadhi, specific diseases caused by kapha and pitta are not described separately because they are not so important. Out of the vātika disorders too, only common ones are described here separately for treatment. Common disorders caused by kapha and pitta are treated by emesis and purgation respectively.[3]

In later works like Rasendrasārasaṅgraha there are also separate chapters on pittaroga and kapharoga after vātaroga.

3. Āyus, in fact, is the combination of body, senses, mind and soul but vāyu being main agent in such combination has been called as 'Āyus'.[4] Similarly, being support of strength it is called 'bala.'[5]

5-11. Though uras (chest) is the common location of both prāṇa and udāna, they are distinguished by their different functions like makers of garland and pottery living in the same house but performing different functions.[6]

While explaining derivation of the word 'vyāna' GD says that it is called 'vyāna' as it pervades the whole body.[7]

---

1. तत्र वात एव व्याधिर्वातव्याधिरिति पक्षे वात एव तत्तद्दूष्यसंप्राप्तः सर्वांगैकांगरूपतामापन्नो विविधपीडाकर्तृत्वाद् वातव्याधिरुच्यते। यदा तु वाताद् व्याधिर्वातव्याधिरिति पक्षस्तदा वातदोषाद् दोषदूष्यसंमूर्च्छनविशेषरूपः सर्वाङ्गैकांगरूपो व्याधिर्वातव्याधिरुच्यते। CK.
2. ज्वरादयस्तु यद्यपि वातादुत्पद्यन्ते तथापि ते दोषान्तरेणापि वातं विना भवन्तीति कृत्वा नात्र शास्त्रे वातव्याधिशब्देनोच्यन्ते। येऽपि चात्र कफपित्तावृतवातविकारा वातव्याधित्वेन वक्तव्याः, तेऽपि प्रधानं वातं विना न भवन्तीति कृत्वा वातव्याधिरूपा एव। CK.
3. न च वाच्यं यथा वातिका नानात्मजा व्याधयः पृथक् चिकित्सयोच्यन्ते, तथा पित्तजाः कफजाश्च चिकित्स्यन्तामिति, यतः पित्तकफकृतानां नानात्मजानां व्याधीनां न तथा प्राधान्यं यथा वातजानां, तेन वातजानामेवाविष्कृततमानां पृथक् चिकित्साच्यते। कफपित्तजानां त्वाविष्कृतानां वमनविरेचनादिका कफपित्तचिकित्सेति ज्ञेयम्। CK.
4. यद्यपि शरीरेन्द्रियसत्वात्मसंयोग आयुः, तथापि तादृशसंयोगे प्रधानत्वात् प्रकृतिस्थो वायुरप्यायुरुच्यते।
वायुरायुर्हेतुत्वादायुः। GD.
5. एवं बलस्यापि हेतुर्वायुरिति कृत्वा शीरराधारतया बलाधारहेतुर्वायुरेव बलमित्युक्तः। CK.
6. प्राणोदानयोर्यद्यपि समानमुरःस्थानं तथापि कर्मभेदाद् भेद एव यथैकगृहस्थितमालाकारकुम्भकारयोः। CK.
7. सर्वं देहं व्याप्नोतीति व्यानः। GD.

12-14. As vāyu produces a number of severe diseases it is described here in detail with five types and not pitta and kapha (though they also have each five types).[1]

15-19a. In "doṣāsṛg" doṣa denotes feaces also [2] 'Apataṃsana' means 'falling' down' or 'diminution of dhātus.[3]

By 'laṅghana', GD takes 'leaping' or 'lightening'.[4]

19b-20a 'Apāya' is characterised by 'laghutā' which may be lightness (feeling of well-being) as result of alleviation of the disorder or 'slightness' as there is no total alleviation of the symptoms of vāta.[5] GD does not explain the word 'laghutā', Vijayarakṣita, however, interprets it more clearly as 'presence in very slight degree and not total alleviation (of pathological symptoms) while Ck takes it as normal symptoms. Moreover, VR tekes 'apāya' (occasional absence) and laghutā' (lightness of body due to wasting of all dhātus by vāyu) as 'ātmarūpa' of vātavyādhi.[6]

20-24a. Contracture etc. are themselves diseases but here they are as symptoms.[7] 'Huṇḍana' is inward contracture of head etc. others take it as cracking, crookedness, stiffness and loss of function.[8]

21b-32. Cooking of honey (v.24) is exceptional in the formulation.[7] The quantity of tvak, patra etc. should be one- fourth of that of trivṛt powder in order only to add pleasant odour.[8] In the fifth formulation (v.26-27), trivṛt powder should be added in the quantity of one-fourth of the leha.[9]

36. According to general rule, jaggery should be taken double in preparation of modaka.[10]

---

1. विरेचनकल्पेषु वक्तव्येषु त्रिवृताया विरेचनद्रव्येषु सुखविरेचनतया प्रधानत्वात् त्रिवृत्कल्प एवाभिधीयते। CK.
2. यद्यपि चारुणमूलैव त्रिवृदत्रोत्कृष्टा वक्तव्या, तथाऽप्यध्यायसंज्ञायां श्यामाया अग्रे पाठेनाशुदोषहन्तृतया श्यामायाः प्रकर्षं दर्शयति। CK.
3. ये चात्र योगा वक्तव्यास्तेऽरुणया श्यामया वा उभाभ्यां वा दोषशरीरादिबलाबलमवेक्ष्य कर्त्तव्याः। CK.
4. त्रिवृन्मूलशब्देन श्याममूलाया अरुणमूलायाश्च सामान्येन मूलं गृह्यते। CK.
5. वातापहौषधयोगेन वातहन्तृत्वमविद्यमानं भवति, कफपित्तहन्तृत्वं विद्यमानमधिकं भवतीति ज्ञेयम्। CK.
6. मुख्यतरमिति विरेचनक्रियायामेवाव्यापत्तिकरत्वाच्छ्रेष्ठतरम्। CK.
7. अत्र क्षौद्रपाको योगमहिम्ना। CK.
8. त्रिवृच्चूर्णमात्रापादिकत्वं त्वक्पत्रादीनां, सौगन्ध्यमात्रप्रयोजनत्वात्। CK.
9. अत्र त्रिवृच्चूर्णमनिर्दिष्टमानं, तच्च प्रक्षेपन्यायाल्लेहात् पादिकं कर्तव्यम्। CK.
10. "मोदके द्विगुणो गुडः" इति वचनात् गुडशर्करां चूर्णाद् द्विगुणामिच्छन्ति। CK.

37-39. Though this is read in the context of modaka, in fact, it is leha (the eighth one).[1]

This modaka is known as 'abhayādya' in some other texts.[2] Mukūlaka etc. are taken double the quantity of one drug. Some, however, take double the total quantity of vyoṣa etc.[3] Honey is added that much which is sufficient for making 'modaka'.[4]

1. त्रिवृच्छाणा इत्यादिनेह मोदके च यद्यपि पठ्यते योगः, तथाऽप्यस्य लेहेनैव ग्रहणादयमष्टमो लेहो भवति। CK.
2 अयं मोदकस्तन्त्रान्तरे "अभयाद्य" इति ख्यातः । Ck.
3. अत्र मुकूलकादीनामेकैकद्रव्यापेक्षया द्वैगण्यादि भवति।.......केचिदत्र व्योषादिमिलितचूर्णाद् दन्त्यादीनां द्वैगुण्यं वदन्ति। CK.
4. मधु च तावन्मात्रं यावता मोदको भवति। CK.

CHAPTER VIII

8-9a. The drākṣādi formulation is contra-indicated before the age of four years and after that of twelve years.[1]

---

1. अस्य प्रयोगस्य चतुर्वर्षादर्वागूर्ध्वं च द्वादशवर्षादवश्यतया यौगिकत्वं निषेधयति। CK.

CHAPTER IX

3-5. The inner bark is hard, that is why it is left.[1] 'Ścotayet' denotes its twenty one time processing (srāvaṇa) in six times liquid medium as done in the context of madana.[2]
11b-13. The first leha (v.11b) should be prepared by cooking trivṛt powder with jaggery in decoction of tilvaka.[3]

14-16. In trivṛtādi formulation lodhra, being the main drug, should be taken in double quantity as Jatūkarṇa has also said.[4]

---

1. तिल्वकस्यान्तर्वल्कलं कठिनं भवति, तदर्थं तद्वर्जनम्। CK.
2. श्चोतयेदिति वचनेन षड्गुणद्रवेणैकविंशतिवारान् स्रावयेदिति ज्ञेयम्, मदनफलकल्पे एवंभतस्यैव स्रावणस्य दृष्टत्वात्। CK.
3. तेनात्र तिल्वककषायेन गुडान्वितत्रिवृच्चूर्णं पक्त्वा लेहः कर्तव्यः। CK.
4. अत्र त्रिवृदादिगृहीतलोध्रस्य प्रधानत्वाद् द्विगुणो भागो भवति। उक्तं हि जतूकर्णे......। समभागत्वे तु लोध्रप्रयोगत्वस्य केन विशेषः स्यात्। CK.

CHAPTER X

5-7a. Here 'madhumeha' denotes 'prameha' in general as vātika madhumeha is incurable and in that case prescribing purgative would be meaningless. That the word 'madhumeha' is used for 'prameha' in general is also said in the chapter on treatment of prameha.[1]

---

5. पाण्डुरोगेत्यादौ मधुमेहशब्देन प्रमेहा एवोच्यते विशिष्टस्तु वातिकमधुमेहोऽसाध्य एव, तेन तं प्रति विरेचनोपदेशोऽनर्थक एव स्यात्। मधुमेहशब्दश्च यथा प्रमेहमात्र एव वर्तते तत् प्रतिपादितमेव प्रमेहचिकित्सिते। CK.

CHAPTER XI

6-8. Here though maireya etc. are not 'kaṣāya', they are said so because of their presence with majority of kaṣāyas. In this context, the word 'kaṣāya' is for 'kalka'[1] (paste).

17. In summarising verses, 'madya' means 'fermented liquors' in general and thus sauvīraka etc. are covered.[2]

---

1. अत्र यद्यपि मैरेयैक्षवौ न कषायौ तथापि बहुकषायान्तर्गतत्वात् कषायावेव वक्तव्यौ।.........कषायशब्देन कल्ककषायोऽभिप्रेतः। CK.
2. "पञ्च मद्ये" इति वचने संग्रहगृहीतं, सौवीरकादीनां च मद्यशब्देनाभिधानमिहासुतसामान्याज् ज्ञेयम्। CK.

CHAPTER XII

4. Ck interprets 'sthira' as 'mature' and 'bahala' as 'having dense bark'. Commenting on 'śyāvatāmrāṇi', he says that roots of dantī and dravantī are blackish and coppery respectively.[1]

20-35. The sixth formulation beginning with 'palaṁ' (v.27-29) is known as 'agastyamodaka' in other texts.[2] Commenting on v.34, Ck says that by combination of all these materials surā is produced and thereby madirā is made.[3]

45. The drugs and substances, even though of contrary vīrya, do not disturb or obstruct the action of the main drug and thus indirectly cooperate with it.[4]

48b-49a. Drug in small dose may become more potent on combination with drugs having similar vīrya. Similarly, drug in large dose may lose its action proportionately by addition of drugs having contrary vīrya. By subtracting the drugs having contrary vīrya a small drug may become potent. In the same way, by subtracting the drugs having similar vīrya a great one may be of little effect. Thus processing also effects it. Clinical management has also effect on it. For instance, in properly uncted patient even a little evacuative drug has pronounced effect. On the contrary, the great one also has little effect.[5]

51-53a. The first quarter of the v. 52 relates to purgatives and enema while the other quarter to emesis.[6]

64-65. 'Virecana' here denotes both emetic and prugative.[7] 'Dṛḍhasnehaguṇa' indicates that if properties of unction are not stabilised, drug should not be applied, instead unction should be given because in case of improper unction the evacuation too would not be properly effective.[8] There is also another reading śvo bhūyaḥ' in place

---

1. स्थिराणीति सारभूतानि, बहलानीति घनत्वक्कानि.......श्यावताम्राणीति यथाक्रमेण दन्त्याःश्यावानि, द्रवन्त्यास्ताम्राणि। CK.
2. हरीतक्याश्च विंशतिरित्याकृतिमानेन। अयं योगस्तन्त्रान्तरे "अगस्त्यमोदक" इति ख्यातः। CK.
3. अत्र तयोर्दन्तीद्रवन्त्योश्चूर्णक्वाथाभ्यां तथा माषाम्बुना किण्वकरणपूर्वकं या सुरा कृता तत्सुरोद्भवा मदिरा कर्तव्येति वाक्यार्थः। CK.
4. विरुद्धवीर्यमपीति विरेचनरूपकार्याप्रबाधकतया गुणभूतमित्यर्थः। यदि हि विरुद्धवीर्यंगुणभूतं न स्यात्तदा मदनादीनां कार्यं प्रतिहन्यात्।.......विपरीतस्य कार्याबाधनरूपं साहाय्यमभिधाय.......। CK.
5. तत्राल्पमात्रस्य समानवीर्यसंयोगान् महार्थत्वं भवति, तथा विरुद्धवीर्यसंयोगात् प्रभूतमात्रस्यास्यल्पकर्मता कर्तव्याः।......विश्लेषादप्यस्य महार्थत्वं विरुद्धवीर्यविश्लेषाद् बोद्धव्यं, समाधिविश्लेषात्तु प्रभूतस्याल्पकर्मता ज्ञेया। एवं संस्कारादपि समानासमानगुणान् महार्थत्वमल्पकर्मता वा। युक्त्या अल्पस्यापि महार्थत्वं यथा स्निग्धेऽल्पमात्रं शोधनं बहुदोषहरणाय भवति, तद्विपार्ययेण प्रभूतस्याल्पकर्मता उदाहरणीया। CK.
6. नातिग्लानिकरं पायाविति विरेचनस्य निरूहस्य च, हृदये न च रुक्करमिति तु वमनस्य लक्षणं ज्ञेयम्। CK.
7. विरेचनं वमनं विरेचनं च। CK.
8. दृढस्नेहगुणमित्यनेन स्नेहलक्षणो गुणो देहे यदा दृढो नास्ति तदाऽस्य भेषजं न दातव्यं, किन्तु स्नेह एव तावत् कर्तव्यः। असम्यक्स्निग्धे हि पुनरपि क्रियमाणं विरेचनंमसम्यग्प्रयोगायैव भवति। CK.

of 'śvobhute'.[1] 'Bhojya' means the edibles which promote expulsion of faeces.[2]

66. Food should be such as helps digestion like gruel. 'Antarapāna' is intake of decoction.[3] Those who read 'pramāṇataḥ' instead of 'apramāṇataḥ' interprete the role of the above in pacifying the doṣa covering koṣṭha in spite of proper evacuation.[4]

67. Mild drug is administered because by use of strong drug there may be excessive action and loss of strength of the patient.[5]

79-80. Some interpret 'basti' here as 'snehabasti and say that nirūha is not desirable in this case because it aggravates vāta and use of purgative is denied after nirūha but, Ck's opinion, 'basti' denotes both nirūha and snehabasti. Nirūha is, as a rule vāta-eliminating but it aggravates vāta when it is used constantly alone without snehabasti. As regards denial of purgative after nirūha, it is a general rule but in certain cases there may be exception. Moreover, here purgative would be given only after a week of nirūha and as such there is no any anomaly.[6]

81-82. Incompatible food etc. are called as 'doṣa' because they cause doṣa[7] (abnormality).

87-98a. Measure of pala etc. mentioned by Suśruta is half of that mentioned by Dṛḍhabala here. Suśruta takes 'māṣa' comprised of five raktikās (whereas Dṛḍhabala takes it as of ten raktikās). It is said that Dṛḍhabala's measure is māgadha while Suśruta accepts kāliṅga māna. Jatūkarṇa takes 'māṣa' as of five raktikās.[8]

98-99. Here the double quantity of liquid is mentioned without any specification. However, on the basis of other texts, this is to be done only beginning from kuḍava.[9]

1. श्वोभूते....किंवा "श्वो भूयः" इति पाठः । CK.
2. भोज्यैरिति अनुलोमनैः । CK.
3. तत्र भोजनं पाचनं यवाग्वादिभोजनम्, अन्तरपानं कषायपानम्। CK.
4. ये तु"प्रमाणतः" इति पठन्ति, ते सम्यक्शुद्धावपि कोष्ठोपलेपकदोषप्रशमनार्थं भोजनान्तरपानं व्याख्यानयन्ति। CK.
5. मृदु भेषजं देयं, तीक्ष्णेन हि बलभ्रंशोऽतियोगश्च स्यात्। CK.
6. "बस्तिं पुरा दत्वा" इत्यत्र बस्तिशब्देन स्नेहबस्तिमिच्छन्ति, निरूहस्तु, वातकोपकतया तथा निरूहानन्तरं विरेचनस्य निषिद्धत्वादिह नेष्यते.....इतिः किन्तु बस्तिशब्देन निरूहः स्नेहबस्तिश्च गृह्यते, निरूहस्य यद् वातकर्तृत्वमुक्तं तदेकस्यैव स्नेहबस्तिरहित-स्याभ्यासात्, उत्सर्गतस्तु वातहन्तृत्वं "बस्तिर्वातहराणाम्" इत्यनेनैवोक्तम्। निरूहानन्तरं विरेचननिषेधस्त्वौत्सर्गिकः, तेन विशेषविधिना तस्यापवादो युज्यत एवः किञ्च, इह बस्त्यनन्तरं यद् विरेचनं विधीयते तच्च बस्तिदानादूर्ध्वं सप्ताहानन्तरमेव भविष्यतीति न कश्चिद् विरोधः । CK.
7. विरुद्धाध्यशनादयश्च दोषजनकतया दोषशब्देनोच्यन्ते। CK.
8. एवं दृढबलोक्तमानादर्धेन सुश्रुतपलादिमानं भवतिः एवं सुश्रुतेऽपि पंचरक्तिकमाषो भवति। दृढबलमानं मागधं, सुश्रुतमानं कालिंगमिति ब्रुवते। जतूकर्णे तु षड्गुञ्जको माषक उक्तः। CK.
9. अत्र यद्यपि सामान्येनैव द्रवस्य द्वैगुण्यमुक्तं, तथापि तन्त्रान्तरदर्शनात् कुडवादावेव द्रवस्य द्वैगुण्यम्। Ck.

The double quantity in case of fresh drugs is also admissible only in these cases where the drug is used in both fresh and dry forms. This is not allowed in case where drug is used only in fresh state.[1]

---

1. आर्द्रद्वैगुण्यं च तस्यैव भवति यस्य द्रव्यस्य शुष्कस्य चार्द्रस्य चोपयोगः संभवति, यच्च नित्यमार्द्रमेवोपयुज्यते न तत्र द्वैगुण्यम् ।CK.

CARAKA-SAMHITĀ

SIDDHISTHĀNAM

CHAPTER I

1-2. The section dealing with siddhi (success) is termed as 'siddhisthāna'. The word 'siddhi' denotes success in application of drugs for emesis etc. and complications arisen due to their improper use. Thus because of describing the means of such success it is called as 'siddhisthāna'. Or by formal identity of cause and effect the emesis etc. Themselves being the means of success are denoted by the word 'siddhi'. This interpretation would not encroach upon cikitsāsthāna etc. as it is used in restrictive sense.[1]

6b-7a. The word 'kalpanā' is meant here for processing of auxilliary items of pañcakarma such as sneha and sveda.[2]

The person becomes adjusted to unction in a week and as such it does no good to the body thereafter. Hence, if it is to be done thereafter, it should be done in higher dose. According to tradition, if the patient is not uncted by a week, he should be given higher dose after some interval.[3]

This distinction in period is made in view of the softness or hardness of bowels. In the latter unction is completed if given in proper dose, otherwise not.[4]

In some texts, the period of unction is mentioned as three, six and nine days but Caraka does not agree to that above a week or it may be explained on the basis of a higher dose.[5]

Some say that for immediate unction one day is also sufficient. There is no mentioned about medium bowel, for that a period of five days should be taken.[6]

---

1. सिद्धेरभिधायकं स्थानं सिद्धिस्थानम्। सिद्धिशब्देन चेह वमनादीनां वमनाद्यसम्यग्योगजन्यानां व्यापदां भेषजस्य साध्यतारूपा सिद्धिरुच्यते, एवंभूतसिद्धिकारणाभिधायकतया चैतत् सिद्धिस्थानमुच्यतेः किंवा, कार्यकारणयोरभेदोपचारात् सिद्धिशब्देनेह सिद्धिकारणान्येव वमनादीन्युच्यन्ते।.....न चैवं सिद्धिस्थानसंज्ञाव्युत्पत्या चिकित्सास्थानादीनामपि सिद्धिस्थानसंज्ञाप्रसक्तिरुद्भावनीया, यत इयं संज्ञाऽत्रैव योगरूढ्या वर्तते, नान्यत्र। CK.
2. कल्पनाशब्देनेह पंचकर्माङ्गकल्पनोच्यते, तेन पंचकर्माङ्गस्नेहस्वेदप्रयोगमेव प्रागाह। CK
3. तेन यावन्मात्रस्नेहप्रयोगेण सप्तदिनोपयुक्तेन स्नेहनं वृत्तं, सा मात्रा सात्म्यीभूतैव, अधिकमात्रा या सात्म्यतां न गता सा सप्तरात्रात् परेणापि कर्तव्यैव। वैद्यास्तु सप्तरात्रादस्निग्धे पुरुषे किंचिद् विश्रामं कृत्वा पुनरधिकमात्रया स्नेहं प्रयुञ्जते। CK.
4. एतच्च त्र्यहस्नेहनं सप्तरात्रस्नेहनं च मृदुक्रूरकोष्ठविषयभेदेन। ....क्रूरकोष्ठः सप्तरात्रेणैव स्निह्यति, परं क्रूरकोष्ठतामपेक्ष्य कृतया स्नेहमात्रया स्निह्यति, यदा तु हीनमात्रा प्रयुज्यते, तदा सप्तरात्रेणापि न स्निह्यति, । CK.
6. यत्तु तन्त्रान्तरे "त्रिषट्कनवरात्रेण स्नेहपानं विधीयते" इत्यनेन सप्तरात्रादूर्ध्वमपि स्नेहनं विहितं, तदाचार्यानभिमतमेवः किंवा, सप्तरात्रादूर्ध्वमसात्म्यीभूताधिकमात्राप्रयोगाभिप्रायेण तद्वर्णनीयम्। CK.
7. अत्र च.....सद्यःस्नेहप्रयोगेणैकदिनेनापि स्नेहनमनुजानीत इति ब्रुवते। मध्यकोष्ठान्तरं प्रति स्नेहनप्रकर्षकालो यद्यपि नोक्तः, तथापि मध्यविधया पञ्चदिनेन मध्यकोष्ठस्य स्नेहनं ज्ञेयम्। CK.

Others say that in case of soft bowels, unction should not be continued after three days. In fact, if necessary, it may be continued even thereafter for completion of unction.[1]

8b-9a. This prescribed diet is taken for three days in case of purgative and for one day in that of emetics.[2]

10b-11a. 'Snigdhāya' denotes that the patient should be anointed on the day of emesis as unction by intake has already been said. Others, however, interpret simply as 'having acquired the properties of unction'.[3]

13-15a. Here 'prastha' is taken as thirteen and half palas as said in another text that in context of emesis, purgation and blood-letting, prastha consists of thirteen and half palas.[4]

When the frequency of urges four, measure of expelled doṣa one prastha, end with appearance of pitta as sign of proper emesis are present-it should be understood as inferior type of purification. Similarly, ten urges, two prasthas of expelled doṣa and end with kapha as sign of proper purgation indicate the inferior type of purgation.[5] In the same way, ending with pitta and kapha should be taken as sign of proper emesis and purgation respectively in case of medium and superior types too.[6]

Thus the view that there are four types of purification, in emesis and purgation such as those relating to end, urges, measure and signs is not acceptable to us. In fact, there is only one purification relating to sign which is indicated by the end (with kapha or pitta). In this way, the discussion put forth by Āṣāḍhavarman is also unfounded.[7] The

1. यत्तु कैश्चित् "मृदुकोष्ठं प्रति त्र्यहादूर्ध्वं न स्नेहनं कर्तव्यं सात्म्यीभावादिति चार्थो लभ्यते" इति व्याख्यायते, तन्न नः प्रीणाति; यतः सात्म्यीभावः सप्तदिननिर्वर्त्यतयैवाचार्येणोक्तः, तेनात्यल्पमात्राप्रयुक्तेन स्नेहेन त्र्यहाद् यदि न स्निह्यति मृदुकोष्ठस्तदाऽधिकदिनान्यपि तत्र स्नेहः कर्तव्यः। CK.
2. एतद् विरेचनार्थं प्रतिभोजनं त्र्यहं ज्ञेयम्, वमनार्थं तु प्रतिभोजनमेकाहमेव। CK.
3. स्निग्धाय देयं वमनमिति-वमनपानदिनेऽभ्यङ्गेन स्निग्धाय वमनं देयमित्यर्थः, पानजनितस्नेहस्तु पूर्वमेवोक्तत्वान्न पुनरभिधानमर्हति; अन्ये तु "उपजातस्नेहगुणाय" इति वदन्ति। Ck.
4. अत्र च प्रस्थशब्देन सार्धत्रयोदशपलान्युच्यन्ते, उक्तं हि तन्त्रान्तरे-"वमने च विरेके तथा शोणितमोक्षणे। सार्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः॥" इति। CK.
5. यदा चतुर्भिर्वेगैः प्रस्थमाने दोषे गते पित्तान्तत्वं सम्यग्वमनशुद्धिजलक्षणमुपलभ्यते तदा जघन्या शुद्धिः, यदा च विरेके दशभिर्वेगैः द्विप्रस्थमानदोषगमने कफान्तत्वं विरेचनसम्यग्योगलक्षणमुपलभ्यते तदा विरेचनस्य जघन्या शुद्धिर्भवति। CK.
6. एवं मध्यप्रवरशुद्धावपि वमने पित्तान्तत्वं, विरेचने कफान्तत्वं सम्यग्योगलक्षणं ज्ञेयम्। CK.
7. तेन यदुच्यते-आन्तिकी, वैगिकी, मानिकी, लैङ्गिकी चेति चतुर्विधा शुद्धिरिहोच्यते वमनविरेचनयोः, तदस्माकमसंमतमेव। किन्तु लैङ्गिकी चैका शुद्धिः, तत्र च पित्तान्तत्वं....लिङ्गं वमने, विरेचने च कफान्तत्वं...लिङगं ज्ञेयम्। तेन यदत्र आषाढवर्मणा......इत्यादिनाक्षिप्तं तदनभ्युपगमनिरस्तमेव। CK.

main criteria of purification is proper elimination of doṣa, the number of urges etc. are immaterial.[1]

The mention of ending with vāyu among the singns of proper elimination is only indicative of ending with kapha or pitta as when these are eliminated completely vāyu moves in the vacant space.[2]

15b-16a. The word 'kramāt' shows that any disturbance in the order would not lead to the signs of proper performance. For instance, if pitta comes before kapha, it would not be purificaiton, it would be, in real sense, only when pitta situated in lower portion of āmāšaya comes out in emesis which takes place only after kapha goes out.[3] The same explanation is in relation to purgation.[4]

17b-18a. Ck takes 'ūrjaḥ' as qualifying the word 'agniḥ' meaning 'potent'.[5]

20-22a. Of the two options, intake of ghee is prescribed if purgation is to be done on ninth day after emesis and if enema is to be given after purgation, unctuous enema is given on the ninth day.[6] Intake of ghee on the ninth day after emesis is not mentioned earlier and as such is mentioned after purgation coinciding with unctuous enema, thus it should not be taken as auxiliary to nirūha.[7]

The ninth day should be counted from the day of purification.[8] The intake of meat-juice after gruel etc. in the treatment by uttarabasti is designed, at the end of all the procedures, for recouping the normal diet and not after emesis and purgation, thus allowing intake of ghee and unctuous enema on the ninth day even without taking meat-juice.[9] The statement of Bhadrašaunaka, in this connection, relates to earlier

1. जघन्यादिशुद्धिलक्षणेऽपि यद्वेगेन जघन्यादिशुद्धिलक्षणाभिधानं, तत् प्रायोभावितया ज्ञेयम्। दोषमानभेदेन जघन्यादिमानभेदः पारमार्थिकः। CK.
2. तत्र च यदनिलागमनमन्ते वक्तव्यं तत् पित्तान्तस्य कफान्तस्य च सूचकतया ज्ञेयं, निःशेषकृते ह्याशयगते पित्ते कफे च वायुः केवलः सरति। CK.
3. क्रमादित्यनेन वचनेन यथोक्तक्रमलंघनेन कफाद्यागमनं न सम्यग्योगलक्षणमिति दर्शयति; यतः कफादूर्ध्वं गतं यदा पित्त भवति तदा तु पित्तागमनेऽपि सति न शुद्धिः, किंतु यदैवामाशयाधोभागगतं पित्तं वमनमानयति तदैव शुद्धिः, तत् पित्तानयनं कफनयनानंन्तरमेव भवति। CK.
4. एवं सम्यक्कृतविरेचनलक्षणेऽपि क्रमादितिपदस्यार्थोऽत्र व्याख्येयः। CK.
5. ऊर्जोऽग्निरिति पदुरग्निः। CK.
6. अत्र विकल्पद्वये यदि वमनानन्तरं विरेचनं कर्तव्यं तदा नवमेऽह्नि सर्पिःपानम्, अथ विरेचनानन्तरं यदि बस्तिर्देयस्तदाऽनुवासनं नवमेऽह्नि देयमिति व्यवस्था।CK.
7. वमनानन्तरं नवमदिवसे सर्पिःपानं पूर्वं नोक्तं तेनेदानीं विरेचनानन्तरकर्तव्यनिरूहांगानुवासनसमानकालतया सर्पिःपानमपि दर्शितं, तेन न निरूहाङ्गता सर्पिःपानस्य कल्पनीया। CK.
8. नवमश्च दिवसोऽत्र शोधनदिनमारभ्यैव ज्ञेयः। CK.
9. उत्तरबस्तिचिकित्सिते च यः पेयादिक्रमानन्तरं रससंसर्जनक्रम उक्तः, स सर्वकर्मावसाने प्रकृतिभोजनगमनार्थं कर्तव्यः, न वमनविरेचनकर्मपरिसमाप्तावेव, तेनेहाकृतरससंसर्गस्यैव नवमे दिने सर्पिःपानमनुवासनं चोपपन्नम्। CK.

unctuous enema or particular disease and as such is not conflicting. There are a number of interpretations by commentators which are already refuted by others.[1]

Sudation, though not explicitly mentioned, should be understood as it is a prepartory measure of pañcakarma.[2]

Commenting on 'nisi' Ck says that it should not be given in night during winter and spring. Others, however, take evening by it.[3]

The word 'anuvāsanārha'indicates that if there is presence of āma or agni is mild, unctuous enema should not be given on the same day [4]

22b-23a. 'Šīta' denotes šišira as well as vasanta.[5] 'Divā' means 'day approaching night and 'rātrau' means 'night close to day'.[6]

23b-24. In v. 24a, reading accepted by Ck seems to be 'paratastryahe vā'. He also refers to others' reading as 'parato dvyahe vā'. In the latter case, they explain that the unctuous enema should be given in two, three and five days in condition of severe vāta, medium (not severe) vāta and predominance of kapha-pitta respectively.[7] Concluding Ck says that the reading 'dvyahe vā tryahe vā'is appropriate. Here approach of the second or third day is meant and not completion.[8]

25. Though anuvāsana is not prescribed in kapha and pitta, it is given if they are associated with vāta.[9] Application of basti in odd numbers works by prabhāva. Some, however, say that the even numbers coming in between are also included.[10]

27-28. Enema, by elimination of impurities, checks ageing and pacifies all the disorders.[11]

---

1. यत्तु भद्रशौनके.....इत्युक्तं, तत् प्रागनुवासनविषयं रोगविशेषविषयं वेति नैतद् विरुद्धं भवति। बहूनि चात्र व्याख्यानानि टीकाकृतामङ्गिरि-सैन्धव-जेज्जटेश्वरसेनादीनां सन्तिः अन्यैस्तु तद्व्याख्यानानि दोषोद्धारादेव निरस्तानि। CK.
2 स्वेदस्त्वत्र पञ्चकर्मपूर्वतया विहितोऽनुक्तोऽप्यायात्येव। CK.
3. निशीत्यनेन निरूहानन्तरं तद्दिने क्रियमाणमनुवासनं निश्येव कर्तव्यमिति दर्शयति, न शीते वसन्ते च सद्योनिरूढस्य रात्रावेवानुवासनं न देयमिति। अन्ये तु निशीत्यनेन तदहरेव निरूढाय सायमनुवासनं देयमिति दर्शयति, तेन यथावक्ष्यमाणविभागेन रात्रौ दिवा वा देयमित्याहुः। CK.
4. अनुवासनार्ह इति वचनेन यदि सामता मन्दो वा पावको भवति, तदा तदहरनुवासनं न देयमिति सूचयति। CK.
5. शीतशब्देन शिशिरहेमन्तयोरपि ग्रहणम्। CK.
6. दिवेति निशासमीपे दिवाभागे, रात्रावपि च दिनसमीपायां रात्रौ। CK.
7. अन्ये तु पठन्ति यत्-"परतो द्व्यहे वा त्र्यहेऽनुवास्योऽहनि पंचमे वा" इति। अत्र तु द्व्यहेऽनुवासनमति प्रबलवातस्य, अनतिवृद्धवातस्य त्र्यहे, पंचमे तु वृद्धकफपित्तस्येति व्यवस्था। CK.
8. तेन "द्व्यहे वा त्र्यहे वा" इति पाठः साधुः। द्व्यहशब्देन चात्र दिनद्वयसंबन्धमात्रमुच्यते, न द्व्यहपूरणं,....एवं त्र्यहेऽपि। CK.
9. कफपित्तयोश्च यद्यप्यनुवासनं न विहितं, तथापि वातानुगतकफपित्तविषयतयैतद् बोद्धव्यम्। CK.
10. अयुग्मदानं प्रभावादेवात्रोपकारीति महर्षिवचनाद् बोद्धव्यम्। विषमसंख्योपादानं तु मध्यविधयाऽपि द्व्यहचतुरहादिग्राहकं भवति, तेनोत्तरत्र वक्ष्यमाणसंख्यानुवासनं न विरोधीति ब्रूते। CK
11. वयःस्थापनत्वं चास्य स्रोतःशुद्धिकरत्वात्।.........दोषसंशोधनद्वारा सर्वगदापहत्वमुच्यते। CK.

29-31. Some, taking 'taila' generally for 'sneha' (fatty substance), prescribe ghee also but rightly oil should be taken as it is the chief vāta-allevaiting while ghee is not so.[1]

Some read v. 29b differently.[2] In anuvāsana, cooked oil should be used.[3] Oil, by its specific nature, distroys vāta.[4]

38-40a. As vāyu itself combines and disjoins doṣas, dhātus and malas, it also plays main role in causation of diseases produced by combination of doṣas and dūṣyas.[5]

40b-41a. 'Sneha' here means 'sāra'[6] (essance=vīrya).

41b-42a. Some read 'āmayalāghavāni' in stead of 'āšayalāghavāni'.

47-49a. Though karmabasti etc. are not used in texts. they are technical terms and described for the use of experts-and as such the view of some that they are unauthoritative is not valid. Moreover, they are also seen in others texts.[7]

49b-50a. 'Vātādikānām' is also read as 'vātādhikānām'. In the former reading, 'adi' denotes also kapha and pitta.[8]

50b-53a. The order of širovirecana is defined here as a part of pañcakarma where all the five karmas are performed but in particular cases only širovirecana can be given.[9]

57b-59a. Here 'roga' is for 'doṣa[10] Thus diseases should be treated after considering the mutual coverings and involvement of dhātus.[11]

---

1. .....तैलशब्देन स्नेहोपलक्षणेन केचिद् घृतमपि ग्राहयन्ति, किन्तु तैलमेवात्र वातहरप्रधानतया ब्रूते इति युक्तं पश्यामः........अप्रधानत्वान्नात्र घृतमनुमन्यते। CK.
2. "नान्वासनात् किञ्चिदिहास्ति कर्म" इति केचित् पठन्ति। CK.
3. तैलं चानुवासने पक्वमेव ज्ञेयम्। CK.
4. अत्र तैलानिलयोर्विपरीतगुणयोर्मेलके द्रव्यप्रभावात्तैलमेव वातं हन्ति। CK.
5. यस्माद् वायुरेव दोषमलधातूनां संयोगविभागौ करोति तेन दोषदूष्यविण्मलमेलकरूपनिखिलव्याधिकरणे वायुरेव प्रधानं भवतीति भावः। CK.
6. संस्नेह्य कायमिति वीर्यरूपेण सारेण कायं व्याप्य,.....स्नेहशब्देन च सारोऽभिधीयते। CK.
7. एते च कर्मादयो यद्यपि शास्त्रप्रदेशेषु न व्यवह्रियन्ते,तथापि तद्विद्यव्यवहारार्थमेवेयं कर्मादिसंज्ञा, यथा यमकमहाच्छपानादिसंज्ञा, तेन कर्मादिसंज्ञायाः शास्त्रे व्यवहारादर्शनात् कर्मादिप्रतिपादको ग्रन्थोऽनार्ष इति यदुच्यते, तन्निरस्तम्। कर्मादिसंज्ञा च तन्त्रान्तरेऽप्यस्ति। CK.
8. अत्र ये "वातादिकानां "इति पठन्ति, तेषामादिशब्देन पित्तकफयोरपि ग्रहणम्। CK.
9. एतच्च पंचकर्मसंपादनीयनृविषयत्वं शुद्धिपूर्वकत्वं शिरोविरेचनस्येहोच्यते, तेन वमनादिनाऽशुद्धेऽपि शिरोविरेचनैकसंपाद्ये पुरुषेऽयं क्रमो ज्ञयः। CK.
10. रोगशब्देनात्र दोषोऽभिप्रेतः। CK.
11 एवं च दोषाणां परस्परावरोधान् तथा धातुसंमूर्च्छनविशेषांश्चावगम्यैव व्याधौ प्रपञ्चोऽनुसरणीयः। CK.

CHAPTER II

1-2. The chapter is so named (pañcakarmīyā siddhi) as it deals with the informations about indications and contra-indications of pañcakarma.[1]

8-9. 'Saṃvṛtakoṣṭha' means 'that having koṣṭha belittled by vāyu'. Some interpret it as 'that having koṣṭha filled with vāyu'.[2] 'Prāṇoparodha' is 'cessation of breath (death); some take it as loss of strength.[3]

10. 'The rest are fit for emesis'-after this statement again explicit mention of pīnasa etc. shows their particular indication for the same. In case of purgation too, such mention should be explained in the same way.[4] The example of the breaking away of the bandh in the field refers to the same already mentioned earlier (in su. 20).[5]

11-12. 'Muktanāla' means 'non-closing of anus'[6] (due to non-functioning of sphincters).

14-15. 'Madhumeha' denotes all the types of prameha[7]. In baddhodara etc. nirūha basti is contraindicated in condition of flatulence and as such its prescription generally in baddhodara does not go contrary to it. Others explain that in the chapter on udararoga nirūha is prescribed in condition of constipation and thus its contraindication generally in baddhodara is not conflicting.[8]

Nirūha is not given after meals but in case of anuvāsana it is just reverse. If anuvasana is given in empty stomach it moves upwards.[9]

---

1. पंचकर्मप्रवृत्तिनिवृत्तिविषयज्ञानार्थमधिकृत्य कृता सिद्धिः पंचकर्मीया सिद्धिः । CK.
2. संवृतकोष्ठः वायुनाल्पीकृतकोष्ठः, वायुव्याप्तकोष्ठ इत्येके । CK.
3. प्राणोपरोधः मरणं, बलक्षय इत्यन्ये । CK.
4. "शेषास्तु वम्याः" इत्यभिधायापि पीनसादीन् पुनर्वमनविषयतया दर्शयन् तेषु विशेषेण वमनस्य यौगिकतां दर्शयति। एवमुत्तरत्रापि पुनर्विरेचनादिविषयोपदर्शनं व्याख्येयम् । CK.
5. प्रधानतममित्यनेन महारोगाध्याये "केदारसेतुभेदे" (सू० 20) इत्यादिनैकदेशेनोक्तं प्राधान्यख्यापकं ग्रन्थं ग्राहयति। CK.
6. मुक्तनालः असंवृतगुदः । CK.
7. मधुमेहशब्देन सर्वप्रमेहग्रहणम् । CK.
8. बद्धोदरादावाध्मातानां बस्तिर्निषिध्यते, तेन "स्निग्धस्य बद्धोदरिणे".... इति ग्रन्थेन निरूहविधानमविरुद्धं भवतिः अन्ये तु-उदराध्याय एव "बद्धोदरिणे" इत्यादिना इत्यनेन सविबन्धोदरविषयं निरूहं वर्णयन्ति, तेनात्र सामान्येन बद्धोदरे निरूहनिषेधो न विरुद्धः । CK.
9. अननुवासनविषयोपदर्शनं अनास्थाप्येषु भुक्तभक्तः पठितः, तद्व्युदासार्थमभुक्तभक्तोपादानम्, अनुवासनमभुक्तस्यानावृतत्वादूर्ध्वं याति, न तु निरूह इति विशेषः। अनुवासनं तु स्नेहस्य सूक्ष्मतया विसरणशीलं सायं दीयते, तेन तावत्कालमभोजनाच्छून्यशरीरस्योर्ध्वं याति । CK.

20-21. If snuffing is applied in cold or bad weather it may cause foetid nose, the same performed in summer or rainy season may cause head diseases. Others, however, take by 'anṛtudurdina' as cloudy weather in seasons other than the rainy one.[1]

22.'Pīnasa' is mature (chronic) coryza. In acute one snuffing is contraindicated. Thus there is no conflict.[2] 'Apatantraka' is only a type of 'apatānaka' in which consciousness is lost.[3]

Indication of snuffing in vātika disorder here is because of its potency for destroying kapha and vāta located in the particular site[4] (head).

---

1. अनृतौ दुर्दिने चेत्यादौ शीतदोषानित्यनेन शीतकाले दीयमानस्य दुर्दिने च कृतस्य पूतिनासाकर्तृत्वं, ग्रीष्मवर्षाकृतस्य तु शिरोरोगकर्तृत्वम्। अन्ये तु-अनृतुदुर्दिनमित्यनेन अवार्षिकं दुर्दिनमाहुः। CK.
2. पीनसोऽत्र पक्वप्रतिश्यायः, तरुणे च प्रतिश्याये शिरोविरेकनिषेध इति न विरोधः। CK.
3. अपतन्त्रक अपतानकभेद एव निःसंज्ञः। CK.
4. वातविकारेऽप्यत्र (शिरो) विरेचनं स्थानसंवन्धागत-श्लेष्मवातहन्तृत्वेनैवोपपन्नम्। CK.

CHAPTER III

6. Doṣa etc. to be examined include such items mentioned earlier in concerned chapters.[1]

7. Some read 'trikarṇikāni' instead of 'sukarnikāṇi'.[2]

8-10a. The nozzle should be six fingers long for one to six years of age, eight fingers for twelve years of age and twelve fingers for twenty years of age. Thus there is no variation in this measure before six and after twenty years but there is increase after six years at the rate of one-third finger every year and after twelve years at the rate of half finger every year. Suśruta has said about variations in the measure of the nozzle which should be ignored as it does not conflict much with the above.[3]

12b-13a. The bright fortnight is regarded as auspicious for all works. Hārīta, however, takes opposite view. He says that demons and disease arise in dark fortnight and as such they should be tackled then itself.[4]

13b-20a. Each component of triphalā and pañcamūlī also should be taken in the quantity of one pala.[5] 'Yuktyā' in the context of honey and salt (v.15) denotes that their quantiry is not fixed, it should be decided according to constitution of the patient. The quantity of meat-juice,milk and cow's urine etc. should be decided in the same way.[6] By association sudation is also understood by anointment.[7] (v.17).

---

1. अत्र दोषादयो ये दश परीक्षणीयाः प्रोक्तास्तेष्वेव उपकल्पनीयोक्तदोषभेषजाद्येकादशकस्य तथा रोगभिषग्जितीयोक्त-दशपरीक्ष्यस्यावरोधो व्याख्येयः,अनुक्तावरोधश्चायं योनिव्यापत्तिक एवास्माभिरुक्तोऽनुसरणीयः । CK..
2. "त्रिकर्णिकानि" इति केचित् पठन्ति। CK.
3. तत्र षडङ्गुलमेकवर्षात् प्रभृति यावत् षड्वर्षं, द्वादशवर्षस्याष्टाङ्गुलं नेत्रं भवति, विंशतिवर्षस्य द्वादशाङ्गुलं नेत्रं भवति। अत्र व्युत्क्रमाभिधानेन षड्वर्षादर्वाग् विंशतिवर्षादूर्ध्वं च नेत्रमानविकल्पो नास्ति, षड्वर्षादूर्ध्वं नेत्रमानविकल्पोऽस्तीति दर्शयति: तेन षड्वर्षादूर्ध्वं प्रत्यब्दमङ्गुलतृतीयभागवृद्धिर्भवति, द्वादशादूर्ध्वं प्रत्यब्दमर्धाङ्गुलवृद्धिः, एवमुक्तमानपूरणं भवति। सुश्रुते नेत्रमानभेद उक्तः, स नातिविरोधकारितया उपेक्षणीय एव। CK.
4. शुक्लपक्षे इति शुक्लपक्षस्य सर्वारम्भेषु प्रशस्तत्वात्। हारीतेन तु कृष्णपक्ष एवात्र विहितः। उक्तं हि-......कृष्णेऽसुराश्च सर्वरोगाश्च: तस्माद् रोगचिकित्सा कृष्णे सदैव कर्तव्या। Ck.
5. पलोन्मितत्वमिह त्रिफलापञ्चमूल्योरपि प्रतिद्रव्यम्। CK.
6. 'युक्त्या मधुसैन्धवे च' इत्यनेन मधुसैन्धवयोः प्रकृत्याद्यपेक्षयाऽनियतं मानं दर्शयति। चकारो मांसरसक्षीरगोमूत्रमदीनां चानियतं मानं दर्शयति। एषां च मानव्यवस्थामग्रे कषायमानप्रस्तावे दर्शयिष्यामः। CK.
7. तैलाक्तगात्रमिति अभ्यङ्गसाहचर्यात् स्वेदोऽपि ज्ञेयः, तेनाभ्यक्तस्विन्नमित्यर्थः। CK.

23b-24a. 'pūrvaṃ hi dadyāt' etc. is taken as unauthoritative by some but on the authority of other texts it shoud be read.[1]

26b. Though, as a general rule, basti eliminates doṣa only located in pakvāśaya, it also acts so in location of pitta etc. by application of particular basti.[2] The first and the second basti also destroy pitta and kapha but the pitta-eliminating and kapha-eliminating action of the second and the third respectively is due to association of the location ans as such they have been mentioned so.[3]

Though basti is not a treatment of choice in pitta and kapha, it is beneficial if they cover vāta or are associated by it.[4]

27-30a. Due to absence of āma, the dietetic regimen of gruel etc. is not desired here as in case of purgation.[5]

30b-31a. Even in small quantity of nirūha, decoction and sneha should be added in the prescribed proportion. The quantity of other components such as honey, paste and salt is not fixed as it is decided according to constitution. Thus by adding them in requisite quantity the measure of twelve prasṛta should be completed.[6]

On the authority of Jatūkarṇa, kalka (paste) is taken in quantity of two palas everywhere. Salt and honey are taken in quantity of one karṣa and two prasṛtas respectively. The portion remaining after mixing decoction, sneha, kalka, honey and salt is fulfilled by addition (āvāpa) of liquids like meat-juice, milk, cow-urine etc. according to doṣa.[7]

35b-45. Ck interprets 'pūrvapeṣya' as 'paste mentioned in balādi taila'[8] 'Trisneha' means 'snehas except majja'.[9]

---

1. 'पूर्वं हि दद्यात्' इति ग्रन्थं केचिदनार्षमाहुः, तन्त्रान्तरेषु त्वस्यार्थस्य दृष्टत्वाद् युक्त एवायं पाठः। उच्यते हि सुश्रुते............। CK.
2. यद्यपि . च बस्तिः पक्वाशयगतमेव दोषं जयतीत्युक्तं, तथापि पित्तादिस्थानेऽपि विशेषबस्तिविधिसामर्थ्याद् दोषहरणमुच्यते। तेन, उत्सर्गतस्तद्गतदोषहरणं विशिष्टविधानेन व स्थानान्तरगतदोषहरणं भवति। अयमर्थो जतूकर्णेऽप्युच्यते..........। CK.
3. अत्र द्वितीयः पित्तमपकर्षति, तृतीयः कफमपकर्षतीत्युच्यतेः तथापि प्रथमद्वितीययोरपि पित्तकफापहत्वमस्त्येव, परं द्वितीयेन पित्तापहरणं, तृतीयेन च कफापहरणं स्थानप्रत्यासत्त्या क्रियत इति कृत्वा द्वितीयः पित्तं हरति, तृतीयः कफं हरतीति चोक्तम्। CK.
4. पित्तकफयोश्च यद्यपि सुखं चिकित्सितं बस्तिर्न भवति, तथापि वातावरके वातानुबन्धे वा पित्ते कफे चैतद् बस्तिदानं ज्ञेयम्। CK.
5. पेयादिक्रमस्त्वत्र न क्रियते, विरेचनवदिहामस्याभावात्। अत एव सुश्रुते पेयादिक्रमं त्यक्त्वा रसादिक्रम उक्तः। CK.
6. एषा स्नेहमात्रा हीनमात्रेऽपि निरूहे क्वाथस्नेहयोरुक्तमात्रानुसारेण योजनीया, शेषाणां तु मधुकल्कसैन्धवानामिह मात्रानियमो नोक्तः, तेषामपि प्रकृत्यादिभेदेनानियतत्वात्। तेन मध्वादीनां प्रकृत्याद्यनुसारेण प्रसृतमानेन द्वादशप्रसृतत्वं पूरणीयम्। CK.
7. तत्र जतूकर्णप्रत्ययात् सर्वत्र कल्कस्य पलद्वयं भवति....... सैन्धवं तु कर्षप्रमाणमस्ति, यतः सुश्रुते-"सैन्धवाक्षं समादाय मधुनः प्रसृतद्वयम्".....तेनानया दिशा सैन्धवमधुकल्पना। यथोक्तकषायस्नेहकल्कमधुसैन्धवापूरितांशपूरणं चावापेनैव कर्तव्यम्। आवापश्चात्रानुक्तोऽप्युत्तरत्र वक्ष्यमाणो वातादिभेदेन मांसरसक्षीरगोमूत्रादिको ज्ञेयः। CK.
8. सपूर्वपेष्य इति बलाद्युक्तकल्कः। CK.
9. त्रिस्नेहयुक्त इत्यनेन मज्जपरित्यागं सर्वबस्तिसिद्धं स्मारयति। CK.

46-55. 'Suśīta' is beneficial in pitta. This should be understood in case of other pitta-alleviating bastis.[1]

56-64. Though in koṣātakādi formulaion (v.56), due to ten prasṛa of decoction and other items the quantity becomes large, the components should be added in such a way that the total quantity does not exceed twelve prasṛtas.[2]

70-71. Ck takes bilvataila, jīvanīyataila and madanataila as described in ch. 4 in Vs. 4-7, 9- 12 and 13-16 respectively.[3]

---

1. सुशीतत्वमिहौत्सर्गिकं मृदुकोष्ठेष्वधिकं पित्तहितत्वात्। अनया च दिशाऽपरपित्तहरबस्तावपि शीतत्वं ज्ञेयम्। CK.
2. अत्र क्वाथदशप्रसृतेन तथा कल्केन क्षौद्रादिना च यद्यपि मानमधिकं भवति , तथाऽप्येवमेव द्रव्यसंयोगं कृत्वा द्वादशप्रसृत एव बस्तिर्देयः, तदधिकमानस्य निषिद्धत्वात्। Ck.
3. तेन स्नेहव्यापत्सिद्धौ.......मदनतैलं ज्ञेयम्। CK.

CHAPTER IV

4-7. This formulation is known as 'bilvataila' as bilva is one of the components of daśamūla[1] (but it is not clear why bilva is given so much importance).

9-12. This yamaka (oil and ghee mixed together) is known as 'jīvanīya'.[2]

13-17. Saindhavādi formulation is called as 'madana-taila'.[3] Ck takes bilvādya gaṇa as 'daśamūla' while generally it denotes bṛhat pañcamūla as taken by GD. Daśamūla should be given as decoction and paste here.[4]

By 'kaphahara' the drugs mentioned in the preceding chapter or trikaṭu, pañcakola etc. should be taken.[5]

25. These complications arise due to faulty application of unctuous enema. Those arising due to defficient and excessive application are already described earlier. Their treatment is also reapplication of unctuous enema and eliminative enema respectively.[6]

29-31. 'Rāsnā-taila' is the same as described in the chapter on vātavyādhi.[7] (Ci. 28).

36-37. Here 'varti' means 'phalavarti'. Some read it as 'basti'.[8] Here again by 'bilvādi' daśamūla has been taken by Ck while GD takes Bṛhatpañcamūla.[9]

46-47. The digestive fire digests the uncting substance covering the pakvāśaya by its outgoing heat. Though agni residing in jaṭhara (āmāśaya) has no direct contact here, the function is performed by its mixed parts. 'Prāyaḥ' indicates the completion of digestion in five days also and as such in case of those with poor digestion unctuous

---

1. एतद् दशमूलस्थितबिल्वेन बिल्वतैलमिति वदन्ति। CK.
2. एतद् यमकं पूर्वाध्याये जीवनीयसंज्ञया व्यपदिष्टम्। CK.
3. एतच्च मदनतैलमिति ख्यातम्। CK.
4. बिल्वाद्यो गणः दशमूलं, दशमूलं चात्र क्वाथकल्काभ्यामपि देयम्। CK.
   बिल्वादिगणेन बृहत्पंचमूलेन। GD.
5. कफहरैरिति पूर्वाध्यायोक्तकफहरभेषजैः, किंवा त्रिकटुकपंचकोलादिभिः। CK.
6. एताश्च व्यापदः मिथ्यायोगेन स्नेहस्य क्रियमाणा उच्यन्ते ......अनुवासनायोगातियोगजन्याश्च व्यापदः कल्पनासिद्धावेवोक्ताः; तद्भेषजं चातिस्नेहिते शोधनबस्तिः, अस्नेहिते पुनः स्नेहबस्तिदानमेव ज्ञेयम्। CK.
7. रास्नातैलं "रास्नासहस्रनिर्यूहे" इत्यादिना विहितं वातव्याधावुक्तम्। CK.
8. स्नेहं विडावृतमित्यादौ वर्तिभिरिति फलवर्तिभिः, केचित्तु "बस्तिभिः" इति पठन्ति। CK.
9. बिल्वादीनि दशमूलानि। CK.
   बिल्वादिपंचमूलक्वाथसिद्धैः। GD.

enema has been prescribed in five days.[1]

52-54. 'Hrasva' (small)means the dose which is digested in half a day. In other text, the three doses of sneha have been fixed on the basis of weight such as six, three and one and half palas in high, medium and lowest measures. Sušruta has also said about this. Thus mātrābasti comes as in quantity of one and half palas The basti in quantity of six palas is snehabasti while that of three palas is anuvāsana.[2]

---

1. त्र्यहात् स्नेहं पचतीति पक्वाशयोपलेपकं स्नेहं बहिर्निःसृतेनोष्मणा पचति। यद्यप्यत्राग्निनोर्ध्वस्थितेन तादृशः संबन्धः स्नेहस्य नास्ति, तथापि जाठरस्यैव विमिश्रितैरवयवैस्तत्पाको वक्तव्यः। प्रायःशब्देन पंचाहपाकमपि दर्शयति, तेन पंचाहदानमप्यनुवासने मन्दाग्निं प्रति प्रागुक्तं ज्ञेयम्। CK.
2. ह्रस्वाया इति अर्धाहःपरिणमनीयायाः।....तन्त्रान्तरे-स्नेहमात्रात्रयं प्रमाणैरेवोक्तं, यथा- "षट्पली तु भवेज्ज्येष्ठा मध्यमा त्रिपली भवेत्। कनीयसी सार्धपला त्रिधा मात्राऽनुवासने।।, इति। सुश्रुतेनापि बस्तिप्रमाणमुक्तं....। अनेन व सार्धपलमानो मात्राबस्तिरुक्तो भवति, तत्र हि षट्पलः स्नेहबस्तिरुक्तः, अनुवासनं तु त्रिपलम्। CK.

CHAPTER V

1-3. The defects of nozzle and enema-pouch and also the complications arisen due to improper application of enema are described in this chapter. In relation to nozzle and enema-pouch, the success depends on avoiding these defects.[1]

9-10a. These have been mentioned earlier (in ch.3), still they are repeated here from the view of the treatment of complications, if arisen due to carelessness.[2]

13-15a. Here again 'bilwādi' (v.14) has been interpreted by Ck as 'daśamūla' and (bṛhat) pañcamūla by GD.[3]

---

1. नेत्रगता तथा बस्तिपुटकगता च व्यापत् तथा नेत्रासम्यक्प्रणिधानजन्याश्च या व्यापदस्तासां सिद्धिः; तेन नेत्रबस्तिव्यापत्सिद्धिः दुष्टनेत्रबस्तिपुटकयोश्च व्यापत्सिद्धिः तयोः सदोषत्वेन ज्ञात्वा परिवर्जनम्। CK.
2. एते चानुच्छ्वासनादयो यद्यपि पूर्वमेव निषिद्धाः....तथापि प्रमादात्तथा प्रयोगे सति जातव्यापदां चिकित्साभिधानार्थमस्मिन् प्रकरणे पुनरुक्ताः। CK.
3. बिल्वादि दशमूलम्। CK.
   बिल्वादि पंचमूलम्। GD.

CHAPTER VI

1-2. Basti is the chief of all the five karmas as also stated earlier (in ch.1). Here emesis and purgation are treated in order to control the possible complications.[1]

5-6. Thus there are two orders of seasons-one having prāvṛt and the other having śiśira. The former is followed in evacuative therapy while the latter in normal condition and origin of rasas. Accordingly, this has been mentioned earlier (in Su. 7 and Vi.8). But the order having prāvṛt is formulated only with the purpose of evacuation and as such is not real.[2]

The view of others according to which this is explained on geographical division e.g. north and south coast of Gangā is also not intended here as it relates to the specific purpose of evacuation and not the natural division.[3]

This prescribed time of evacuation should be known for general disorders, in case of emergency, something special is done even in other seasons.[4]

9. In too uncted person, the unctuous purgative, due to excessive lubrication, goes out forcefully without eliminating the doṣa which displaced from their positions re-enter the channels. To eliminate this, rough purgative should be administered.[5]

29-30. In case of emesis and purgation there is no mithyāyoga (faulty application) but only ayoga (deficient or no application) and atiyoga (excessive application). Expulsion of doṣas may be in four ways-excessive, defective, absent or deficient, the latter three are, essentially, ayoga.[6]

---

1. तेन बस्तिव्यापत्सिद्ध्यभिधानेन बस्तेरिह कर्मभ्यः प्राधान्यमपि द्योतितं, बस्तिप्राधान्यं "तस्माच्चिकित्सार्धमिति ......(सि०अ० 9) इत्यनेनोक्तम्। अत्र चानागतव्यापच्चिकित्सार्थत्वाद्वमनविरेचनयोः सम्यग्विध्यभिधानम्। CK.
2. शोधने कर्तव्येऽयं यथोक्तः प्रावृडादिऋतुविभागो भवति, स्वस्थवृत्तौ रसोत्पत्तौ वा तस्याशितीयोक्त एव वर्षाशरद्धेमन्तशिशिरवसन्तग्रीष्मरूपः ऋतुक्रमो भवति। ....एतदुक्तसंशोधनाङ्गर्तुक्रमविभागेनैव चरकसंस्कारेऽपि न वेगान्धारणीये....तथा रोगभिषग्जितीये च शिशिरं पारित्यज्य प्रावृडादिनैव ऋतुक्रमः संशोधनाङ्गतयोक्तः तेन रसबलोत्पादचिन्तायां स्वस्थवृत्तानुष्ठानेषु च शिशिरादिक्रमो भवति, संशोधनव्यवस्थायां तु प्रावृडादिरिति प्रावृडादिक्रमोऽयं संशोधनानुकूलतयाऽऽचार्येण कल्पितो न पारमार्थिकः। CK.
3. ये तु प्रावृडादिक्रमं गङ्गायाः दक्षिणे कूले, उत्तरेऽपि शिशिरादिक्रमं वदन्ति, तन्मते 'शोधनं प्रति' इति ग्रन्थोऽनुपपन्नः। तेन "भूयो वर्षति पर्जन्यः"....इत्यादिना ग्रन्थेन यदि नाम देशभेदेनापि ऋतुक्रमः पारमार्थिकोऽभिधीयते, तथापि नासावाचार्यस्येहाभिमतः। CK.
4. अयं च शोधनकालोपदेशोऽनात्ययिके व्याधौ ज्ञेयः, आत्ययिके तु.......अत्युष्णेऽपि काले संशोधनप्रवृतिर्भवत्येव। CK.
5. अतिस्निग्धस्य स्नेहविरेचनं स्नेहप्रकर्षादतिवेगं गच्छन् प्रचलितानपि दोषान् निहन्तुं न शक्नोति, दोषास्तु तेन विरेचनेन स्वस्थानात् प्रच्याविताः भूयः स्रोतःसु लीयन्ते, तत्प्रतिषेधार्थं रूक्षं विरेचनं सम्यग्योगकारकं दद्यादित्ययमाशयः। CK.
6. यद्यपि चायोगातियोगमिथ्यायोगास्तत्र तत्र कारणत्वेनोक्ताः, तथापीह वमनविरेचनयोर्मिथ्यायोगं नेच्छन्ति। यतो दोषाणां चतुर्विधैव प्रवृत्तिर्भवति यत्-अतिप्रवृत्तिः, असम्यक्प्रवृत्तिर्वा,अप्रवृत्तिः, अल्पप्रवृत्तिर्वा। तंत्राप्यप्रवृत्यल्पप्रवृत्ती अयोगगृहीते एवः यापि चात्र प्रातिलोम्येन प्रवृत्तिः, सापि दोषस्यापेक्षितस्याप्रवर्तकत्वादयोगगृहीतैव। CK.

38-39, 'Anava' means 'of deteriorated potency due to long period of storage.'[1]

45-57. This pathogenic material fits into the excess of purgation and is only inferrable in that of emesis or the word 'atitīkṣ́ṇa' may apply to emesis as well being as cause of excess. Elimination of faeces, pitta and kapha may be understood respectively in purgation and emesis.[2]

'Vaṭādi' means 'vaṭa, udumbara' aśvattha, plakṣa and kapītana' the five trees of pañcakaṣāya group.[3]

58-60. These disturbances, being complications, do not necessarily arise in excessive or deficient expulsion.[4]

61-63. 'pītam gatvā gudam' etc. is pertinent for the cutting pain caused by excessive purgation and can't denote the same arisen due to excessive emesis. But as in upakalpanīya chapter (Su.15) these are stated in relation to both emesis and purgation, the cutting pain, though not said, should be understood on this basis. Thus all the disturbances, flatulence etc., are explained in relation to emesis and purgation- thus say some.[5]

64-67. By 'kṣārāmla' (v.64) the cāṅgerī etc. formulation prescribed in atisāra should be taken. 'Laghu' means 'small dose.'[6]

68-70. Pacification is done in case of slight disorder while emesis in that of excessive and when dose is directed upwards.[7]

78-84. The test for vital blood and raktapitta is done for selection of treatment. In raktapitta the treatment would be to pacify it while in case of vital blood, that prescribed here should be adopted.[8]

---

1. अनवमिति जीर्णतया मन्दवीर्यम्। CK.
2. इयं च सामग्री विरेचनातियोगस्यैव घटते, यतो मृदुकोष्ठे बुभुक्षिते च विट्पित्तकफहरणक्रमेण च सैवातियुज्यते, वमनातियोगसामग्री चानेनोदाहरणेनोन्नेयाः किंवा, अतितीक्ष्णमिति पदेनैव वमनस्याप्यतितीक्ष्णत्व मतियोगकारणमुक्तं, विट्पित्तकफहरणं यथायोग्यतया क्रमेण विरेचने वमने च बोद्धव्यम्। CK.
3. वटादीनां न्यग्रोधोदुम्बराश्वत्थप्लक्षकपीतनानाम्। CK.
   वटादीनां पंचकषायवृक्षाणाम्। GD.
4. एताश्च व्यापदो नावश्यमतियोगायोगयोर्भवन्ति, उपद्रवभूतत्वात्। CK.
5. "पीतं गत्वा गुदम्" इत्यादिविरेचनातियोगजन्यपरिकर्तिकायां संगतं, न वमनातियोगजन्यपरिकर्तिकायाम्। उपकल्पनीये च साक्षाद्-वमनायोगातियोगजन्यतयैवाध्मानादय उक्ताः, तेनानुक्तोऽपि वमनव्यापत्तौ परिकर्तोऽनेनोदाहरणेन कल्पनीयः। ......तदनया दिशा आध्मानादीनि वमनविरेचनयोरयोगातियोगजन्यतया व्याख्यातानीत्येके। CK.
6. क्षाराम्लं लघु शस्यत इति अतिसारे यदुक्तं-'चाङ्गेरीकोलदध्यम्लनागरक्षारसंयुतम्। घृतं' (चि० अ० 19) इतिः लघुमात्रं च शस्यत इति ज्ञेयम्। CK.
7. अल्पदोषे शमनं, बहुदोषे ऊर्ध्वगतदोषे तु वमनमिति व्यवस्था। CK.
8. परीक्षा च चिकित्साभेदार्थमेवः रक्तपित्ते रक्तपित्तहरी क्रिया, जीवशोणितं तु दृष्ट्वा 'तृष्णा मूर्च्छामदार्तस्य' इत्यादिनोक्ता कर्तव्या। CK.

90-91. Though flatulence etc. are also 'upadrava', because of their mention by different term (vyāpad), šūla (colic pain) etc. only are said here as such. Šūla etc. are, though predominant, called as 'upadrava' because they arise after the performance (of emesis etc.). Or these complications may be taken as relating to deficient performance.[1]

1. यद्यप्याध्मानादयोऽप्यमी उपद्रवा एव, तथापि तेषां संज्ञान्तरेणैव गृहीतत्वाच्छूलादय एव उप्रदवशब्दाभिहिताः। शूलादयश्चामी प्रधानान्युत्तरकालभावित्वादनुपद्रवरूपा अप्युपद्रवशब्देनोच्यते।....किंवा, अयोगाख्यस्य व्याधेरमी उपद्रवा इति ज्ञेयम्। CK.

CHAPTER VII

1-2. Here the word 'basti' is meant for nirūha.[1]

3-6. Some read 'nātiyogāt klamādhmāne' (v.5) and 'daśaitā vyāpado' (v.6) but the readings mentioned here 'nātisyogau' and 'dvādaśa vyāpado' are flawless.[2] The word 'rūpa' (v.6) includes 'hetu' as well.[3]

7-11. Here 'guru' (v.7) means 'hard' or 'full with faeces.'[4] The hot 'pramathyās' refer to those mentioned under the treatment of diarrhoea. 'Pramathyā' is the technical term of Āyurveda denoting digestive decoction.[5]

15-20. Here 'doṣa' means pitta and kapha associated with āma and covering the passage. Others take by it only kapha and interpret 'dāha' as an associate of klama.[6] Appetising kṣāras (v.19) refer to those mentioned under the treatment of grahaṇī etc.[7] 'Dāśamūlikaṃ' means 'that mentioned in siddhisthāna ch. 3 (v.35) or 'of daśamūla decoction.'[8]

21-26. 'śyāmāphalādibhiḥ' (v.23) denotes 'śyāmā etc. nine drugs and madanaphala etc. six drugs mentioned in kalpasthāna.[9] Bilvādi' means bilvamūla etc. (v. 11), GD takes bilvādi pañcamūla.[10]

27-29. Though in hiccough enema is *contra-indicated,* here in particular hiccough unctuous enema is beneficial.[11]

---

1. अत्र बस्तिशब्दो निरूह एव वर्तते, तद्व्यापदामेवात्र वक्तव्यत्वात्। CK.
2. केचित् "नातियोगात् क्लमाध्माने" इत्यादि, तथा" दशैता व्यापदो बस्तेः" इत्यादि पठन्ति। तत्र पूर्वाध्यायोक्तव्याख्यानादर्थो नेयः, किन्तु पूर्व एव पाठो निर्व्यूहः। CK.
3. आसामित्यादौ रूपशब्देनैव प्रति प्रति वक्ष्माणहेतुविशेषोऽवरुद्धो ज्ञेयः, येन हेतुरपि हि व्यासगमकतया रूपमेव। CK.
4. गुरुकोष्ठे इति क्रूरकोष्ठे मलपूर्णकोष्ठे वा। CK.
5. उष्णायाः प्रमथ्याया इति अतीसारोक्तप्रमथ्यानां या प्रमथ्या उष्णा तस्याः प्रयोगः। प्रमथ्येति पाचनकषायस्यायुर्वेदसमयसिद्धसंज्ञेति प्रतिपादितमेवातीसारे। CK.
6. दोषशब्देन चात्र पित्तकफावामसहितौ मार्गावरकावुच्येते .....ये तु दोषशब्देनेह कफमात्रं ग्राहयन्ति, तन्मते सदाहत्वं क्लमस्याप्युपपन्नम्। CK.
7. "क्षारांश्च दीपनान्" इति ग्रहणीचिकित्साद्युक्तान्। CK.
8. दाशमूलिकमिति "द्विपंचमूलस्य रसोऽम्लयुक्तः" (सि०अ० 3) इत्यादिनोक्तं, किंवा, दशमूलक्वाथकृतम्। Ck.
9. श्यामादिभिर्नवभिः फलादिभिश्च षड्भिः कल्पस्थानोक्तैः। CK.
10. बिल्वदिभिश्च निरूह इति "बिल्वमूलत्रिवृद्दारुयवकोलकुलत्थवान्" इत्यादिनोक्तः। CK.
    बिल्वादिपंचमूलक्वाथेन। GD.
11. हिक्कायां च यद्यपि.....बस्तिर्निषिद्धः, तथापीह विशिष्टहिक्कायामनुवासनस्य हितत्वात्....अनुवासनमनवद्यम्। CK.

30-31. Vāta-alleviating as daśamūla etc.[1]

32-39. Some read 'yāvat prāṇoparodhāddhi' (v.36) in place of 'prāṇodānanirodhāddhi.'[2]

40-42. 'Śodhanīya' means 'combined with evacuative drugs like trivṛt etc.' and 'ānulomika' means 'added with anulomana substances such as milk and sugarcane juice.[3] Vṛtti' means 'dietary regimen.[4]

43-46. Some read 'ūrdhvam mūrdhni vidhāvati' in stead of 'ūrdhvam mūrdhni vihanyate

(v.44). By 'asya virecayet,' 'śiraḥ' is understood or 'anu virecayet'[5] is the alternative reading.[6] 'Tīkṣṇānulomika' relates to food or enema.[7]

64. Such potency is only in basti and not in digestive remedies and as such the latter are not able to overcome the doṣa instantaneously.[8]

1. वातघ्नैरिति दशमूलादिभिः। CK.
2. केचित्तु "यावत् प्राणोपरोधाद्धि" इति पठन्ति। CK.
8. शोधनीयानिति त्रिवृदादिशोधनद्रव्ययुक्तान्, आनुलोमिकानिति अनुलोमनक्षीरेक्षुरसयुक्तान्। CK.
4. वृत्तिमिति पेयादिक्रमम्। CK.
7. ये तु "ऊर्ध्वं विधावति" इति पठन्ति, तन्मते उपर्युपरि धावतीत्यर्थः। CK.
6. "अस्य विरेचयेत्" इत्यत्र "शिरः" इति शेषः, 'अनुविरेचयेत्" इति वा पाठः। CK.
7. तीक्ष्णानुलोमिकेऽन्ने भुक्ते सति अनुवासयेदिति योज्यम्; किंवा, तीक्ष्णानुलोमिकेनैवानुवासनं साध्यमित्यर्थः। CK.
8. एवंभूतवीर्यं बस्तावेव, तेन पाचनादिप्रयोगाणां न बस्तिवत्तदहरेव सकलदेहगतदोषविजेतृत्वं भवति। CK.

CHAPTER VIII

1-2. This chapter deals with the formulations in measure of prasṛta and so the title 'prāsṛtayogīyā'.[1]

ग०—गोकरञ्जः (सू० १४।३१; वि० ७।१७; चि० ७।११९, १५२; १५।१७९ इत्यादि)
—कण्टकिफलमिति कश्चित, करमर्दफलमित्यन्ये (सू० २७।१६०)
—वहरकरञ्जमूलम् (चि० ३।२६७)
—नाटाकरञ्ज (चि० ७।१११)
—गोकरञ्जफलम् (चि० ९।६९)
—करञ्जयोः गोकरञ्जनाटाकरञ्जयोः (क० ११।१४)

यो०—चिरबिल्वः (सू० ५।७८
—वहरकरञ्जः (चि० ३।२६७)
—गोकरञ्जः (चि० ७।१५२; ९।६९)

करमर्द(क)ः

च०—करमर्दं द्विविधं ग्रामजं वनजं च (सू० २७।१६१)
ग०—करञ्जः (सू० ४।१०; चि० १४।९)
—पानीयामलकम् (सू० २६।८४)
यो०—कराम्लः करमचा इति प्रसिद्धः (सू० ४।१०)
—करमचा इति वङ्गेषु (सू० २६।८४)
—प्रसिद्धम् (सू० २७।१६१)
—स्वनामप्रसिद्धः (वि० ८।१४०)
—करमचा इति वङ्गेषु ख्यातः (चि० १४।९)

करहाटः

च०—मदनः (चि० २६।१५)

करीरः

च०—मरुजो द्रुमः (सू० २७।१४२)
—मरुजद्रुमः (चि० ३०।८२)
ग०—मरुजद्रुमः (सू० २७।१४२)
—मरुजद्रुमः (वि० ८।१४० (पा०), १४३)
—वंशकरीरस्याग्रम् (चि० १४।१०)
—मरुजो द्रुमविशेषः (चि० ३०।८२)
यो०—मरुजः द्रुमः (सू० २७।१४२)
—वंशांकुरः (वि० ८।१४३; चि० १४।१०)

कर्कट(क)म्

च०—कर्कटकमिति कर्कटश्रृङ्गी (कल०) (चि० १८।५१)
ग०—कर्कटश्रृङ्गी (चि० १४।९०)
—कर्कटश्रृङ्गी (चि० १८।१५३ (पा०)

कर्कटकी

च०—कर्कटश्रृङ्गी (चि० १८।५१, १५३)
—कर्कटकमिति कर्कटश्रृङ्गी (कल०) चि० १५।५१)
यो०—कर्कटश्रृङ्गी (चि० १८।५१, १५३)

कर्कटश्रृङ्गी

ग०—काकड़ाश्रृङ्गी (वि० ८।१३९)
—कर्कटकस्य श्रृङ्गी कर्कटश्रृङ्गी (चि० २०।३८)
यो०—कर्कटकस्य श्रृङ्गी कर्कटश्रृङ्गी (चि० १८।११५)

कर्कटाख्या

ग०—कर्कटश्रृङ्गी (चि० १७।९४)

योः—कर्कटश्रृङ्गी (चि० १६।८९; १७।९४; १८।११८, १७३, १७७)

कर्कटाह्वा

योः—कर्कटश्रृङ्गी (चि० १८।५४ (पा०)

कर्कटिका-कर्कटी

ग०—कर्कटश्रृङ्गी (चि० १९।१०४)
यो०—कर्कटश्रृङ्गी (चि० १९।१०४; १८।८७ (पा०)

कर्कन्धुः

च०—(कुवलबदरकर्कन्ध्विति) बदरीत्रयम् (सू० ४।२४)
—श्रृगालबदरी (सू० २५।४९; २७।१३२)
—कर्कन्धूकोलबदरशब्देन त्रिप्रकारबदरग्रहणम् (क० ११।७)
—कर्कन्धुशब्देनेह [1]श्रृगालबदरी स्वल्पा गृह्यते (सि० ३।८)
ग०—···श्रृगालकोलीति बदरत्रयम् (सू० ४।२४)
—श्रृगालकोली (सू० २५।४९)
—क्षुद्रफलबदरम् (सू० २७।१३२)
—स्वल्पबदरम् (चि० १३।१२५)
यो०—क्षुद्रबदरम् (सू० ४।२४)
—अल्पं बदरम् (सू० २५।४९; २७।१३२)
—कुवलबदरकर्कन्धुः बदरभेदाः (वि० ८।१३६)
—कोलकर्कन्धू बृहदल्पबदरभेदौ (चि० १३।१२५)
—बदरम् (चि० १४।१०)

कर्कशः

च०—स्वल्पकर्कोटकः (सू० २७।९७)
—पटोलभेदः (वि० ८।१४३)
ग०—स्वल्पकर्कोटकफलम् (सू० २७।९७)
—कम्पिल्लः (वि० ८।१४३)
यो०—कम्पिल्लकः (सू० २७।९७)
—पटोलभेदः (वि० ८।१४३)

कर्कारुकः

च०—कुष्माण्डभेदः (चि० १९।३२)
ग०—कर्कारुकाणां कर्कटीजातीनाम् (चि० १९।३२)
यो०—कुष्माण्डभेदः (चि० १९।३२)

कर्कोट(क):

ग०—कौंकरोलाख्यस्यफलम् (सू० २७।९६)
—कौंकरोल इति लोके (वि० ८।१४३)
यो०—कांकरोल इति ख्यातः (वि० ८।१४३)
—···कांकरोल इति वंगेषु ख्यातं शाकम् (चि० ३।१९०)

कर्चूरः

यो०—द्राविडकः हरिताभः पीतशटीतिख्यातः (सू० २७।१५५)

कर्णिकारः

च०—व्यवहारार्थं पर्यायानाह-आरग्वध इत्यादि (क० ८।३)
ग०—आरग्वध इत्यादयः पर्यायाः (क० ८।३)

कर्पूरम्

यो०—कर्पूरनिर्यास-कर्पूरात्मको निर्यासः कर्पूरनिर्यासः (सू० ५।७७)

कर्बुदारः

च०—श्वेतकाञ्चनः (सू० ४।२३)
—काञ्चनः (सू० २७।९९)
—काञ्चनभेदः (चि० १४।२०२)
—काञ्चनारः, स वसन्ते पुष्पति (क० ११।४)
—काञ्चनारः (सि० ७।६१; १०।३४)
ग०—श्वेतकाञ्चनः (सू० ४।२३)
—रक्तकाञ्चनः (वि० ८।१३५; सि० १०।३४)
—श्वेतकाञ्चनालः (क० २।८-११)
—रक्तकाञ्चनपुष्पम् (चि० १४।२०२)
—रक्तकाञ्चनत्वचि (सि० ७।६१)
यो०—श्वेतकाञ्चनः श्लेष्मातको वा (सू० ४।२३)
—श्लेष्मातकः (सू० २७।९९)

कलमः

च०—वंदाग्रहारेषु स्वनामप्रसिद्धः (सू० २७।८)
यो०—मगधादिषु स्वनाम्ना प्रसिद्धः (सू० २७।८)
—···कलम···एते तत्तदाख्यशालिभेदाः (चि० १४।९५)

कलम्बः(म्बी-म्बुः)

ग०—कलम्बुः कलमीशाकम् (सू० २७।१०१)
यो०—कलम्बी प्रथिता; वाग्भटे कलम्ब इति पाठः, कलम्बः कदम्बः (सू० २७।१०१)

कलशी

जे०—पृश्निपर्णी (चि० ३।२२४)

१. 'तदस्थि' इति पा०।

च०—सिंहपुच्छी (चि० ३।१८७)
ग०—शालपर्णी (चि० ३।१८७, २२४)
यो०—पृश्निपर्णी (चि० ३।१८७, २२४)

कलायः

च०—कलायो वातल इति त्रिपुटकलायः (सू० २७।२९)
—वर्त्तुलकलायः (सू० २७।१७)
ग०—खण्डिको (सू० २७।२९)
—वर्त्तुलकलायपत्रम् (सू० २७।१७)
—वर्त्तुलत्रिपुटकलायः (चि० २५।६२)
यो०—कालायं शाकं कालशाकम् (सू० २७।९२)

कलिङ्ग(क):

जे०—इन्द्रयवाः (चि० ३।२००)
ग०—इन्द्रयवाः (चि० ३।२१९, २२८; १५।१०१)
—कलिङ्गकानिन्द्रसाह्वानिति भागद्वयमिन्द्रयवस्येत्यर्थः (चि० ६।४२[1])
—कलिङ्गयव इन्द्रयवः (चि० ७।९१)
यो०—इन्द्रयवाः (चि० ३।२००, २१९, २२८; ७।६८; १२।४४ इत्यादि)
—इन्द्रसाह्वान् कलिङ्गकान् इन्द्रयवान् (चि० ६।४२)
—कलिङ्गफलं इन्द्रयवः (चि० ७।४६)
—कलिङ्गयवा इन्द्रयवाः (चि० ७।९१)

कशेरु(क)म्

च०—कशेरुक शब्देन चिंचोडका राजकशेरुकश्च गृह्यते (सू० २७।११६)
—चिञ्चोटकः (वि० ८।१३९)
—केचित् कसेरुकमिषन्नीलपीतमणिमाहुः (ब०)।
कसेरुकमीषन्नीलपीतो मणिः (कल०) (चि० १७।१२६)
—राजकशेरुः[2] कशेरुरेव (सि० ३।४९)
ग०—कसेरुकं द्विविधं—क्षुद्रं चिञ्चोटकं, बृहत् तु राजकशेरुकम् (सू० २७।११६)
—चिञ्चाइकः (वि० ८।१३९)
—चिञ्चुया (वि० ८।१४४)
—केशुर इति लोके (चि० ३।२५८)
यो०—केशुर इति ख्यातम् (सू० ३।२१; वि० ८।१३९)
—केसुर इति ख्यातम् (सू० २७।११६)
—केशुर इति वङ्गेषु प्रसिद्धम् (चि० ३।२५८)
—केशुर इति वङ्गेषु ख्यातः (चि० १४।९, १०)
—कसेरु इति ख्यातं च……कसेरुकं ईषन्नीलपीतो मणिविशेषः—इत्यन्ये (चि० १७।१२६)
—कशेरुका कशेरुः (वि० ८।१४४)
—कशेरुका केशुर इति ख्याता (चि० ८।८४)

काकणन्तिका (न्ती)

च०—गुञ्जा (चि० ७।२०)
ग०—गुञ्जाफलम् (नि० ५।८; चि० ७।२०)
यो०—काकदन्ती गुंजा (चि० ७।२०)
—काकदन्तिका (चि० १४।१०)

काकनासा

जे०—वाशा (नासा ?) फलानि (चि० ३०।५१)
च०—नासाफला 'काकतुण्डक' इत्यन्ये (ब०)।
वासाफलका, काकतुण्डक इत्यन्ये (कल०) (चि० ११।६४)
—वायसीफलम्, अन्ये तु वासाफल 'कायुयाटुटी' इति ख्यातं द्रव्यान्तरमेवाहुः (सि० ४।५)
ग०—केउठुटी (वि० ८।१३९)
—केउयाठोंटीति लोके (चि० ११।६४)
—काउयार्ठुठीति लोके (चि० १०।३७)
—काउयाठोटी (चि० १८।४०)
—काउयाठुटीति लोके (चि० ३०।५१)
—काउयाठुठी (सि० १०।३७)
यो०—केयोठुटी इति वङ्गेषु ख्याता (वि० ८।१३९)
—काकनासिका काकनासा काउयाठोटीति वङ्गेषु (चि० ११।६४)
—केउयाठंटीति वंगेषु (चि० ७।१२३)
—काकतुण्डफलाम् (चि० १८।४०)

काकमाची

ग०—स्वनामख्याता (वि० ८।१४३)
यो०—वापसी प्रसिद्धा (सू० २७।८९)

काकाण्डः

जे०—काकनन्दी, सैव वायसपीलुकः (चि० २३।२१७)
च०—शूकरशिम्बिः (सू० २७।३४)
—शिम्बीभेदः (चि० २३।४९)
ग०—कृष्णशिम्बः (सू० २७।३४)
—कृष्णशिम्बी (चि० २३।४९, ५३, २१७)

---

१. इस स्थल पर कलिङ्गकान् एवं इन्द्रसाह्वान् दोनों पाठ एक साथ पठित है।

२. चक्रसम्मत।

काकाण्डोला

यो०—शूकरशिम्बी (सु० २७।३४)

काकाह्वा

च०—काष्ठोदुम्बरिका (ब०)।
गोष्ठोदुम्बरिका (कल०) (चि० २१।९०)
ग०—काकमाची (चि० २१।९०)
यो०—काकमाची (चि० ३।२६७ (पा०)

काकोदुम्बरिका

ग०—कोठोदुम्बरः (चि० ८।१४३; चि० ७।१७०)
यो०—काकोदुम्बरः (चि० ८।१४२)

काकोली

ग०—स्वनामख्याता (सू० ४।२)
यो०—काकोलीक्षीरकाकोली काकोलीद्वयम् (सू० ४।२१)
—काकोल्यौ द्वे—द्वे काकोल्यौ काकोलीं क्षीरकाकोलीं च (चि० ११।३५)
—काकोलीयुग्मं—काकोली क्षीरकाकोली च (चि० १८।९९)

कांक्षी

ग०—कांची आढकीमूलम् (चि० ३०।१२१)

काञ्चनक्षीरी

ग०—स्वर्णक्षीरी माह्वीति (चि० १३।१३३)
यो०—स्वर्णक्षीरी (चि० १३।१३३)

काण्डेक्षुः

जे०—शरः (२१।२४)
च०—बृहदिक्षुः (ब०)।
बृहदिक्षुरः (कल०) (चि० २१।२४)
—बृहदिक्षुः (सि० १०।३३)
ग०—लटा इति लोके (सू० ४।२०; चि० २१।२४)
बृहदिक्षुः (सि० १०।३३)
—कठिनोऽल्परस इक्षुः खालिया इति लोके (सू० २५।८९)
—इक्षुवालिका (नि० ७।१४)
यो०—इक्षुभेदः (चि० २१।२४)

कान्ता

च०—मञ्जिष्ठा (चि० २५।११६)
यो०—स्थूलैला। कान्तेत्यत्र प्रायः सर्वत्र कौन्तीति पठ्यते (चि० ३।२५१ पा०)

कायस्था

च०— सूक्ष्मैला (चि० ९।५७)
—सुरसा (चि० १७।१४१)
—वयःकयस्थेति वयःस्थाकायस्थयोर्गुडूच्यामलक्योः (ब०)।
वयःकयस्थेति गुडूची (कल०) (चि० २३।८३)
ग०—आमलकी (चि० ९।४६ (पा०)
—सूक्ष्मैला (चि० ९।५७; १०।१६, ४८)
—कयस्था सूक्ष्मैला (चि० २३।८३)
यो०—क्षीरकाकोली (चि० ९।४६, ५७)
—सूक्ष्मैला (चि० १०।४६, ४८)
—हरीतकी, सुरसा इत्यन्ये (चि० १७।१४१)

कारवी

जे०—शाकविशेषः या गोस्तनिकेत्युच्यते (चि० २४।१८२)
च०—कृष्णजीरकम् (सू० २७।३०७)
—अश्वजीरकम् (चि० १३।१२६)
—स्वल्पपत्रा (चि० २४।१८२)
ग०—कृष्णजीरकम् (२७।३०७)
—क्षुद्रकृष्णजीरा (चि० १३।१२६)
—क्षुद्रकृष्णजीरकम् (चि० १४।७२, ८९; २४।१८२; २६।२१९)
यो०—कृष्णजीरकम् (सू० २७।३०७)
—अजमोदा (चि० १३।६०)
—क्षुद्रजीरकः (चि० १३।१२६; १४।७२, ८९, १०३)

कारवेल्लः

ग०—कारवेल्ल इति बृहत्कारवेल्लः (चि० ८।१४४)

कार्पास (सी)

ग०—तूलकम् (सू० १५।७)
—वनकार्पास्याः (चि० ७।९६)
—कार्पासपिचुना तूलकेन (शा० ८।४३)
यो०—तूलकम् (सू० १५।७)

कालः

ग०—कृष्णागुरु (चि० २७।११६ (पा०)

कालकः

ग०—कालशाकः (क० १।२५ (पा०)

कालकू(कृ)तकः

च०—कालकूतो [1]कासमर्दः (चि० ८।१२५)

१. 'मर्हिसा' इति पा०।

—[1]विकङ्कतकः इति पा० (चि० २६।७३–७५)
ग०—कालकण्टको डाउक इति ख्यातः (क०१।२५) (पा०)
यो०—कासमर्दः (वि० ८।१३५)

कालमालकः

जे०—कालमल्लिका (चि० ३।२६७)
च०—सुमुखादयः फणिज्झकान्ताः पर्णासभेदाः (मि० २।४)
—सुमुखादयः पर्णासभेदाः (वि० ८।१५१)
ग०—कालमालः कासमर्दः (वि० ७।२१)
—कालमालः कृष्णतुलसी (वि० ८।१४२)
यो०—सुरसकुठेरककालमालकपर्णासफणिज्झकाः तुलसी-
भेदाः (चि० ३।२६७)

कालशाकम्

च०—'कालिया' इति ख्यातम् (सू० २७।९१)
—प्रसिद्धम् (व०)।
कालशाकमप्रसिद्धम् (कल०) (चि० १३।१८२)

काला

जे०—काकोली (चि० ३।२५८)
—सारिवा (चि० २५।११६)
—कालानुसारी, काली हिंस्रामन्ये (चि० २८।१६१)
च०—काकोली (चि० ३।२५८)
—कालानुसारिवा (व०) । सारिवा (कल०)
(चि० २८।१६१)
—मञ्जिष्ठा (चि० २५।११६) (कल०) (पा०)
—मञ्जिष्ठा (चि० २९।७२) (पा०)
ग०—नीलीति लोके (चि० ३।२५८)
—अगुरु (चि० २६।१५२) (पा०)
—कालानुसारिवा (चि० २८।१६१)
यो०—नीलिनी (चि० ३।२५८)

कालाख्यम्

च०—कालाख्यमिति कालशाकमेवोच्यते पुनः, अन्ये तु 'कालायं' इति पठन्ति (सू० २७।९२ (पा०)

कालानुसार्यम्

जे०—कालानुसार्यं तगरम् (चि० ३।२५८)
च०—कालानुसार्यं शीतलम् (व०) । कालानुसार्यं शीतला
(कल०) (चि० ३।२५८)
—कालानुसार्या शीतलम् (चि० ४।१०३)
ग०—कालानुसार्यं शैलजम् (चि० ३।२५८)
—कालानुसारी श्यामलता (चि० ४।१०३)
—अनन्तमूलम् (चि० २६।२४३)
यो०—कालानुसार्यं कृष्णचन्दनम् (चि० ३।२५८)
—कालानुसार्या पिण्डीतगरम् (चि० ४।१०३)

कालारसा

ग०—शिह्लकरसः (चि० २६।२६४) (पा०)

काले(ली)यकम्

च —कालेयकं कालियाकाष्ठम् (सू० ३।२६)
—कालेयं कालेयककाष्ठमिति ख्यातम् (चि० २१।७४)
ग०—कालीयं कालीयकाष्ठम् (चि० ३।२५८; २४।१५९)
—कालीयकाष्ठम् (चि० ६।३१)
—कालेयं कालीयकाष्ठम् (चि० २१।७४)
—कालीयककाष्ठम् (चि० २५।११६)
यो०—कालेयकं कृष्णकाष्ठं अगुरुभेदः (सू० ३।२६)
—पीतचन्दनम् (चि० ३।२५८; १६।५४)
—कालीयकाष्ठम् (चि० ४।७३; ६।३१)

काशः

ग०—कुशकाशौ स्पष्टौ (सू० ४।१७)
यो०—कुशकाशौ स्वनामख्यातौ (सू० ४।१७)

काश्मरी-काश्मर्यम्

च०—काश्मर्यं इति गम्भारीभवे (चि० १०।२९)
—काश्मर्यं गम्भारीफलम् (चि० १६।५६)
—काश्मर्याणामिति गम्भारीफलानाम् (चि० २९।१०५)
ग०—काश्मर्यं गम्भारीफलम् (सू० ४।२४; चि० ३।२०६,
२५८; ११।४४; १२।३२ इत्यादि)
—गम्भारी (चि० ११।६२; १०।२९)
—काश्मर्यं गम्भारीफलम् (चि० १७।२०२; १५।१५१ (पा०)
—काश्मर्यं गम्भारीपक्वफलम् (चि० १६।५६)
—काश्मर्यस्य गम्भारीफलस्य (चि० २९।९७)
यो०—सर्वतोभद्रा (सू० ४।२४)
—गम्भारी (सू० २०।१३५)
—काश्मर्यं गम्भारीफलम् (चि० ३।२०६, २५८; ११।४४;
१५।१५१ (पा०); १६।५६; १८।८३ इत्यादि)
—गाम्भारी (चि० ४।३९; १०।२९; १२।३९, ६७)
—काश्मर्याणि गाम्भारीफलानि (चि० १८।३९)

किंशुकः

च०—पलाशः (चि० ११।३।६३)

---

१. इस स्थल पर विमान ८।१३९ के सन्दर्भ को अंकित कर पाठान्तर में कालकूतक उद्धृत कर उसकी व्याख्या की गई है।

ग०—पलाशः (चि० १३।१५, ३१; २६।२५८)
यो०—पलाशः (चि० १३।१५, ३३)

किणिही

च०—कटभी (सू० ४।१५)
—अपामार्गः (सू० २५।४९)
ग०—कटभी (सू० ४।१५)
—किणिहिः स्वनामख्यातो वृक्षविशेषः सारवान् न त्वपामार्गः साराभावात् (सू० २५।४९)
—अपामार्गः (वि० ७।२१)
—खरमञ्जरी (सि० ४।१४ (पा०)
यो०—कटभी (सू० ४।१५)
—अपामार्गः (सू० २५।४९; वि० ७।२१)

किरातः-किराततिक्तः

ग०—किराताना तिक्तस्य किराततिक्तस्य (चि० ८।१०८)
यो०—स्वनामख्यातः (सू० ४।१८)
—भूनिम्बः (सू० ४।२९; चि० ३।११८; ४।३८, ४०, ७४; ६।१४१ इत्यादि)
—किरातानां-तिक्तस्य-किराततिक्तस्य (चि० ८।१०८)

किलिमः

च०—देवदारु (वि० ८।१४२; शा० ८।३४)
ग०—द्रुकिलिमो देवदारुः (वि० ८।१४२ (पा०); क० ७।१५ (पा०)
—देवदारु (शा० ८।३४, ४१)
यो०—द्रुकिलिमः देवदारुः (वि० ८।१४२ (पा०)
—देवदारु (शा० ८।३४, ४१)

कुचन्दनम्

ग०—बकम इति लोके (चि० ४।१०३)
यो०—पत्रांगं बकम इति ख्यातः चन्दनभेदः (चि० ४।१०३)

कुचेला

च०—कुचेला[१] अकर्णविद्धिकाभेदः (सू० २७।९५)
यो०—अकर्णविद्धिकाभेदः (सू० २७।९५)

कुञ्चिका

च०—स्थूलजीरकम् (सू० २७।३०७)
ग०—स्वल्पकृष्णजीरकम् (सू० २७।३०७)
—उत्कुञ्चिका स्थूलकृष्णजीरकम् (चि० १४।७२ (पा०)
—औकुञ्चिका कृष्णजीरकः (चि० १५।१०८ (पा०)

१. 'कठिञरं' इति पा० ।

यो०—स्थूलजीरकं ईषत्कृष्णम् (सू० २७।३०७)
—उत्कुञ्चिका कृष्णजीरकः (चि० १४।७२ (पा०)
—कृष्णजीरकश्च (चि० १५।१०८)

कुटजः

च०—कुटजफलवल्कशब्देन इन्द्रयवाः कुटजत्वक् चोच्यते (चि० १४।१९७)
—कौटजं कुटजफलम् (चि० १६।८७)
ग०—स्वनामप्रसिद्धः (वि० ८।१३५)
—कुटजात् फलमिन्द्रयवः (चि० ७।२४; १९।१०८)
—कौटजैरिन्द्रयवैः (चि० १६।१२३)
यो०—वत्सकः (सू० २।७)
—कुटजफल इन्द्रयवः (सू० १।८३; चि० ८।१०८, १०९; १४।१९७, १६।१२३; १९।७९, १०८)
—कुटजफलं कुटजफलबीजं इन्द्रयवः (चि० ७।४३, १०२, १५।१०६)
—कौटजं कुटजफलम् (चि० १६।८७)

कुटन्नटम्

जे०—गन्धतगरम् (चि० २४।१५९)
च०—कैवर्तमुस्तकम् (चि० १५।१२५)
—कैवर्तमुस्तकम्, अन्ये तगरमाहुः (सि० १०।३३)
ग०—कैवर्त्तमुस्तकम् (चि० १८।७३; २४।१५९)
—श्योनाकः (सि० १०।२३)
यो०—भद्रमुस्तम् (चि० १५।१२५)
—कैवर्त्तमुस्तकं च (चि० १८।७३)

कुठेरकः

च०—सुमुखादयः फणिज्झकान्ताः पर्णासभेदाः (नि० २।४)
—सुमुखादयः पर्णासभेदाः (वि० ८।१५१; चि० ३।२६७)
—पर्णासः (चि० २७।५४)
ग०—पर्णासभेदः कृष्णतुलसीति ख्यातः (सू० २।४)
—पर्णासभेदः (सू० २७।१०१)
—श्वेतपर्णासः (चि० ३।२६७)
यो०—सुरसाकुठेरकफणिज्झकाः पर्णासभेदाः (सू० २।४)
—पर्णासभेदः (सू० २७।१०१)
—सुरसकुठेरककालमालकपर्णासफणिज्झकाः तुलसीभेदाः (चि० ३।२६७)

कुतुम्बकः

च०—द्रोणपुष्पिका (सू० २७।९८)
ग०—द्रोणपुष्पी (सू० २७।९८)
यो०—द्रोणपुष्पिका (सू० २७।९८)

कुन्दुरुकः

च०—स्वनामख्यातः (ब०) । शितिमारकः कुन्दकुसुम-ख्यातः (कल०) (चि० २६।६४)

कुमारजीवः

च०—जीवशाकम् (सू० २७।१००)
ग०—जीवशाकम् (सू० २७।१००)
यो०—जीवशाकः (सू० २७।१००)

कुमुदम्

च०—पद्मभेदाश्चावारः (सू० ४।३४)
ग०—श्वेतपुष्पनाली (नील ?) पुष्पम् (सू० २५।४९)
—श्वेतजलजपुष्पमात्रम् (चि० ३।२५८)
यो०—कह्लारम् (सू० ४।३४)
—श्वेतम् (सू० २५।४९)
—कैरवम् (चि० ३।२५८)

कुम्भी(म्भिका)

च०—'कुम्भीक' इति ख्याता, किंवा हठः (वि० ८।१४४)
ग०—कट्फलः (वि० ८।१४४)
यो०—कट्फलः (वि० ८।१४४)

कुरण्टकः

च०—अम्लानकः (ब०) । म्लानकः (कल०) चि० २१।८९)
ग०—नीलझिण्टी (चि० २१।८९)

कुरुविन्दः

च०—वरकोद्दालकादयः षष्टिकविशेषाः; केचित् कुधान्यानि वरकादीनि वदन्ति (सू० २७।१४)
ग०—कृष्णगौरः·······कुरुविल्वाश्चेत्येतेष ष्टिकाः षष्टिकनामषष्टिकस्याल्पान्तरा गुणैरल्पभेदाः (सू० २७।१४ (पा०)
यो०—वरकादयः षष्टिकभेदाः, कुधान्यविशेषाः इति केचित् (सू० २७।१४)

कुलकः

जे०—कारवेल्लकः (चि० २३।२२५)
च०—कारवेल्लकः, केचित्तु कुलकं पटोलभेदमाहुः (सू० २७।९७)
—कारवेल्लकम् (चि० ३।१८९; २७।३७)
—कारवेल्लकम् ; अन्ये पटोलभेदमाहुः (चि० २३।२२५)
—निम्बकोलपत्राणीत्यत्र निम्ब एव मृदुर्निम्बकोलक उच्यते, किंवा कुलकेति पाठः, कुलकः पटोलः (चि० २५।८४)
ग०—पटोलफलम् (सू० २७।९७)
—पटोलस्य (चि० १७।९७)
—कुलकादिभिरन्यैस्तिक्तैः पटोलपत्रादिभिस्तिक्तैः (चि० २७।२७)
—पटोलपत्रम् (चि० ३०।१८९)
यो०—काकतिन्दुकः, पटोलभेदः इत्यन्ये (सू० २७।९७)
—कारवेल्लकम् (चि० ३।१८९)
—पटोलस्य (चि० १७।९७)

कुलत्थः

च०—कुलत्थश्च-शुक्लकृष्णचित्रलोहितभेदेन चतुर्विधो भवति, तथा ग्राम्यवन्यभेदेन च द्विविधोऽपि; अत एव तन्त्रान्तरे "वन्यः कुलत्थस्तद्वच्च विशेषान्नेत्ररोगनुत्" इत्युक्तम् (सू० २७।२६)

कुलिङ्गः(ङ्गा)

च०—कुलिङ्गः उच्चटाभेदः (सू० ४।१९)
—कुलिङ्गापाठपक्षे उच्चटा (वि० ८।१३९)
यो०—कुलिङ्गा तद्(उच्चटा)भेदः, कुलीरशृङ्गी वा (सू० ४।१९)

कुलिङ्गाक्षी

च०—पेटिका (वि० ८।१३९)
ग०—पेटिका (वि० ८।१३९)
यो०—पेटिका (वि० ८।१३९)

कुलीरशृङ्गी

ग०—कर्कटशृङ्गी (सू० ४।३०)
यो०—कर्कटशृङ्गी (सू० ४।३०)

कुवलम्

च०—(कुवलबदरकर्कन्धिवति) बदरीत्रयम् (सू० ४।२४)
—स्थूलबदरी (सू० २५।४९)
ग०—वृहद् बदरम् (सू० ४।१०, २४; वि० ८।१३६)
—वृहत् फलबदरी (सू० २५।४९)
यो०—कोलं मध्यबदरम् (सू० ४।१०)
—कोलं मध्यप्रमाण बदरम् (सू० ४।२४)
—कुवलं वृहद्बदरम् (सू० २५।४९)
—कुवलबदरे कर्कन्धूद्वयम (नि० २।४)
—कुवलबदरकर्कन्धुः बदरभेदाः (वि० ८।१३६)
—कुवलबदरे कोलद्वयम् (वि० ८।१४०)

कुशः

ग०—कुशकाशौ स्पष्टौ (सू० ४।१७)
यो०—कुशकाशौ स्वनामख्यातौ (सू० ४।१७)

कुक्कुण्डः

च०—पललादिच्छत्रिका (शा० ६।११)
ग०—पलालच्छत्रिका (शा० ६।११)

कुष्ठम्

ग०—स्वनामख्यातं न तु पुष्करमूलम् (सू० २५।४०)
—कुष्ठं पुनर्व्याधिनाम कुष्ठमेव (चि० १३।१२७)

कुष्ठघ्नः

च०—खदिरः (चि० २३।५४)
ग०—ऐडगजा (चि० २३।५४)

कुसुम्भः

ग०—प्रसिद्धः (सू० २७।१०१)
यो०—प्रसिद्धः (सू० २७।१०१)

कुस्तुम्बुरु

ग०—स्वनामख्यातस्तदभावे धनीयकम् (वि० ८।१३५)
यो०—स्वनामख्यातम् (वि० ८।१३५)
—आर्द्रधन्याकः (वि० ८।१४२)
—आर्द्रधन्यकानि (चि० ७।१२२)
—आर्द्रधन्याकानि (चि० १४।१०७)

कुटरणा

ग०—त्रिभण्ड्यादिभिः पर्यायवाचकः शब्दस्त्रिवृदुच्यते (क० ७।४)

कूणकम् (पा०)

ग०—पटोलम् (वि० ८।१४३)
यो०—पटोलभेदः (वि० ८।१४३)

कूष्माण्डम्

च०—सर्पच्छत्रकम् (सू० २७।१०२)
ग०—प्रसिद्धम् (सू० २७।१०२)

कृतमालः

च०—सुवर्णहलिः (सू० ४।१४)
—व्यवहारार्थं पर्यायानाह–आरग्वध इत्यादि (क० ८।३)
ग०—शोनालुरिति ख्यातः (सू० ४।१४)
—शोनालुः (वि० ८।१४३)
—शम्पाकफलमज्जा (चि० ७।४६)
—शम्पाकः (चि० ७।८०)
—नाटाकरञ्जः (चि० ७।१५३)
—आरग्वध इत्यादयः पर्यायाः (क० ८।३)
यो०—चतुरङ्गुलः (सू० ४।१४)
—शोणालुः (वि० ८।१४३)
—शम्पाकफलमज्जा (चि० ७।४६)
—सम्पाकः (चि० ७।८०)
—लाटाकरञ्जः इति वंगेषु (चि० ७।१५३)

कृतवेधनम्

च०—ज्योत्स्निका (सू० १।८१)
—घोषकभेदः 'ज्योत्स्निका' इति ख्यातः (क० ३।१७)
ग०—ज्योत्स्निका लतापुटकीति लोके (सू० १।८१; २।७)
—लतापुटकीतिख्यातम् (सू० ४। (४)
—ज्योत्स्निका श्वेतघोषकस्तेषां फलानि (वि० ८।१३५)
—ज्योत्स्निका (शा० ८।४१)
यो०—घोषा कोशातकी (सू० १।८१)
—कृतवेधनधामार्गवौ कोशातकीद्वयम् (सू० २।७)

कृमिघ्नः

ग०—विडङ्गः (चि० ७।१२६; २६।१३)
यो०—विडङ्गम् (सू० २३।१८; चि० ७।१२६)

कृमिहरः

यो०—क्रिमिघ्नः विडङ्गः (चि० ७।१५३)

कृष्णगन्धा

जे०—शमी, शोभाञ्जनकमन्ये (चि० २८।१३०)
च०—कार्ष्णगन्धिकैरिति शोभाञ्जनकृतैः (चि० १४।४२)
—शोभाञ्जनः (चि० २८।१३०)
ग०—शोभाञ्जनः (सू० १।११६; ३।४; २५।४९; ३६।८४; चि० २८।१३०)
—शिग्रुः (चि० ८।१२९)
—कार्ष्णगन्धिकैः शोभाञ्जनमूलत्वक् (चि० १४।४२)
यो०—शोभाञ्जनः (सू० १।११६; २५।४९; चि० ८।७९)
—शोभाञ्जनकः (सू० ३।४)
—शिग्रुः (चि० ८।१२९)
—कार्ष्णगन्धिकैः शोभाञ्जनत्वक् (चि० १४।४२)

कृष्णचित्रकः

च०—कृष्णपिण्डितचित्रकाविति कृष्णमदनकृष्णचित्रकौ (चि० २३।२७२)
ग०—कृष्णौ पिण्डीतचित्रकौ–कृष्णः पिण्डीतो मदनफलं कृष्णश्च चित्रकः (चि० १६।२७२)

कृष्णपिण्डीतः

च०—कृष्णपिण्डितचित्रकाविति कृष्णमदनकृष्णचित्रकौ (चि० २६।२७२)

ग०—कृष्णौ पिण्डीतचित्रकौ-कृष्णः पिण्डीतो मदनफलम् (चि० २६।२७२)

कृष्णशणः

ग०—कृष्णपुष्पशणः (चि० २६।२६९)

कृष्णसैरेयकः

च०—कृष्णसरीयकः कृष्णझिण्टी (चि० २६।२६८)

ग०—कृष्णसैरीयकः नीलझिण्टीमूलम् (चि० २६।२६८)

कृष्णा

च०—पिप्पली (चि० १२।४१)

ग०—पिप्पली (चि० १२।४१, ७०)

यो०—पिप्पली (चि० ४।७८; १२।४१, ७०; १६।११२; १७।१४०)

केलूटम्

च०—केलुटे हारीतवचनं-"केलुटं स्वादु विटपं तत्कन्दः स्वादुशीतलः" इति (सू० २७।११४)

ग०—केलूटं स्वादुविटपं तत्कन्दः स्वादुशीतल इति हारीतवचनम् (सू० २७।११४)

यो०—उदुम्बरभेदः (सू० २७।११४)

केबुकः

ग०—केउ इति लोके (सू० ४।१५)

—केउफलम् (सू० २७।९६)

—केंउ इति लोके (वि० ८।१४३)

यो०—केम्बुकः पूगः (सू० ४।१५)

—स्वनाम्ना प्रसिद्धम् (सू० २३।२०)

—केम्बूकं केउ इति ख्यातम् (सू० २७।९६)

—पत्तूरः (वि० ८।१४३)

—केबुः केबुकः (चि० १४।१० (पा०)

केशरम्

च०—नागकेशरम् (सू० ५।२०)

ग०—नागकेशरम् (सू० ५।२०; चि० ४।७६ (पा०), ९४; ६।३१; ७।१३०)

—केशराणां नागकेशरपुष्पाणाम् (चि० २।२।३१)

—नागपुष्पस्य केशरम् (चि० ६।४२)

—पद्मकेशरं नागकेशरं वा (चि० १४।२१०)

यो०—नागकेशरम् (सू० ५।२०; चि० १।१।६९; २।१।३१; ४।७६ (पा०); ५।१५७ इत्यादि)

केशी

च०—भूतकेशी (चि० ९।४५)

ग०—केशिनी शङ्खपुष्पीति लोके (चि० ९।४५)

—केशिनी खङ्गिनीपुष्पम् (चि० १०।३४)

—केशिनी (चि० १०।३९)

यो०—गन्धमांसी (चि० ९।४५)

—जटामांसी (चि० १०।३९)

कैटर्यम्

च०—कैटर्यं कट्फलम् (सू० ४।९)

—कैटर्यः पर्वतनिम्बः (सू० ४।४८)

—कैटर्यः पर्वतो निम्बः (चि० १०।२७; २६।५५)

ग०—कैटर्यं कट्फलम् (सू० ४।९, ४८; वि० ७।१७; चि० १०।२७, ३७)

—कैवर्त्तमुस्तकस्य (चि० २६।५५)

यो०—कैटर्यं कट्फलम् (सू० ४।९; वि० ७।१७; चि० १०।२७, ३७)

—कैटर्यः गिरिनिम्बः (सू० ४।४८)

कोठफलम्

ग०—कोठोडुम्बरफलम् (सि० ११।१२)

कोद्रवः

यो०—कोरदूषः (सू० २१।२५)

कोरदूषः

जे०—कोद्रवः (चि० ४।३६)

च०—कोरदूषादयः कुधान्यविशेषाः, कोरदूषः कोद्रवः (सू० २७।१६)

—कोद्रवः (चि० ४।३६)

ग०—कङ्गु...सर्वे तृणसम्भवाः (सू० २७।१६)

—कोद्रवः (चि० ४।३६)

यो०—कोद्रवः......कोरदूषश्यामाकादयः तृणधान्यविशेषाः (सू० २७।१६)

—कोद्रवः (नि० २।४; चि० ४।३६)

कोलम्

च०—बदरी (शा० ८।३२)

—कोलमध्यं बदरमज्जा (चि० २३।९५)

—कर्कन्धूकोलबदरशब्देन त्रिप्रकारबदरग्रहणम् (क० ११।७)

ग०—कोलं शुष्कबृहद्बदरफलम् (चि० ३।१८७)
—शुष्कबदरम् (चि० ५।७२, ७७; १३।८४; १४।४६)
—कोलं शुष्कबदरफलम् (शा० ८।३२; चि० ११।३४)
—कोलं बृहत् बदरम् (चि० २।४।११; १३।१२५)
—सास्थिकोलं सबीजबदरफलम् (मि० २६।५५ (पा०)
यो०—बदरम् (सू० २।१२; २७।२७९; चि० ५।७२, ७७, ८८; ९।५३ इत्यादि)
—कोलं बदरफलम् (सू० ३।१८)
—बदरी (शा० ८।३२)
—कोलवत् बृहद्बदरवत् (चि० २।४।११)
—बृहद्बदरीफलम् (चि० ३।१८७)
—शुष्कबदरम् (चि० ११।३४; १४।४६)
—कोलककर्कन्धू बृहदल्पबदरभेदौ (चि० १३।१२५)

कोलवल्ली

ग०—गजपिप्पली (चि० ३।२१०)
यो०—गजपिप्पली (चि० ३।२१०)

कोविदारः

च०—स्वनामप्रसिद्धः (सू० ४।२३)
—स्वनामख्यातः, स शरदि पुष्पति (क० १।१४)
ग०—रक्तकाञ्चनः (सू० ४।२३; चि० ४।७०; १४।२०३)
—काञ्चनः (सू० २७।१००; चि० ४।३९)
—श्वेतकाञ्चनः (वि० ८।१३५)
—काञ्चनपुष्पम् (चि० ३।२५८)
—[1]रक्तकाञ्चनालः (क० २।८-११)
यो०—रक्तकाञ्चनः (सू० ४।२३; चि० ४।३९; ७०)
—काञ्चनारः (सू० २७।१००)
—श्वेतकाञ्चनः (वि० ८।१३५)
—काञ्चनवृक्षः (चि० ३।२५८)

कोशाम्रः

च०—स्वनामख्यातः (चि० ३०।८२)
ग०—कोषाम्रं बालाम्रम् (सू० २६।८४)
—उड़िआम्रः (वि० ८।१४०)
—कोषाम्रः ओडिआम्रः इति लोके (चि० ३०।८२)
—कोषाम्रः ओडिआम्रः (क० १।१७ (पा०)
यो०—कोषाम्रं क्षुद्राम्रम् (सू० २६।८४; वि० ८।१४०)

कौन्ती

च०—रेणुका (चि० २३।५५)

१. कल्पस्थान १।१४ के मूल को इस स्थल पर उद्धृत कर उसी की व्याख्या है ।

यो०—रेणुका (चि० ९।३५ (पा०); १२।६५)

कौरवम्

च०—कार्पासम् (सू० १४।४९)

क्रमुकम्

जे०—पूगफलम् (चि० ४।७४)
च०—गुवाकम् (सू० २५।४९)
—पट्टिकालोध्रम् (चि० ४।७४)
—पट्टिकालोध्रं पूगं वा (चि० ६।४१; १४।१५९)
—ह्रस्वपूगफलम् (ब०) । पूगफलम् (कल०) (चि० ७।८१)
—पूगफलम् (सि० ७।३७)
ग०—गुवाकवृक्षः (सू० २५।४९)
—गुवाकम् (चि० ४।७४; ६।४१; ७।८१; १५।१६५; सि० ७।३७)
यो०—गुवाकः (सू० २५।४९; चि० ४।७४; १५।१६५)
—गुवाकं पट्टिकालोध्रं वा (चि० ४।४१)
—पूगफलम् (चि० ७।८१)
—पट्टिकालोध्रम् (चि० १६।१०८)

क्रिमिमारः (पा०)

ग०—विडङ्गम् (चि० २६।५५)

क्रौञ्चादनम्

जे०—क्रौञ्चुलिका (चि० ३।२५८)
च०—घिञ्चुलिका (सू० २७।११६)
—घेञ्चुलिकेति ख्यातः (चि० १४।९)
ग०—घेञ्चुलिका (सू० २७।११६)
—घेञ्चुलुकः (चि० ३।२५८; १४।९)
यो०—चिञ्चोटकं रक्तकसेरुकं वा (सू० २७।११६)
—घेञ्चुलुकः (चि० ३।२५८)
—घेञ्चुलिका (चि० १४।९)

क्रीतकम्

च०—यष्टीमधु (सू० १।८१; वि० ८।१३६)
ग०—यष्टीमधु (सू० १।८१; वि० ८।१३६)
यो०—यष्टीमधु (सू० १।८१; वि० ८।१३६)

क्षवकः (क्षुः)

जे०—राजक्षवकः (चि० ३।२६७)
च०—छिक्काकारकः (सू० ४।२७)
—सुमुखादयः फणिज्झकान्ताः पर्णासभेदाः (नि० २।४)
—सुमुखादयः पर्णासभेदाः (वि० ८।१५१; चि० ३।२६७)

—क्षवथुः[1] छिक्काकारकः (चि० २६।१८४)
ग०—छिकाकारः हाचियेति लोके (सू० ४।२७)
—राजक्षवकः (वि० ८।१४२)
—हाँचियामूलम् (चि० ३।२६७)
—हाँचीया नाम (चि० ७।११३)
—हाँचिका (चि० २६।१८४)
यो०—छिक्काकारकः, हँचेता इति लोके (सू० ४।२७)
—छिक्काकारः (नि० २।४)
—हँचेता इति ख्यातः; राजिका वा (चि० ३।२६७)
—स्वनामख्यातः (चि० ७।११३)

क्षीरकाकोली

यो०—पयस्विनीसंज्ञा (सू० ४।१)
—काकोलीक्षीरकाकोली काकोलीद्वयम् (सू० ४।२१)

क्षीरपुष्पी

ग०—स्वनामख्याता (चि० ११४।६)
यो०—स्वनामप्रसिद्धा (चि० १।४।६)

क्षीरवल्ली

च०—क्षीरलता (वि० ८।१३९)
ग०—क्षीरलता (वि० ८।१३९)
यो०—क्षीरलता (वि० ८।१३९)

क्षीरिद्रुमाः (वृक्षाः)

च०—क्षीरिवृक्षा वटोदुम्बराश्वत्थप्लक्षकपीतनाः।
(चि० ११।५६)
—क्षीरिद्रुमा अश्वत्थादयः (चि० १२।६८)
ग०—क्षीरिणः प्रसिद्धाः वटोदुम्बराश्वत्थप्लक्षकपीतनाः
पञ्चः (शा० ८।२४)
—क्षीरिणो वृक्षाः पञ्च वटोदुम्बराश्वत्थप्लक्षकपीतनाः
(चि० ११।५६)
—क्षीरवतां वटोदुम्बराश्वत्थप्लक्षकपीतनानां द्रुमाणाम्
(चि० १२।६८)
—क्षीरवतां वटादीनाम् (चि० २२।४६)
—क्षीरिवृक्षाणां वटोदुम्बरादीनाम् (चि० २३।१९९)
यो०—क्षीरिणः क्षीरप्रधाना वृक्षाः, तेषां क्षीरिवृक्षाणां अश्वत्थोदुम्बरप्लक्षवटपिप्पलानाम् (चि० ११।५६)
—क्षीरवतां क्षीरिणां द्रुमाणां वृक्षाणां वटोदुम्बराश्वत्थादीनाम् (चि० १२।६८)

—क्षीरवतां क्षीरिवृक्षाणां उदुम्बराश्वत्थादीनाम्
(चि० १२।६९)

क्षीरविदारी

ग०—बहुक्षीरभूमिकुष्माण्डः (वि० ८।१३९)

क्षीरशुक्ला

जे०—क्षीरविदारी, क्षीरकाकोलीत्यपरे। (चि० २३।२०१)
च०—बृहच्छृङ्गाटिका[1] (वि० ८।१३९)
—क्षीरविदारिका (चि० ११।७६)
—विदारी (चि० २३।२०१)
—क्षीरविदारी (क० ७।१९)
ग०—स्वल्पक्षीरी विदारी (वि० ८।१३९)
—क्षीरविदारी (चि० ११।७६)
—क्षीरविदारी शुक्लनिर्यासभूमिकुष्माण्डः
(चि० २३।२०१)
—क्षीरशुक्ला क्षीरविदारी, पयस्या तदितरविदारी, भूमिकुष्माण्डद्वयमिति यावत् (क० ७।१९)
यो०—त्रिवृत् (वि० ८।१३९)
—क्षीरविदारी (चि० ११।७६)

क्षीरिका

ग०—राजादनम् (चि० २।३।८)
यो०—राजादनम् (चि० २।३।८)

क्षीरिणी

च०—दुग्धिका (सू० १।७८; २।९; वि० ८।१३६;
चि० १९।३१ (ब०); क० ११।१४)
—स्वर्णिका (कल०) (चि० १९।३१)
—क्षीरलता (सू० ४।२)
—क्षीरिण्यश्च दुग्धिकाकलम्बिकादयो दृश्यमानक्षीराः
(शा० ८।५७)
ग०—स्वनामख्याता स्वर्णक्षीरी (सू० १।७८)
—स्वनामख्याता (सू० २।९; ४।२)
—स्वनामख्यातवृक्षः (वि० ८।१३६; चि० १९।३१)
—क्षीरिण्यश्च वटोदुम्बरादयः (शा० ८।५७)
यो०—दुग्धिका (सू० १।७८; २।९; वि० ८।१३६)
—क्षीरलता (सू० ४।२)

क्षुद्रसहा

जे०—क्षुद्रसहा-महासहे तु मुद्गमाषपर्ण्यौ
(चि० ३।२५८)

१. चक्रसम्मत पाठ।

१. 'त्रिवृत' इति पा०

च०—कुमारी (वि० ८।१३९)
—महासहा क्षुद्रसहा मुद्गमाषपर्ण्यौ (क० ४।१६)
ग०—मुद्गपर्णी (वि० ८।१३५; चि० ३।२५८)
—रक्तकुरुवकः (वि० ८।१३९)
यो०—मुद्गपर्णी (वि० ८।१३५; चि० ३।२५८)
—रक्तकुरवकः (वि० ८।१३९)

क्षुद्रा

ग०—कण्टकारी (सि० ८।७) (पा०)

क्षुमा

ग०—क्षौमं अतसी बीजम् (चि० १८।७३)
—क्षुमा मसिना, तस्या वल्कलकृतं वस्त्रं क्षौमम् (चि० ३०।१०३)

क्षेमकः

जे०—चोरकः (चि० ३।२६७)
च०—चोरकः (चि० ३।२६७)
ग०—हरिद्रा, चोरकाष्ठ इत्यन्ये (चि० ३।२६७)
यो०—क्षेमिका हरिद्रा (चि० ३।२६७ (पा०)

क्षौद्रवल्ली

च०—क्षौद्रवल्ली[1] गुडूची (चि० ७।१२३)

क्ष्वेडः-क्ष्वेडः

च०—कृतवेधनः (सि० १०।२५ (पा०)
ग०—लतापुटकीति लोके (क० ६।३)
—कोषातकी (क० ६।९)
—कृतवेधनफलम् (क० ६।१२)

खण्डिका

च०—त्रिपुटकलायः (सू० २७।२८)
ग०—वर्त्तुलकलायाः (सु० २७।२८)
यो०—त्रिपुटकलायः खेशारि इति ख्यातः (सू० २७।२८)

खदिरः

च०—खदिरस्य सारम् (चि० ७।१३५)
—खदिरसारमिति खदिरकाष्ठसारम् (चि० १८।६४)
ग०—बब्बोलः (सू० २५।४९)
—श्वेतखदिरः (१।२।१२; २६।२०६)
—सोमवल्कस्य (चि० १।४।१३)

१. मूल में 'क्षौद्रमुद्गपर्ण्यौ' पाठ है। व्याख्या में क्षौद्रवल्ली है। अतः चक्रसम्मत पाठ यही है।

—बाबरीति प्रसिद्धः (चि० ३।२५८)
यो०—खदिरदार्व्योः सारः (चि० ७।१३५)

खरपुष्पः-खरपुष्पा

ग०—खरपुष्पा यमानी (वि० ७।१७)
—खरपुष्पा खरमञ्जरी अपामार्ग इति ख्यातः (वि० ८।१४४)
यो०—खरपुष्पा यमानी (वि० ७।१७)
—खरपुष्प खराशानी, अपामार्गो वा खरपुष्पा इति पाठे वनतुलसी (वि० ८।१४२)
—बर्बरी (वि० ८।१४४)

खराश्वा-खराह्वा

च०—खराश्वा अजमोदा (चि० २६।६०; सि० ९।८)
—खराह्वा अजमोदा (सू० २३।१५; चि० १४।४३)
—खराह्वा अजमोदा (चि० २६।६०) (पा०)
—खराह्वा कृष्णजीरकम् (सू० २७।१७२)
ग०—खराह्वा खुरासिनी अजमोदा (सू० २३।१५)
—खराश्वा पारसीययमानी खराशिनीति लोके (सू० २७।१७२ (पा०)
—खराह्वा पारसीययमान्याः (चि० १४।४३)
—खराह्वा यमानी पारशीयदेशजा (चि० २६।६० (पा०)
—खराह्वा पाराशीययमानीविशेषः (सि० ९।८ (पा०)
यो०—खराह्वा अजमोदा (सू० २३।१५)
—खराह्वा अजमोदा कृष्णजीरकः (सू० २७।१७२)
—खराह्वायाः यमान्याः (चि० १४।४३)

खर्जूरम्

च०—खर्जूरं खर्जूरफलम् (चि० २६।९३)
—द्वितीय खर्जूरशब्देन खर्जूरफलं गृह्यते (चि० २७।१७१)
—भव्यादयः औत्तरापथिकाः (चि० २९।६५-६६)
ग०—खर्जूरं खर्जूरस्य पक्वं फलं स्वल्पशस्यं बहुशस्यञ्च द्विविधम् (सू० २७।१२७)
—खर्जूराणां पिण्डखर्जूरफलानाम् (चि० १।४।१४)
—खर्जूरीमस्तकं खर्जूरवृक्षस्य मस्तकम् (चि० २।२।१८)
यो०—खर्जूरं फलं, खर्जूरं द्विविधं वृक्षविटपभेदेन, त्रिविधमित्यन्ये, त्रैविध्यं च वृक्षखर्जूरं खर्जूरं पिण्डखर्जूरमिति'''इति कृत्वा, पिण्डखर्जूरं महाप्रमाणं स्वादु तच्च पारस्येषु भवति (सू० २७।१२७)
—प्रसिद्धम (चि० ११।३७)
—खर्जूरी—खर्जूर्याः क्षुद्रस्य खर्जूरवृक्षस्य असंजात फलस्य इत्यर्थः। अल्पविवक्षायां ङीप् (चि० २।२।१८)

गजपिप्पली

यो०—इह चव्यफला वक्ष्यमाणवृद्धवाग्भटवचने पञ्चकोल-श्रुतेः (चि० १२।४१)

गण्डीर(क):

च०—शमठशाकम् (सू० ४।१५)

—शमठः (सू० २७।१०६; चि० १८।१८२)

—द्विविधो रक्तः शुक्लश्च, तत्र यो रक्तः स हि कटुत्वेन हरितवर्गे पठ्यते, यस्तु शुक्लो जलजः स शाकवर्गे पठित इति नैकस्य वर्गद्वये पाठः (सू० २७।१७१)

—सुमुखादयः फणिज्झकान्ताः पर्णासभेदाः (नि० २।४)

—सुमुखादयः पर्णासभेदाः (वि० ८।१५१)

—शमठभेदः, स हि जलस्थलजभेदाद्द्विविधः (चि० ३।२६७)

—गण्डीरोऽपि[1] निदाने सुरासौवीरकादि[2] युक्त एव हेतुत्वेनोक्तः, स तु केवलो हित एव; किंवा स्थलज-जलजभेदेन[3] गण्डीरो द्विविधः, तत्र हरितवर्ग-[4] पठितो यः स निदानं भवति, इतरस्तु जलजः शाक-वर्गे पठितो यः स इह कफाधिके रक्तपित्ते ज्ञेयः (चि० ४।३८)

ग०—शमठशाकं शालञ्चीति लोके (सू० ४।१५, ४५)

—शमठस्तस्यपत्रम् (सू० २७।१०६)

—समष्ठीला, स च शुक्लोरक्तश्चेति द्विविधः, तत्र शुक्लो जलजः शाकवर्गे पठितोऽकटुत्वात्; कटुत्वात् तु रक्तोऽत्र हरितवर्गे पठित इति न द्विरुक्तः (सू० २७।१७१)

—दूर्वाभेदः (वि० ७।१७)

—समठः (वि० ८।१५१; चि० १२।२९; १८।१८२)

—दूर्वा (चि० ३।२६७; ४।३८)

यो०—समष्ठिला शमठशाकम् (सू० ४।१५; चि० ३।२६७)

—शमठशाकम् (सू० ४।४५; चि० ४।३८)

—शमठः (सू० २७।१०६; चि० १२।२९)

—द्विविधः स्थलजो जलजश्चेति, तत्र स्थलजः हरित-शाकं शाकवर्गे पठितः (सू० २७।१७१)

—शाकभेदः (नि० २।४)

—शाकविशेषः (चि० १८।१८२)

—गण्डीरकः नद्याम्लः शाकभेदः (वि० ८।१४२ (पा०)

गण्डीरपुष्पी

च०—शमठः (वि० ८।१५१)

१. एवं गण्डीरो (ब०)
२. स्वरसादि (कल०)
३. कल० में नहीं है
४. हरितादि (कल०)

ग०—बृहत् समठः (वि० ८।१५१)

यो०—शमठः (वि० ८।१५१)

गन्धनः[1]

च०—वरकोद्दालकादयः षष्टिकविशेषाः, केचित् कुधान्यानि वरकादीनि वदन्ति (सू० २७।१४)

ग०—वरक''गन्धलाः कुरुविल्वाश्चेत्येते षष्टिकाः षष्टिक-नामस्याल्पान्तरा गुणैरल्पभेदाः (सू० २७।१४ (पा०)

यो०—वरकादयः षष्टिकभेदाः; कुधान्यविशेषाः इति केचित् (सू० २७।१४ (पा०)

गन्धनाकुली

जे०—सुवहा, लोके गोधावती । (चि० ३।२६७)

च०—रास्नाभेदः (चि० ३।२६७)

ग०—सुगन्धीति ख्याता (चि० ३।२६७)

यो०—नाकुलीगन्धनाकुल्यौ रास्नाभेदौ (चि० ३।२६७)

गन्धप्रियङ्गुः

च०—प्रियङ्गुरेव (सू० २५।४०)

ग०—प्रियङ्गुरेव (सू० २५।४०; चि० २१।९०)

—गन्धद्रव्यविशेषः प्रियङ्गुर्नाम, न तु प्रियङ्गुधान्यम् (शा० ८।२४)

गन्धफला–गन्धफली

च०—गन्धफला प्रियङ्गुः (ब०) । गन्धफली प्रियङ्गुः (कल०) (चि० २३।५७)

ग०—गन्धफली प्रियङ्गुः (चि० २३।५७)

गन्धसारः

ग०—श्वेतचन्दनम् (वि० २५।१०८)

गन्धाः-गन्धौषधानि

च०—गन्धाः सुगन्धद्रव्याणि, तेषां विशेषणमगुरुपत्राद्याः, अगुरु च पत्राद्याश्च अगुरुपत्राद्याः, अगुरुपत्राद्याश्च ज्वरे वक्ष्यमाणः "अगुरुकुष्ठतगरपत्र" (चि० अ० ३) इत्यादिगणो मन्तव्यः । अगुर्वाद्या इति न कृतं कुष्ठ-तगरयोरतितीक्ष्णत्वेन मस्तुलुङ्गस्रावभयात्[2] परिहा-रार्थम् (सू० ५।२७)

—गन्धप्रधानान्यौषधानि गन्धौषधानि, तानि चागुर्वा-दीनि ज्वराध्याये प्रतिपाद्यानि; गन्धौषधैश्च सिद्धैरिति

१. गन्धलः (पा०)
२. 'मस्तुलुङ्गद्रावकयोः' इति पा० ।

योजनीयं; तेन दशमूलगन्धौषधाभ्यां स्नेहाः साधनीयाः (किंवा गन्धौषधैर्दशमूलसिद्धैः स्नेह-प्रक्षेरयं प्रदेहः[१]) (सू० ३।१९)

—गन्धैः सुगन्धद्रव्यैः (सू० १४।३६)

—गन्धैरिति अगुर्वाद्यैस्तगरवर्जितैः (चि० ९।७३)

—गन्धैरगुर्वादिभिः (चि० १२।६७; २८।११७)

—गन्धैरकुष्ठतगरैरिति अगुर्वादिगन्धैः, कुष्ठतगरवर्जनं चात्र मस्तुलुङ्गस्रावबर्जनार्थम् । उक्तं च शालाक्ये—"नतकुष्ठे स्रावयतो धूमवर्तिप्रयोजिते । मस्तुलुङ्गं प्रकर्षेण तस्मात्ते नैव योजयेत्" इति (चि० २६।१८२)

—गन्धा इति अगुर्वाद्युक्ता इह ग्राह्याः (चि० २७।५४)

—गन्धैर्हैमवतैः हैमवतैरिति हिमालयभूतैः अगरुकुष्ठ-चेमकादिभिः (चि० २८।१६५)

ग०—गन्धौषधमिश्रैरेलादिभिर्युक्तैः (सू० ३।१९)

—गन्धाश्चागुरुपत्राद्या ज्वरचिकित्सिते अगुर्वादितैल-द्रव्याणि अगुरुकुष्ठतगरपत्रेत्यादिनोक्तानि यानि तानि अगुरुसहितपत्रादीनि कुष्ठतगरवर्जितानि (सू० ५।२७)

—गन्धैरुशीरादिभिः (चि० १२।६७)

—गन्धैः सुगन्धितद्रव्यैश्चन्दनागुरुपत्रादिभिः (सू० १४।३६)

—गन्धा अश्वगन्धा (चि० २७।५४)

—गन्धैर्हैमवतैःअमृतातैलोक्तैरेलाद्यैर्हैमवतैश्च श्वेतवचागन्धैश्च (चि० २८।१६५)

यो०—गन्धौषधैः गन्धद्रव्यैरगुरुकुष्ठादिभिः ज्वरचिकित्सिते वक्ष्यमाणैः (सू० ३।१९)

—अगुरुपत्राद्याः गन्धाः ज्वरचिकित्सिते वक्ष्यमाणाः अगुरुकुष्ठतगरपत्रैत्यादिना । अगुर्वाद्या इत्यनुक्त्वा अगुरुपत्राद्या इति वचनं-नतकुष्ठे स्रावयतो धूमवर्त्ति-प्रयोजिते । मस्तुलुङ्गं विशेषेण तस्मात्ते नैव योज-येत् ॥ (शालाक्य) इति—कुष्ठतगरयोरतितीक्ष्ण-त्वेन मस्तुलुङ्गकस्रावभयात् तयोः परिहारार्थं । तेन अगुरुपत्राद्याः गन्धाः कुष्ठतगरवर्जानि गन्धद्रव्याणि इत्यर्थः (सू० ५।२७)

—गन्धैः अगुरुकुष्ठतगरादिभिः सर्वैः गन्धद्रव्यैः (सू० १४।३६)

—गन्धैश्चन्दनादिभिः (चि० ८।१८७ (पा०)

—गन्धैः अगुरुपत्राद्यैः दाहज्वरचिकित्सिते प्रपञ्चेनोक्तैः (चि० ९।७३)

—गन्धैरुशीरादिभिः (चि० १२।६७)

गरागरी–खरागरी

च०—गरागरी चेत्यादि पर्यायकथनम् (क० २।३)

ग०—जीमूतं खरागरी'''इति पर्यायैरुक्तम् (क० २।३ (पा०)

—खरागरी देवताडफलम् (सि० ११।१२ (पा०)

गर्मूटी

च०—कोरदूषादयः कुधान्यविशेषाः (सू० २७।१८)

यो०—मुकुन्दः'''गर्मूटी'''यवनालश्च; एते तृणधान्यविशेषाः (सू० २७।१८)

गवाक्षी

ग०—गोडुम्बा (सू० १।७७; २।९)

—गोरक्षकर्कटी (वि० ८।१३६; चि० ७।६२; १३।१२४)

यो०—श्वेतपुष्पा इन्द्रवारुणी (सू० १।७७)

—इन्द्रवारुणी (सू० २।९; वि० ८।१३६; १५१; चि० १८।११४)

—विशाला (चि० ७।६२)

गवेधुकः

च०—धुलुञ्चः (सू० २।२५)

—धुलुंचः, स ग्राम्यारण्यभेदेन द्विविधः (सू० २७।१७)

ग०—गवेधुकानां गवेडूनां बीजानीति 'देधान' इति ख्यातानामिति (सू० २।२५)

—गवेधुकान्नं जूर्णान्नम् (सू० २५।४०)

—तृणसम्भवा (सू० २७।१७)

—गवेधुकानां क्षुद्रगोधूमानाम् (चि० २०।३१)

यो०—'''एते तृणधान्यविशेषाः (सू० २७।१७)

गाङ्गेरुकी

च०—गाङ्गेरुकं नागबलाफलम् (सू० २७।१४२)

ग०—नागबला तस्या फलम् (सू० २७।१४२)

यो०—नागबला (सू० २७।१४२)

गिरिकर्णिका

च०—तेन'''अपराजिता गृह्यते । केचिद्गिरिकर्णिकां स्यन्दनामाहुः (चि० २३।१९५)

ग०—अपराजिता (चि० २३।१९५)

गुग्गुलुः

ग०—पुरः (सू० ५।२१)

---

१. 'अयं पाठः क्वचित्पुस्तके नोपलभ्यते' ।

—महिषाक्षगुग्गुलुः (शा० ८।६१)

गुडूची

ग०—छिन्नरुहा (वि० ८।१३५)
—पद्मगुडूची (चि० ३।२६७)
यो०—गुडूचीचित्रकौ प्रसिद्धौ (वि० ८।१३५)
—गुडूचिका गुडूची (चि० १२।२५)

गुन्द्रा

जे०—तृणविशेषः (चि० ३।२५८)
च०—गुलुच (सू० ४।१७)
ग०—गुडूची,…गुडूच्यास्तु नाडमेव सम्भवात् (सू० ४।१७)
—गुडूची (सू० ४।३५; वि० ८।१३९)
—गुडूची गुद्रारोचनी वा (चि० ३।२५८)
—गुन्द्रारोचनी, कम्पिल्लकमित्यर्थः (चि० ४।१०३)
यो०—एरका होगला इति ख्याताः (सू० ४।१७)
—एरका (सू० ४।३५)
—शरभेदः (वि० ८।१३९)
—पट्टरकः (चि० ३।२५८)
—एरका रोचनिका वा (चि० ४।१०३)

गुहा

जे०—पृश्निपर्णी (चि० २३।२१३)
च०—पृश्निपर्णी (चि० २३।२१३)
ग०—शालपर्णी (चि० २३।२१३)

गृञ्जः-गृञ्जन(क):

च०— गृञ्जनकः स्वल्पनालपत्रः पलाण्डुरेव (सू० २७।१७४)
— गृञ्जनकं रसोनकसदृशं; किंवा गृञ्जनकं शोभाञ्जनम् (ब०)।
गृञ्जनकं रसोनकः किंवा गृञ्जनकं शोभाञ्जनम् (कल०) (चि० १२।६३)
—गृञ्जनकः पलाण्डुभेदः (चि० १४।२०१)
—गृञ्जनकं लोहितपलाण्डुः (चि० १७।१३१)
ग०—गृञ्जनको गाँजोर इति लोके (सू० २७।१७४)
—गृञ्जनकस्य पलाण्डुविशेषस्य गाँजोर इति ख्यातस्य (चि० १९।३८)
यो०—गृञ्जनकः गाँजोर इति ख्यातः (सू० २७।१७४)
—गृञ्जः गृञ्जनं तन्नामख्यातः रक्तमूलकविशेषः (चि० २०।२८)

गोजिह्वा

च०—दार्विपत्रिका (सू० २७।९७)
ग०—दर्वीशाकम् (सू० २७।९७)
यो०—दार्वीपत्रिका (सू० २७।९७)

गोपवल्ली

च०—अनन्तमूलम् (वि० ८।१३९)
ग०—अनन्तमूलम् (वि० ८।१३९)
यो०—अनन्तमूलम् (वि० ८।१३९)

गोपी

च०—सारिवा (वि० ८।१३५)
ग०—श्यामालता (वि० ८।१३५)
यो०—सारिवा (वि० ८।१३५)

गोलोमी

च०—भूतकेशी (सू० ४।४८)
—श्वेतदूर्वा (शा० ८।६१)
ग०—भूतकेशी (सू० ४।४८)
—गोडुम्बा (शा० ८।६१)
यो०—भूतकेशी (सू० ४।४८)
—श्वेतदूर्वा (शा० ८।६१)

गोस्तनम्

यो०—द्राक्षा (चि० १४।१०)

गौरसर्षपः

च०—श्वेतसर्षपः (शा० ८।१९)
ग०—श्वेतसर्षपः (शा० ८।१९)
यो०—श्वेतसर्षपः, सिद्धार्थः (चि० १८।१८२)

गौरा

ग०—हरिद्रा (चि० १८।१८४; २२।३६)[1]

गौरामलकम्

च०—आर्द्रामलकः (चि० १८।१८४)
—गौरामलकैरिति आर्द्रतया गौरवर्णैरामलकैः (ब)।
गौरामलकैरिति आर्द्रतया गौरदण्डैरामलकैः (कल०) (चि० २२।३६)
यो०—आर्द्रामलकम् (चि० १८।१८४)

---

१. इन स्थलों पर 'गौरामलक' पाठ है। अन्य व्याख्याकारों ने गौरामलक की व्याख्या की है।

गौरी

च०—हरिद्रा (सि० ४।२१)

ग्रन्थिः

ग०—पिप्पलीमूलम् (चि० ११।१८)
—पिप्पलीमूलम् (चि० १७।१२३ (पा०)
यो०—पिप्पलीमूलम् (चि० १६।७३)
—बिसग्रन्थिः- बिसं मृणालं, तस्य ग्रन्थिः मूलम्। ग्रन्थिः पिप्पलीमूलं वा (चि० ११।१८)

घनः

च०—मुस्तकम् (सि० ८।१९)
यो०—मुस्तः (चि० १५।१६५; १६।८७

चक्रमुद्गः

च०—'ऋषिमुद्गक' इति प्रसिद्धः (सू० २१।२५)

चक्षुष्या

च०—वनकुलत्थिका (चि० २६।२५०)

चञ्चुः-चुञ्चूः

च०—नाडीचः (चि० १९।३२)
ग०—पञ्चाङ्गुल एरण्डः (चि० १९।३२)
—चुञ्चुशाकं पञ्चाङ्गुलवृत्तस्य पत्रम् (चि० २३।२२५)
यो०—नाडीचः (चि० १९।३२)

चणकः

च०—प्रसिद्धः (सू० २७।२८)

चण्डा

च०—चोरपुष्पी (सू० ३।८)
—चोरहुली (सू० ४।३७)
ग०—शङ्खपुष्पी (सू० ३।८)
—चोरपुष्पी (सू० ३।२८; ४।३७; चि० ७।१३० (पा०)
—चण्डः पिङ्गः इति ख्यातः (चि० १२।७०)
यो०—चोरपुष्पी (सू० ३।८; ४।३७; चि० १२।७०)
—चोरकः (सू० ३।२८)

चतस्रःपर्णिन्यः

च०—पर्ण्यश्चतस्र इति शालपर्णी, पृश्निपर्णी, मुद्पर्णी, माषपर्णी च (चि० १।१।६२)
—पर्णिन्यः पर्णिनीचतुष्टयम् (चि० ४।८५)
ग०—पर्ण्यश्चतस्रः—शालपर्णी पृश्निपर्णी, मुद्पर्णी, माषपर्णी (चि० १।१।६२; ३।२४५; ८।७०)
—पर्णिनीभिश्चतसृभिः (चि० ४।८५)
यो०—चतस्रः पर्ण्यः शालपर्णी पृश्निपर्णी मुद्गपर्णी माषपर्णी च (चि० १।१।६२; ३।२४५; ४।८५; ८।७०, १०६; ११।३५)

चतुरङ्गुलः

च०—स्वर्णहालिः (सू० ३।१७)
—व्यवहारार्थं पर्यायानाह—आरग्वध इत्यादि (क० ८।३)
ग०—शम्पाकः (सू० २५।४०)
—शोनालुः (वि० ८।१३६)
—आरग्वध इत्यादयः पर्यायाः (क० ८।३)
यो०—शोणालुः (सू० ३।१७)
—आरग्वधः (चि० ३।२४१)

चन्दनम्

च०—रक्तचन्दनम् (चि० ३।२५८)
ग०—चन्दनमिह सौगन्ध्यात् श्वेतम् (सू० ३।२९)
—चन्दनोऽत्र चन्दने रक्तचन्दनमित्युक्त्या प्रायेण सर्वत्र रक्तचन्दनम् (सू० ४।८)
—रक्तचन्दनमनुक्तत्वात् सर्वत्र बोधव्यम् (सू० ४।१४)
—श्वेतचन्दनं रक्तावजयत्वादस्य दाहप्रशमनत्वम् (सू० ४।४१)
—श्वेतम् (सू० ५।२१)
—रक्तचन्दनम् (सू० २५।४९; वि० ८।१४३; चि० १।२।१२; ४।७३, ७६ इत्यादि)
—चन्दनेति रक्तचन्दनकाष्ठं; आहुश्च वृद्धाः—उक्ते चन्दनशब्दे तु गृह्यते रक्तचन्दनम् (चि० ३।१४५)
—पित्तप्रशमनत्वादत्र चन्दनं रक्तम् (चि० ३।२५८)
—श्वेतचन्दनम् (चि० ३।२६१, २६२; ४।१०८; १२।६९; ६।५०)
यो०—श्वेतचन्दनम् (सू० ३।२६)
—श्वेतम् (सू० ३।२९; ५।२१; २५।४०)
—श्वेतं दाहहरत्वात् (सू० ४।४१)
—रक्तचन्दनम् (चि० १।४।१६; ३।१४१, २०२, २१९, २४७, इत्यादि)
—रक्तम् (चि० ३।२५८)
—चन्दनं इह कुचन्दनम्। वकम् इति ख्यातम् (चि० ४।८५)

चर्मकषा

च०—चर्मचटिका, किंवा सप्तलाः (ब०)। चर्मकषाया इति चर्मचटिकाकषायाः (कल०) (चि० २३।६६)

चर्मसाह्वा

ग०—सप्तला चर्मसाह्वा बहुफेनरसा चेति पर्यायैरुच्यते (क० ११।३)

चविका-चव्यम्

ग०—चव्यं चवी (सू० ४।११)
यो०—चविका चव्यम् (चि० १८।१५८)
—चव्यः चविका (सू० ३।१८;४।६; चि० ६।२९; १६।९४)

चाङ्गेरी

यो०—अम्ललोणिका (वि० ८।१४०; चि० १४।१११; १९।४३, १११)
—आमरूल इति वंगेषु ख्याता (चि० ८।१३१)
—अम्ललोणिका आमरूल इति वंगेषु प्रसिद्धाः (चि० १४।२३९)

चारटी

च०—कुम्भी, 'ब्रह्मयष्टिका' इत्यन्ये (ब०) ।
कुम्भाह्वः ब्रह्मयष्टिकेत्यन्ये (कल०) (चि० ९।४५)
ग०—कुम्भाह्वलता पद्मचारिणीतिपर्याया ब्रह्मयष्टीत्यन्ये (चि० ९।४५)
यो०—पद्मचारिणीं, ब्रह्मयष्टिमित्यन्ये (चि० ९।४५)

चित्रकः

ग०—वह्निनाम, चिता इति लोके (सू० ४।४)
—वह्निनामकम् (सू० ४।११)
—चित्रकश्च पत्ररूपः (सू० २७।१०६)
—स्वनामख्यातम् (वि० ८।१३५)
—रोचनेति केचित् (चि० ७।१०३)
—वह्निनाम तस्य मूलम् (चि० १३।१२६ (पा०)
—चित्रकद्वयं श्वेतरक्तभेदादिह ग्राह्यम (चि० २८।१६७, १६८ (पा०)
—[1]सचित्रकेति चित्रक एरण्डः (चि० १३।१२६)
यो०—प्रसिद्धः (चि० ३।२६७)

चित्रा

च०—दन्ती (सू० ४।४)
—गोरक्षकर्कटी, तद्बीजमिह; यदि वा चित्रा लोहितैरण्डः (सू० १३।१०)
—तयोः पर्यायानाह—दन्तीत्यादि (क० १२।३)
ग०—दन्ती (सू० ४।४)
—रक्त एरण्डः गोरक्षकर्कटीबीजं जयपालबीजं वा (सू० १३।१०)
—द्रवन्ती (चि० १०।३५)
—द्रवन्ती नाम चौषधिः पुनर्द्रवन्ती च चित्रा च···चेति पर्यायैरुच्यते (क० १२।३)
यो०—दन्ती (सू० ४।४)
—गोरक्षकर्कटी, रक्तैरण्डो वा (सू० १३।१०)

चिरबिल्वः

च०—करञ्जः (सू० ४।३)
ग०—नक्तमालः (सू० ४।३; चि० ५।१६५)
—करञ्जः (सू० ४।४)
—नक्तमालः नाटा इति लोके (चि० ३।२६७)
यो०—करञ्जः (सू० ४।३; चि० १३।१६७)
—नक्तमालः नाटाकरंजः इति वङ्गेषु (चि० ३।२६७)
—नक्तमालः (चि० ५।१६५)

चिर्भटः

च०—कर्कटी (चि० १९।३२)
ग०—गोडुम्बाफलं द्विविधं क्षुद्रफलं बृहत्फलञ्च (सू० २७।११२)
—गोरक्षकर्कटी (चि० १९।३२)
यो०—गोरक्षकर्कटी (सू० २७।११२; चि० १९।३२)

चिल्ली

च०—गौडवास्तुकः (सू० २७।९८)
ग०—चिल्लिगौडवास्तुकम् (सू० २७।९८)
यो०—गौडवास्तुकम् (सू० २७।९८)

चीन(क):

च०—वरकोद्दालकादयः षष्टिकविशेषाः; केचित् कुधान्यानि वरकादीनि वदन्ति (सू० २७।१४)
—हायनकादयो धान्यविशेषाः (नि० ४।५)
ग०—वरक उद्दालकश्चीनः···कुरुविन्दाश्चेत्येते ; षष्टिकाः षष्टिकनामषष्टिकस्याल्पान्तरा गुणैरल्पभेदाः (सू० २७।१४)
—हायनकादीनां देशविशेषे स्वनाम्ना ख्यातप्रसिद्धानाम् (नि० ४।५)
यो०—वरक···चीनः···कुरुविन्दाश्च···वरकादयः षष्टिकभेदाः; कुधान्यविशेषाः इति केचित् (सू० २७।१४)
—चीनकोद्दालकौ षष्टिकभेदौ (नि० ४।५)

---

१. इस स्थल पर गंगाधर ने 'चित्रकं' एवं 'सचित्रका' दो शब्दों का पाठ किया है। चक्रपाणि सम्मत पाठ 'चित्रकं' के स्थान पर 'जीरकं' है।

चुक्रिका

जे०—चाङ्गेरी (चि० २४।१५१)
ग०—अम्लवेतसः (लोटकः) (चि० ८।१३१)
—चाङ्गेरी (चि० १५।८९)
—अम्लोटकम् (चि० २४।१५१)
यो०—चुक्रपालंकस्य (चि० ८।१३१)

चुक्रीका

च०—चाङ्गेरी (चि० १५।११४; २४।१५१)
ग०—चुक्रीका नाम शाकविशेषः (चि० २४।१५१)

चुञ्चु

ग०—चुञ्चुशाकं पञ्चाङ्गुलवृत्तस्य पत्रम् (चि० २३।२२५)

चुञ्चुपर्णिका

च०—चुञ्चुपर्णिका नाडीचभेदः (सू० २७।१००)
ग०—चुञ्चुपर्णिका चेँचुयाशाकं लोके एरण्डपर्णीत्युच्यते (सू० २७।१००)
यो०—चुञ्चुपर्णिका चुञ्चुशाकः (सू० २७।१००)

चोरकः

च०—चोरपुष्पिका स्वनामप्रसिद्धः (सू० ३।२४)
—चण्डालकः (चि० ९।४५)
—गन्धद्रव्यं स्वनामख्यातम् (क० १।२३)
ग०—चोरपुष्पी (सू० ३।२४; ४।४८; शा० ८।६१)
—स्थलजचोरपुष्पी (चि० ९।४५; १०।२७)
—पृक्का लता पिड्ङ्ग इति लोके (चि० ९।५७)
—पिड्ङ्ग इति लोके (चि० १०।३४; २६।१३८)
—शङ्खपुष्पी पृक्का लता पिड्ङ्ग (चि० १०।३९)
—चोरहुलीति पिड्ङ्शाकः (क० १।२३)
यो०—चोरपुष्पी (सू० ३।२४; ४।४८; चि० १०।२७)
—चण्डा (चि०९।३५, ५७; १०।३४, ३९; १७।१२३,१४०)

छत्रकम्–छत्रजातिः

च०—सर्पच्छत्रं सर्पफणाकारं छत्रकम्; अन्याश्छत्रजातयः करीषपलालादिजा [1]बहुला ज्ञेयाः (सू० २७।१२३)
ग०—सर्पच्छत्रकं मृतसर्पदेहभूतभूभागे जातमुद्भिज्जं छत्राकृतिकं छत्रं, सर्पच्छत्रकं वर्जयित्वा अन्या बह्वयश्छत्रजातयः उद्भिज्जाः (सू० २७।१२३)
यो०—सर्पच्छत्रकं सर्पफणाकारं छत्रकं उद्भिद्विशेषः, तद्वर्ज्याः सर्पच्छत्रकं वर्जयित्वा अन्याः बह्वयः छत्रजातयः सन्ति (सू० २७।१२३)

१. 'वर्तुला' इति पा०।

छत्रा

च०—[1]छत्रा कोकिलाक्षः (वि० ८।१३९)
—छत्रा मधुरिका, अतिच्छत्रा शतपुष्पा; किंवा छत्रातिच्छत्रे द्रोणपुष्पीद्वयम् (चि० ९।४६)
ग०—छत्रातिच्छत्रे प्रसिद्धे, शताह्वा-मधुरिके इति परे (वि० ८।१३९)
—मधुरिका (चि० ९।४६)
यो०—कोकिलाक्षः (वि० ८।१३९)
—शताह्वा (चि० १।४।६)
—धन्याकम् (चि० ९।४६)

छिन्नरुहा

यो०—गुडूची (वि० ८।१३९; चि० ७।७७; १८।५४)

जटिला

च०—उच्चटा (सू० ४।१९)
—मांसी (शा० ८।६१; चि० ९।४५)
ग०—जटामांसी (सू० ४।४८; शा० ८।६१; चि० ७।१२३; ९।४५; १०।३४)
यो०—उच्चटा (सू० ४।१९)
—जटामांसी (सू० ४।४८; शा० ८।६१; चि० ७।१२३; ९।४५; १०।३४)

जम्बीरः

च०—पर्णासभेदः, जम्बीरफलं सुगन्धि (सू० २७।१६७)
ग०—पर्णासभेदः पुंस्त्वात् (सू० २७।१६७)
यो०—हरितशाकं उत्तरापथे जातं जम्बीरगन्धि किंचिदम्लं; पर्णासभेद इति केचित् (सू० २७।१६७)

जम्बूः

ग०—जाम्बवं जाम्बवफलम् (सू० २५।४०)
—जाम्बवमिति सामान्यात् बृहत्फलजाम्बवं राजजाम्बवं क्षुद्रफलजाम्बवं भूजाम्बवं वनजाम्बवं काकजाम्बवं सर्वम् (सू० २७।१४०)
—प्रसिद्धा (चि० ३।२५८)
यो०—जाम्बवं जम्बूफलम् (सू० २५।४९; नि० २।४; चि० १४।१०)
—जाम्बवं जम्बूः (सू० २६।८४; २७।१४०)
—जम्बूवेत्रौ प्रसिद्धौ (चि० ३।२५८)

जया

च०—जयन्ती (चि० ९।४५)

१. 'इन्द्रा' इति पा०।

यो०—अरणिका (चि० ९।४५)

जलम्

च०—बालकम् (ब०) । बालम् (कल०) (सू० ३।२७)

ग०—बालकम् (सू० ३।२७; चि० ७।१३०; २३।५६)

यो०—बालकम् (सू० ३।२७; चि० ४।१०२; ७।१३०)

जलपिप्पली

च०—जले पिप्पल्याकारा भवति (सू० २७।१७१)

ग०—जले पिप्पल्याकारा जलपिप्पली (सू० २७।१७१)

यो०—जले पिप्पल्याकारा (सू० २७।१७१)

जाती

च०—जातीपल्लवाः (चि० ३।२०७)
—जात्या इति आमलक्याः (चि० ७।७०)
—जाती सौमनस्यायिनी, अन्ये यूथिकां वदन्ति (क० ४।१६)

ग०—जात्यामलकम्-जाती बृहदामलकम्, आमलकं क्षुद्रामलकम् अथवा जाती जातीफलम् (चि० ३।२०७)
—जात्या धात्र्याः (चि० ७।७०)
—जात्याः सौमनस्यायिन्याः-सौमनस्यायिन्या जात्या इति मालत्याः (क० ४।१६)

यो०—मालतीपुष्पैः (चि० २।३।२६)
—जातीपल्लवाः (चि० ३।२०७)

जातीकोशः

जे०—जातिपत्रिका (चि० २८।१५२)

जातीफलम्

ग०—जात्याः फलं जातिफलाख्यम् (सू० ५।७७)

जातुकम्

च०—जातुकशाकं वंशपत्रिका (सू० २६।८४)

ग०—जातुकशाकं वंशतिका (सू० २६।८४)

यो०—जातुकशाकं वंशपत्रिका (सू० २६।८४)

जालमालिनी

जे०—देवताडकः (चि० २३।२०६)

च०—देवदताकः (ब०) । घोषकः (कल०) (चि० २३।२०६

ग०—जालिनी घोषकविशेषः (चि० २३।२०६)

जिङ्गिनी

च०—स्वनामख्याता (वि० ८।१४४)
—प्रसिद्धा (चि० ३०।८३)

ग०—मञ्जिष्ठा (वि० ८।१४४; चि० ३०।८३, १०८; वि० ७।५७)

यो०—स्वनामख्याता (वि० ८।१४४)

जीमूतः

च०—घोषकभेदः (सू० १।८१)
—गरागरी चेत्यादि पर्यायकथनम्; जीमूतः पीतघोषकः (क० २।३)

ग०—घोषकभेदः (सू० १।८१; २।७; ४। (४); वि० ८।१३५)
—जीमूतधामार्गवौ घोषकप्रभेदौ (शा० ८।४१)
—क्षुद्रघोषकः (वि० ८।१३५; क० २।५ (पा०)
—जीमूतकादीनां घोषकादीनाम् (क० १।२०)
—तज्जीमूतं खरागरी वेणी देवताडक इति पर्यायैरुक्तम् (क० २।३)

यो०—देवताडकः (सू० १।८१; २।७;४। (४); वि० ८।१३५)

जीरकः

च०—जीरकशब्देन तु महाजीरकम् (चि० १३।१२६)

ग०—क्षेत्रजीरम् (चि० १४।१०३)

यो०—बृहत् (चि० १३।१२६)

जीवकः

ग०—जीवकः ऋषभकः स्वनामप्रसिद्धः (चि० ३।२५८)
—जियाला इति लोके (चि० १५।१५६)
—जियाला (चि० १८।१०१)

यो०—जीवकश्च ऋषभकश्च तौ प्रसिद्धौ (सू० ४।१)
—जीवकर्षभकौ प्रसिद्धौ (चि० ३।२५८;४।८४; १५।१५६)

जीवन्ती-जीवन्तिकम् (का)

च०—स्वनामख्याता सुवर्णवर्णाभा (सू० ४।१)
—सुवर्णनाला स्वनामप्रसिद्धा (सू० ५।६५)

ग०—स्वनामख्याता स्वर्णबला (सू० ४।१)
—शाकविशेषः (चि० १।४।६; ३।२५०)
—जीवन्तिकश्च यच्छाकं पत्रम् (सू० २७।१०७)

यो०—जीववर्द्धना (सू० ४।१)
—शाकविशेषम् (चि० ३।२५०)
—जीवन्तिका जीवन्तीशाकम् (सू० २७।१०७)

जूर्णाह्वः

च०—'जोनार' इति ख्यातः (सू० २७।१८)

ग०—जुनारा इति लोके (सू० २१।२५)
—......जूर्णाख्याः सर्वे तृणसम्भवाः (सू० २७।१८)

यो०—यवनालः (सू० २१।२५)

—···जूर्णाह्वः यवनालश्च, एते तृणधान्य विशेषाः (सू० २७।१८)

जोङ्गकम्

जे०—अगुरु (चि० १४।१५)
च०—अगुरु (चि० १४।१५)
ग०—काकमासिका (चि० १४।१५)
यो०—अगुरु (चि० १४।१५)

ज्योतिष्मती

जे०—कङ्कुमर्दनिका (चि० ३।२५८)
च०—काङ्गणिका (ब०) । काङ्गिनिका (कल०) (चि० ३।२५८)
ग०—लतापुटकी (सू० १।७८; ५।२६; चि० ३।२५८)
—लतापुटकी कारवेल्लसमपत्रा (सू० २।५)
—लतापुटकीति लोके (सू० ४।२७)
—घोषकः (वि० ८।१५१)
—घोषकभेदः (चि० ३।२६७)
यो०—कटभी (सू० १।७८; २।५; ४।२७; ५।२६; वि० ८।१५१ इत्यादि)

झिण्टी

ग०—···झिन्टिरमुखी···सर्वे तृणसम्भवाः (सू० २७।१७)
यो०—···झिण्टि ··एते तृणधान्यविशेषाः (सू० २७।१७)

टङ्कम्

च०—काश्मीरप्रसिद्धम् (सू० २७।१३६)
ग०—काश्मीरदेशे प्रसिद्धम् (सू० २७।१३६)
यो०—काश्मीरे स्वनामप्रसिद्धं बहुप्रकारम् (सू० २७।१३६)

टिण्टिकेरम्

च०—करीरफलम् (ब०) । कटीरफलम् (कल०) (चि० १४।१०)
ग०—टिण्टिकेरकं मरुजवृक्षविशेषं करीराख्यस्य फलम् (चि० १४।१०)
यो०—टिण्टिकेरकः मरुजफलविशेषः (चि० १४।१०)

टिण्टुकः

ग०—श्योनाकः (चि० २३।७०)

तगरम्

ग०—तगरपादिकम् । ···तगरपादुका (वि० ८।१३५)
—तगरपादिकम् (चि० ३।२६७)
यो०—तगरपादिकम् (सू० ४।४२; चि० ३।२६७; ९।६४)
—तगरपादिका (वि० ८।१३५)
—अगुरु (वि० ८।१४३)
—तगरपादम् (चि० ६।२७; ८।७७)

तण्डुलीय(क):

च०—तण्डुलीयकशाकम् (चि० ११।२७)
ग०—अल्पमारिषः (सू० २७।९५)
—अल्पमारिषः, स चात्र रक्तो ग्राह्यः (चि० ३०।९६)
यो०—अल्पमारिष, खुदेनटे इति ख्यातः (सू० २७।९५)

तपनीयः

च०—इह च द्रव्यनामानि नानादेशप्रसिद्धानि, तेन नामज्ञाने सामर्थ्यं तथाभूतं नास्त्येवान्येषामपि टीकाकृतां, तेन देशान्तरिभ्यो नाम प्रायशो ज्ञेयं, यत्तु प्रचरिते गौडे तल्लेखिष्यामोऽन्यदेशप्रसिद्धं च किंचित् (सू० २७।९)
ग०—इहाभिहितानां शूकधान्यानां नामानि नानादेशप्रसिद्धानि, तानि सर्वाणि न सर्वे पुरुषा ज्ञातुं भवन्ति । तस्माद् देशान्तरतो नामानि प्रायशोऽनुसंधाय कुशलैः ज्ञातव्यानि भवन्ति (सू० २७।९)
यो०—एते हि रक्तशाल्यादयः तेषु तेषु देशेषु तैः तैः नामभिः प्रसिद्धाः । एवमेव द्रव्यं नानादेशेषु नानासंज्ञाभिः अभिधीयते । तस्मात् शूकशमीधान्यानि नानादेशकृषीबलेभ्यः एवं ज्ञेयानि । एते नामतः उक्ताः (सू० २७।९)

तमालः

यो०—तमालपत्रं तेजपत्रम् (चि० ३।२६७)

तरुणी

च०—आरामतरुणी नवमालिका वा (सि० १०।३१)
ग०—घृतकुमारी (वि० ८।१४४)
यो०—घृतकुमारी (वि० ८।१४४)

तरूटः

च०—कह्लारकन्दः (सू० २७।१३६)
—निष्कारकन्दः (चि० १४।९)
ग०—कह्लारकन्दः (सू० २७।१३६)
—चिचुया (चि० १४।९)
यो०—कह्लारकन्दः (सू० २७।१३६)
—कह्हारकन्दः (चि० १४।९)

तर्कारी

च०—जयन्ती (वि० ८।१५१; [1]चि० २६।१३८, २७।५२)
—जया (ब०) । विजया (कल०) (चि० ८।१७६)

ग०—जयन्ती (वि० ८।१५१; चि० २६।१३८, १५३, २३७)

यो०—जयन्ती (वि० ८।१५१)

ताडः-तालः

च०—तालजं तालफलम् (सि० ११।२४)

ग०—ताडस्तालपत्रवद्वृहत्पत्रवृक्षः (सू० २५।४९)

यो०—ताडः तालपत्रवत् बृहत्पत्रः वृक्षः (सू० २५।४९)
—शालताली प्रसिद्धौ (चि० ३।२५८)

तामलकी

जे०—दलफलिका (चि० ३।२१९)
—दरफलिका (चि० २८।१५९; २९।९३)

च०—भूम्यामलकी (सू० ४।३६; चि० ११।६३)
—'भूम्यामलकी' इति ख्याता (चि० ३।२१९)

ग०—भूम्यामलकी (सू० ४।३६, ३७; चि० ११।६३; ३।२१९; ५।११९ इत्यादि)

यो०—भूम्यामलकी (सू० ४।३६, ३७; वि० ८।१३९; चि० ११।६३; ३।२१९ इत्यादि)

ताम्बूलम्

ग०—पर्णाक्यम् (सू० ५।७७)

तालीशम्

च०—(तालीशपत्रं) अन्ये तु तालीशपत्रमित्यत्र तालीशं च पत्रं चेति द्रव्यद्वयग्रहणशङ्का स्यात् (चि० ९।३६)

ग०—तालीशपत्रम् (वि० ८।१३५)

यो०—तालीशपत्रम् (वि० ८।१३५)

तिक्तरोहिणी

ग०—रोहिणी तिक्तेति कटुरोहिणी (चि० ३।२४१)
—कटुरोहिणी (चि० ७।१४०; १५।१८१)

यो०—रोहिणी तिक्ता कटुरोहिणी (चि० ३।२४१)
—कटुरोहिणी (चि० ७।१४०, १४४)
—तिक्तकरोहिणी कटुरोहिणी (चि० १२।२१, ५३, ७२; चि० १३।१८१)

तिक्ला

ग०—शङ्खिनी तिक्ला···इति च पर्यायैरुच्यते (क० ११।३)

१. इस स्थल पर कल० में 'जावन्ता' पाठ है।

तिक्ता

च०—कटुरोहिणी (सि० ३।६१)

यो०—कटुरोहिणी (चि० ३।२४३)

तिक्तेक्ष्वाकुः

जे०—तिक्तालाबूः (चि० २३।२०६)

च०—कटुकालाबू (ब०) । तिक्तालाबुः (कल०) (चि० २३।२०६)

ग०—तिक्तालाबूः (चि० ७।१०८ (पा०)

तिनिशः

जे०—स्यन्दनः (चि० १४।१६)
—बर्बरं स्यन्दनं, स्यन्दनभेद् इत्यपरे (चि० ३।२५८)

च०—वञ्जुलः (चि० ३।२५८)

ग०—तिनिसः नेमिः आवलुश इति लोके (चि० १।२।१२)
—स्यन्दनभेदः (चि० ३।२५८)
—वृक्षः (चि० ७।९८)

तिन्तिडीकम्

ग०—वृक्षाम्लं किञ्चिन्मधुरमांसलफलं तिन्तिडीकम्··· तिन्तिडीकमम्लाधिकं तिन्तिडीकम् (वि० ८।१४०)

यो०—वृक्षाम्लम् (सू० २६।८४)

तिन्दुकः

च०—'केन्दुः' इति प्रसिद्धः (सू० ४।४३)
—केन्दुः (सू० २७।१४७)

ग०—केन्दुरिति नाम्ना प्रसिद्धः (सू० ४।४३)
—तिन्दुकं तिन्दुकफलम् (सू० २५।४०)
—निंदु इति ख्यातम् (सू० २७।१४७)
—तूँद इति लोके (शा० ८।३३)

यो०—कालस्कन्धः (सू० ४।४३)

तिरीटकः

ग०—तिल्वको···तिरीण्टक इति पर्यायाः (क० १।३)

तिलः

च०—तिलगुणो यद्यपि विशेषेण नोक्तः, तथाऽपि प्रधाने कृष्णतिले ज्ञेयः (सू० २७।३०)
—तिलमिति तिलतण्डुलम् (चि० १८।७९)

ग०—तिलः कृष्णादिजातिः (सू० २७।३०)
—तुषरहितयोः कृष्णतिलसुवर्णमुद्गयोः (चि० २।३।१६)
—कृष्णतिलम् (चि० २५।५१, ७८, ७९; २६।१३९, २७९)
—पञ्चविधं तिलं कृष्णादिभेदात् (सि० ७।६१)

—तिलकणाः तिलतण्डुलाः (सु० ४।३२)
यो०—कृष्णतिलः (चि० १६।७२)
—तिलाः तिलतण्डुलाम् (चि० १८।७९)
—तिलकणः तिलतण्डुलः (सु० ४।३२)

तिलपर्णिका

जे०—तिलपर्णी चोरका हि लोके । (चि० ३।२६७)
च०—हुलहुलिका (सू० २७।९७)
—तिलपर्णी 'हुलहुल' इति ख्याता (ब०)। तिलपर्णी तिलोका इति ख्यातः, रक्तचन्दनमित्यन्ये (कल०) (चि० ३।२६७)
ग०—तिलपर्णी पुत्रागजपत्रम् (सू० २७।९७)
—तिलपर्णी रक्तचन्दनम् (चि० ३।२६७)
यो०—चोरकः, श्रीहस्तिनी इत्यपरे (सू० २७।९७)
—तिलपर्णी रक्तचन्दनम् (चि० ३।२६७)

तिल्वकः

जे०—पट्टिकारोध्रम् (चि० २८।८४)
—तिल्वकः (शबर) लोध्रः (सू० १।११६)
च०—लोध्रः, तस्य तरुरिति विशेषणेन पट्टिकालोध्रं व्युदस्यति, शाबरलोध्रं च महाप्रमाणं तरुशब्दयोग्यं ग्राहयति; किंवा तरुविशेषणेन बालं लोध्रं व्युदस्यति (सू० १।११६)
—शाबरलोध्रः (सू० २५।४९)
ग०—लोध्रस्तरुरिति विशेष्यः (सू० १।११६)
—श्वेतलोध्रः (सू० २५।४९)
—लोध्रम् (वि० ७।२६; ८।१३६; चि० ३।२६७; १८।१८१; २८।८४)
—लोध्रस्य वृक्षत्वक् (चि० १३।१२४)
—लोध्रः (सि० ४।२९ (पा०))
यो०—लोध्रः तरुः (सू० १।११६)
—[1]शाबरलोधः (सू० २५।४९ (पा०)
—लोध्रः (वि० ८।१३६; चि० ३।२६७; १८।१८१)

तुगा

ग०—वंशलोचना (चि० ४।७६)
यो०—वंशलोचना (चि० ४।७६)

तुगाक्षीरी

जे०—वंशरोचनानुकारि भौमं द्रव्यम् (चि० २।१।३०)
च०—वंशलोचनानुकारि पार्थिवं द्रव्यम् (चि० ८।१०३)

—वंशरोचना तुगाक्षीरी, अन्ये वंशरोचनानुकारि पार्थिवं द्रव्यं [1]तालक्षीति वदन्ति (चि० २।१।३०)
ग०—वंशलोचना (चि० १।३।४५; १।४।२०; २।१।३०, ३६; २।२।७ इत्यादि)
यो०—वंशलोचना (चि० १।१।६८; चि० १।३।४५; १।४।२०; २।१।३०, ३६, इत्यादि)
—वंशलोचनम् (चि० १६।१००)

तुङ्गः

च०—पुन्नागः (सू० ३।२६; ४।८; सि० १०।२२)
ग०—पुन्नागवृक्षः (वि० ८।१४४)
यो०—पुन्नागः (सू० ३।२६; ४।८, ४७)
—पुन्नागवृक्षः (वि० ८।१४४)

तुम्बः (म्बी)

च०—तुम्बेत्यादि पर्यायकथनम् (क० ३।३)
ग०—लम्बा······तुम्बी···चेक्ष्वाकुश्चेति पर्यायैरिक्ष्वाकुः प्रोच्यते (क० ३।३)

तुम्बुरु

च०—स्वनामप्रसिद्धम् (सू० ३।८)
—यदुक्तं—"शृङ्गवेरवदाकृत्या शृङ्गवेरीति भाषिता। कुस्तुम्बुरुसमाकृत्या तुम्बुरूणि वदन्ति च ॥" (सू० २७।१७१)
ग०—स्वनामख्यातानि, धन्याकानि वा (सू० ३।३)
—स्वनामख्यातं, तदभावे धान्यकस्य द्विभागः पुनरुक्तत्वात् (सू० ३।८)
—उक्तञ्च—"शृङ्गवेरवदाकृत्या शृङ्गवेरीति भाष्यते। कुस्तुम्बुरुसमाकृत्या तुम्बुरूणि वदन्ति हि ॥" (सू० २७।१७१)
—धान्यकसदृशम् (सू० २७।३०७)
—स्वनामख्यातं, तदभावे धन्याकम् (वि० ८।१४३)
—धान्यकानि (चि० १४।५०)
यो०—स्वनामख्यातम् (सू० ३।३; ३।८)
—प्रसिद्धम् (वि० ८।१४३)
—धन्याकानि (चि० १४।५०)
—धन्याकभेदश्च (चि० १४।८९)

१. इस स्थल पर मूल में 'बिल्व' पाठ है।

१. 'तालक्षीरी' इति पा०।

तुरुष्कः

च०—सिल्हकः (चि० २८।१५३)
ग०—शिह्लकवृक्षनिर्यासः (चि० २८।१५३)

तुवरः

ग०—तुवरी आढकी (चि० ३०।१२४)

तूदम्

च०—औत्तरापथिकफलम् (कल०) (सू० २७।१३५)
ग०—तूदफलमुत्तरापथे प्रसिद्धम् (सू० २७।१३५)
यो०—औत्तरापथिकं फलम् (सू० २७।१३५)

तृणम्

ग०—तृणमूलं गन्धतृणमूलम् (चि० ४।१०३)
यो०— ,, ,, ,,

तृणधान्यम्

च०—तृणधान्यानि श्यामाकादीनि (चि० ६।२१)
ग०—तृणधान्यं कङ्गुकोद्रवादिकम् (चि० ६।२१)
यो०—तृणधान्यं श्यामादिकम् (चि० ६।२१)

तृणपञ्चमूलम्

च०—"शरेक्षुदर्भकाशानां शालीनां मूलमेव;च" (च० चि० अ० १ पा० १) इत्यादिनोक्तम् (सि० ३।४८)
ग०—कुशादिपञ्चमूलम् (चि० २२।३०)

तृणशून्यम्

जे०—केतकी (चि० ३।२५८)
च०—केतकी (सू० २५।४९; चि० ३।२५८)
—केतकीफलम् ; (सू० २७।१४५)
ग०—तृणशून्या (न्यं) केतकी तस्याः फलासवः (सू० २५।४९)
—केतकीफलम् (सू० २७।१४५)
—मल्लिका (चि० ३।२५८)
यो०—केतकी (सू० २५।४९)
—केतकीफलम; मल्लिकेति केचित् (सू० २७।१४५)
—मल्लिका (चि० ३।२५८)

तेजनः

यो०—तृणभेदः (चि० १।३।२)

तेजस्विनी–तेजोवती

च०—तेजस्विनी तेजोवती (च०)। चविका (कल०) (चि० ८।१३७)
—चविका (चि० १७।१४१)
ग०—तेजस्विनी तेजिनी (वि० ८।१४२ (पा०)
—तेजस्विनी लतापुटकी (वि० ८।१५१)
—चव्यम् (चि० १७।१४१)
—चवी (क० ७।१५)
यो०—तेजस्वती (वि० ८।१४२)
—चविका (चि० १७।१४१)

तेजोह्वा

च०—चविका (चि० ८।१३७)
ग०—चवी (चि० ८।१३७; १५।१६५)
यो०—वचा (चि० ८।१३७)
—तेजोवती (चि० १५।१६५)

तैलफलम्

च०—तैलयोनिफलान्येरण्डफलतिलादीनि (सू० ३।१८)
—तैलफलानि तिलोमास्फोतादीनि (चि० २६।४८)
—फलानां तैलयोनीनामिति तिलातस्यादीनाम् (चि० २८।११७)
ग०—तैलफलानि तैलयोनिफलानीति तिलफलैरण्डादीनि (सू० ३।१८)
—तैलफलानि च तिलक्षमादीनि (चि० २६।४८)
यो०—तैलफलानि तैलयोनीनि फलानि एरण्डादीनि (सू० ३।१८)

तोदनम्

च०—धन्वनभेदः (सू० २७।१४२)
ग०—फलविशेषः (सू० २७।१४२)
यो०—राजप्रियम् (सू० २७।१४२)

तोयम्

ग०—बालकम् (सि० ३।६२)

तोयपर्णी

ग०—''''''तोयपर्णी'''सर्वे तृणसम्भवाः (सू० २७।१७)
यो०—''''''तोयपर्णी'''एते तृणधान्यविशेषाः (सू०२७।१७)

त्रपुषम्

ग०—मायाम्बुफलम् (सू० १।८१; २७।११०)
—कूष्माण्डवद् वृहत् फलं मायाम्बुफलमुच्यते (चि० २६।५२)
यो०—त्रपुषमिह तिक्तत्रपुषम् (सू० १।८१)
—सुधावासः (सू० २७।११०)

त्रायन्तिका-त्रायन्ती

जे०—त्रायन्तिका त्रायमाणा (चि० २९।५८)
ग०—त्रायन्ती त्रायमाणा (चि० २९।५८)
यो०—त्रायन्तिः त्रायन्ती त्रायमाणा। ह्रस्वश्छान्दसः (चि० १२।५३)

त्रायमाणा

ग०—जलबहला (चि० ३।२२०)
—पानीयबहला (चि० १३।७०)
—त्रायन्ती (चि० १९।६०)
यो०—त्रायन्तीलता (चि० ८।१४३)
—बलाडूमुर इति वंगेषु ख्यातम् (चि० ३।२२४)

त्रिकटु

यो०—व्योषम् (चि० ५।७९)
—शुण्ठीपिप्पलीमरिचानि (चि० १०।२०; १५।१७७)
—व्योषं शुण्ठीपिप्पलीमरिचानि (चि० १४।१०७)

त्रिकण्टकः

ग०—गोक्षुरम् (चि० ३।२३६)
यो०—गोक्षुरः (चि० ३।२३६; ६।३८; १४।२३४; १७।९४; १८।४०)

त्रिगन्ध(क)म्

च०—त्रिगन्धं च पत्रत्वगेला उच्यन्ते, "त्रिगन्धं तु समाख्यातं त्वगेलापत्रकैः समैः। तदेव तु समाख्यातं चतुर्जातं सकेसरम्" इति (चि० १६।८९)
यो०—त्वगेलापत्रमिति गन्धत्रयम्; त्रिजातकापरनाम—त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकमिति (चि० १६।८९)

त्रिजातम्

यो०—त्वगेलापत्रमिति गन्धत्रयम्, त्रिजातकापरनाम (चि० १६।८९)

त्रिदशाह्वः

जे०—देवदारु, स्पृक्केति केचित् (चि० २८।१६२)
च०—देवदारुः (चि० २८।१६२)
ग०—देवदारु (चि० २८।१६२)

त्रिपर्णी

च०—हंसपादिका (सू० २७।१०२)
ग०—हंसपदी (सू० २७।१०२)
यो०—हंसपादिका (सू० २७।१०२)

त्रिफला

जे०—हरीतक्यामलकविभीतकानि त्रिफला (चि० २५।११५)
च०—सुश्रुते-हरीतक्यामलकविभीतकानि त्रिफला इति परिभाषया त्रिफला शब्देन हरीतक्यादय उच्यन्ते, तथाऽत्रापि जरणान्ते ... (चि० १।३।४१) इति वचनाद्धरीतक्यादिषु त्रिफला संज्ञा दर्शिता; तेन त्रिफलाशब्देन द्रव्यत्रयमुच्यते। ....
त्रिफलाशब्देन यद्यपि द्राक्षाकाश्मर्यपरूषकाणि चोच्यन्ते; यदुक्तमन्यत्र-"पथ्यामलक (बिभीत ?) धात्रीभिस्त्रिफला महती स्मृता। चक्षुष्या सर्वदोषघ्नी स्तम्भनी बृंहणी च सा॥ ह्रस्वा काश्मर्यमृद्वीकापरूषकफलैर्भवेत्" इति, तथाऽपीह हरीतक्यादित्रिफलाया एव प्रधानतयोत्सर्गतो ग्रहणं भवति (चि० ९।३५)
—त्रिफलाकुसुमानीति त्रिफलावृक्षपुष्पाणि (चि० २५।११५)
—द्वे त्रिफले इत्यत्र द्राक्षाकाश्मर्यपरूषकाणि द्वितीया त्रिफला (चि० २६।८७)
ग०—हरीतकीविभीतक्यामलकीति त्रयी त्रिफला (शा० ८।३२)
—पथ्याक्षधात्र्य इति त्रयीम् (चि० ३।२०६)
—पथ्याक्षधात्र्यस्त्रिफला (चि० ३।२९९)
—पथ्यामलकविभीतकानाम् (चि० ६।४६)
—पथ्याक्षधात्र्यः (चि० १०।१८)
—द्वे त्रिफले—हरीतकी चामलकी विभीतकमिति त्रयी; त्रिफलाऽथापरा—द्राक्षा काश्मर्य सपरूषकमिति (चि० २६।८७)
यो०—वरा (सू० २।९)
—पथ्यामलकविभीतकानि (चि० ६।४६)
—आमलकं हरीतकी विभीतकञ्च (चि० ७।६२, १३६; ९।३५; १०।१८, ४८ इत्यादि)
—त्रिफलाया दलानां निरस्थीकृतानां हरीतकीविभीतकामलकानाम् (चि० १४।१४५)

त्रिवृत्

च०—त्रिवृदिति अरुणमूला त्रिवृत् (सू० ४। (४)
—त्रिवृन्मूलशब्देन श्याममूलाया अरुणमूलायाश्च मूलं गृह्यते (क० ७।३)
ग०—अरुणमूला त्रिवृत् (सू० १।७७; क० ७।६१, ६७)
—अरुणमूला त्रिवृत् त्रिवृत् (चि० ८।१३६)
—...[1]अरुणमूला त्रिवृता त्रिवृतैवेहोच्यते (क० ७।७)

१. इस स्थल पर मूल में 'त्रिवृत्' शब्द नहीं है।

—अरुणा त्रिवृत् (क० ७।५१)
—श्यामारुणमूलत्रिवृते द्वे (क० १०।१८)
—त्रिवृच्छ्यामा श्याममूला त्रिवृदरुणमूला त्रिवृत् (क० ११।९)
—त्रिवृच्छ्यामयोररुणमूलत्रिवृच्छ्याममूलत्रिवृतोः (क० ११।१२)
—श्यामारुणमूलत्रिवृद्द्वयम् (सि० ४।३९)
—त्रिवृद्दन्ती—त्रिधा दन्ती, दीर्घमूला नागदन्ती ह्रस्वमूला त्रिवृद्दन्ती ह्रस्वमूलक्षुद्रवृत्ता द्रवन्ती (चि० २३।२४१)
यो०—अरुणमूला त्रिवृत् (सू० १।७७; ४।(४)
—रक्तमूला (वि० ८।१३६)

त्रिसुगन्धि

यो०—त्रिसौगन्ध्यं त्रिसुगन्धि त्रिजातकं त्वगेलापत्राणि। यदुक्तं—त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्। नागकेसरसंयुक्तं चतुर्जातकमुच्यते॥ इति (चि० १२।५०)

त्रुटिः

च०—एला (चि० २६।५५)
—सूक्ष्मैला (व०)। त्रुटी एला सूक्ष्मैला (कल०) (चि० २६।८७)
ग —सूक्ष्मैला (चि० २६।५५)
—[1]सूक्ष्मैला, पुनः पाठात् स्थूलैला च, भागद्वयं वा (चि० २६।८७)

त्र्यूषणम्

ग०—त्रिकटु (चि० १२।६२; १५।८७)
यो०—त्रिकटुकम् (सू० २३।१५, १८)
—त्रिकटु शुण्ठी पिप्पली मरिचं च (चि० ५।६५; १२।५५; १५।८७; १६।७०, ७८)
—त्रिकटु (चि० ७।१०९; ९।४९; १२।४२, ६२; १३।१०२ इत्यादि)
—व्योषम् (चि० ७।११३; १२।२४)

त्वक्

ग०—गुडत्वक् (सू० ३।२८; ५।२१, ६४; २६।१३५, १८४ इत्यादि)

१. इस स्थल पर चक्रपाणिदत्तकृत पाठ में एक बार तथा गंगाधर सम्मत पाठ में दो बार 'त्रुटि' का उल्लेख है।

—गुड़त्वक् (क० १।२४ (पा०)
—त्वचं गुड़त्वचम् (चि० ८।१०३; १५।१३८; २३।२०५)
यो०—गुड़त्वक् (सू० ३।२८; ५।२१, ६४; चि० १।१६९; ६।५० इत्यादि)
—त्वचः गुड़त्वचश्च (चि० १।१।४९; ८।१०३; ११।२१; १५।१३८)
—त्वचशब्दोऽदन्तोऽप्यस्ति। गुडत्वक् (चि० ८।१३७)

त्वक्क्षीरी

ग०—वंशलोचना (चि० ११।६२; १५।१६४; १८।८८, १४६; २९।१५२)
यो०—वंशलोचनम् (चि० ११।१७, २०, ५४, ६२; १५।१६४ इत्यादि)
—त्वक्क्षीरि त्वक्क्षीरी-वंशलोचना 'ह्रस्वश्छान्दसः' (चि० १८।१४६)

दण्डैरका

च०—दण्डैरका 'होगल' इति ख्याता (चि० २६।५१)
—दण्डैरका गुन्द्राख्यगुल्मः, नलो वा (क० १।२५)

दण्डोत्पलम् (पा०)

च०—[1]अश्म इति ख्यातम् (कल०) (चि० २६।५१)

दधित्थः

च०—कपित्थः (सू० २।१९, २८; चि० २२।३६)
—कपित्थम् (कल०) (चि० १४।९३)
ग०—दधित्थाम्लः कपित्थस्य फलशस्यम् (सू० २।२८)
यो०—कपित्थः (सू० २।१९, २८; चि० १४।९३, १४८)
—दधित्थस्य कपित्थस्य फलस्य मध्यात् मध्यस्थशस्यात् मज्ज्ञः (चि० ११।८९)

दन्तशठः

जे०—वृक्षाम्लः (चि० ३।२६७)
च०—जम्बीरः, केचिदम्लोटं वदन्ति (सू० २७।१६१)
ग०—जम्बीरफलं कागजीति ख्यातम् (सू० २७।१६१)
—जम्बीरः (वि० ८।१४०; चि० ३।२६७)
यो०—जम्बीरभेदः (सू० २६।८४; २७।१६१)
—जम्बीरकः (वि० ८।१४०)
—जम्बीरः (चि० ३।२६७)

१. व० में 'दण्डोत्पल' शब्द को पाठान्तर के रूप में स्वीकार किया है। कल० में इस शब्द को मूल में ग्रहण किया और इसके साथ की व्याख्या में उपर्युक्त व्याख्या उपलब्ध होती है।

दन्ती

च०—तयोः पर्यायानाह—दन्तीत्यादि (क० १२।३)
—दन्त्याः श्यावानि (क० १२।४)
ग०—नागदन्ती (सू० २।९; २५।४९; वि० ८।१३६; वि० ७।१२४)
—पर्यायैर्दन्तीनामौषधिरुच्यते (क० १२।३)
यो०—दन्तिनी (वि० ८।१३६)

दर्दुरः

च०—वरकोद्दालकादयः षष्टिकविशेषाः; केचित् कुधान्यानि वरकादीनि वदन्ति (सू० २७।१४)
ग०—वरक''दद्दुरः गन्धलाः कुरुविल्वाश्चेत्येते षष्टिकाः षष्टिकनाम (सू० २७।१४)
यो०—''''''दर्दुरः''' वरकादयः षष्टिकभेदाः; कुधान्य-विशेषाः इति केचित् (सू० २७।१४)

दर्भः

च०—उलुयातृणम् (सू० ४।१७)
ग०—उलुया तृणम् (सू० ४।१७)
—उलुया (सू० ४।३५)
—उलुयामूलम् (वि० ८।१३५)
—उलुमूलम् (वि० ८।१३९; चि० ३।२५८)
—अत्र दर्भः कुशः (चि० ११।४४)
—उल्लाकस्य मूलम् (चि० ११।४४)
—उलुया कश्चित् कुशमूलमाह (चि० २१।११०)
—दर्भपुष्पं उल्लाकपुष्पम् (चि० २६।६३)
—दर्भमृदितं कुशेन मूलेन मर्दितम् (सि० ६।८३)
यो०—उलुपतृणम् (सू० ४।१७, ३५)
—कुशः (वि० ८।१३५; चि० ११।४४)

दर्भपत्री (पा०)

ग०—कत्तृणम् (सि० १०।३३)

दाडिमः

ग०—दाडिमं दाडिमफलबीजम् (सू० २।१९)
—दाडिममातुलुङ्गौ स्वनामख्यातौ (सू० ४।१०)
—द्विविधं दाडिमं मधुरफलमेकमपरमम्लफलम् (सू० २७।१५०-१५१)
यो०—दाडिममातुलुङ्गौ स्वनामख्यातौ (सू० ४।१०)

दारु

ग०—देवदारु (चि० ७।८८, १२३)
यो०—देवदारु (चि० ३।२१० (पा०); १६।६०, ९३; १८।१७८
—दारुहरिद्रा देवदारु इत्यन्ये (चि० ७।१२३)

दारुनिशा

यो०—दारुहरिद्रा (चि० ६।४०)

दार्वी

च०—दारुहरिद्रा (चि० ७।६१)
ग०—दारुहरिद्रा (चि० ६।२६; ७।४६, ६१, ९१, ११४ इत्यादि)
यो०—दारुहरिद्रा (चि० ६।२६, २८; ७।४६, ६१, ८४)
—खदिरदार्व्योःसारः (चि० ७।१३५)

दीपिका (पा०)

ग०—यमानीमूलम् (क० १।२२)

दीप्यकः

जे०—अजमोदः (चि० २४।१८१)
ग०—यमानी (चि० ५।७१)
—क्षेत्रयमानी (चि० ९।५४)
यो०—अजमोदश्च (चि० ५।६९; ६।२७; ९।५४)
—अजमोदाश्च (चि० ६।३८)
—अजमोदम् (चि० १२।३९)
—वक्ष्यमाणवृद्धवाग्भटवचने यवानी यवानिकेति दर्श-नात् दीप्यकः इह अजमोदा यवानी; यवानिका यवानीक्षुपः वनयमानी वा (चि० १२।५५ (पा०)

दीर्घशूकः

च०—इह च द्रव्यनामानि नानादेशप्रसिद्धानि, तेन नाम-ज्ञाने सामर्थ्यं तथाभूतं नास्त्येवान्येषामपि टीका-कृतां, तेन देशान्तरिभ्यो नाम प्रायशो ज्ञेयं, यत्तु प्रचरति गौडे तल्लेखिष्यामोऽन्यदेशप्रसिद्धं च किंचित् (सू० २७।८)
ग०—इहाभिधानां शूकधान्यानां नामानि नानादेश-प्रसिद्धानि। तानि सर्वाणि च सर्वे पुरुषा ज्ञातुं प्रभवन्ति। तस्माद् देशान्तरतो नामानि प्राय-शोऽनुसंधाय कुशलैः ज्ञातव्यानि भवन्ति (२७।८)
यो०—''''''दीर्घाः शूका यस्य स दीर्घशूकः'''एते हि रक्तशाल्यादयः तेषु तेषु देशेषु तैः तैः नामभिः प्रसिद्धाः। एकमेव द्रव्यं नानादेशेषु नानासंज्ञाभिः अभिधीयते। तस्मात् शूकशमी धान्यानि नाना-देशकृषिवलेभ्यः एव ज्ञेयानि। एते नामतः उक्ताः (सू० २७।८)

दुःस्पर्श (क):-दुःस्पर्शा

ग०—दुरालभा (चि० १४।१००; १८।५१; २४।१६६)
यो०—दुरालभा (चि० १४।१००)
—दुरालभा (चि० १४।१९६; १५।१८६; १८।५१, ८७ (पा०), १५९)

दुग्धिका

च०—स्वनामख्याता (चि० २१।८३)
यो०—क्षीरिणी (चि० ८।१३१; १४।१९८)

दुरालभा

ग०—यवासः (सू० २५।४०)
यो०—यवासः (सू० २५।४०)

दूर्वा

ग०—दूर्वा तु प्रचरिता (सू० ३।२७)
यो०—कृष्णदूर्वा (सू० ३।२७)

देवताडकः

च०—गरागरी चेत्यादि पर्यायकथनम् (क० २।३)
ग०—तज्जीमूतं'''देवताडक इति पर्यायैरुक्तम् (क० २।३)

देवदारु

ग०—देवदारुकाष्ठम् (चि० १३।१०८)

द्रवन्ती

च०—दन्त्येव क्षीरितपत्रा (सू० १।७८)
—दन्तीभेदः (सू० २।१०; चि० २७।५२; क० ११।१३; सि० १०।२५)
—तयोः पर्यायानाह—दन्तीत्यादि (क० १२।३)
ग०—दन्तीभेदः (सू० १।७८)
—ह्रस्वदन्ती (सू० २।१०)
—नागदन्ती (वि० ७।२६)
—क्षुद्रमूला दन्ती (सू० २५।४९)
—क्षुद्रदन्ती (वि० ८।१३६)
—त्रिधा दन्ती—दीर्घमूला नागदन्ती ह्रस्वमूला त्रिवृद्दन्ती ह्रस्वमूलक्षुद्रवृक्षा द्रवन्ती (चि० २३।२४१)
—पर्यायैर्दन्तीनामौषधिरुच्यते (क० १२।३)
यो०—स्वनामख्याता (सू० १।७८)
—दन्तीभेदः (वि० ८।१३६)

द्राक्षा

च०—द्राक्षोत्तमा [1]गोस्तनी द्राक्षेत्यर्थः (चि० २०।३३)
ग०—द्विधा परुषकं द्राक्षा च मधुराम्लभेदात् (सू० २७।१३२)
यो०—द्राक्षोत्तमा द्राक्षा उत्तमा त्रिफला द्राक्षोत्तमा गोस्तनी वा (चि० २०।३३)

द्वारदा

च०—शाकतरुः (वि० ८।१३९)
—शाकतरुः, कपिकच्छुर्वा (चि० १४।१५)
ग०—पालङ्कशाकः (वि० ८।१३९)
यो०—शाकतरुः (वि० ८।१३९)

द्वीपिका-द्वीपी

च०—कण्टकारी, द्वीपिशत्रुरिति पाठे शतावरी ज्ञेया (वि० ८।१३५)
—हिंस्रा, 'कण्टकारी' इत्यन्ये (क० १।२२)
ग०—व्याघ्री (वि० ८।१३५)
यो०—व्याघ्री कण्टकारिका (वि० ८।१३५)

द्वीपिशत्रुः (पा०)

च०—द्वीपी कण्टकारी, द्वीपिशत्रुरिति पाठे शतावरी ज्ञेया (वि० ८।१३५)

धनञ्जयः

च —अर्जुनः (चि० ४।७५)
ग०—अर्जुनः (चि० ४।७५)
यो०—अर्जुनः (चि० ४।७५)

धन्वनः

ग०—वृक्षविशेषः
—धामनवृक्षः } ([1]सू० २५।४९)
—धन्वनं धन्वनवृक्षस्य फलम् (सू० २७।१४२)
—धाउनीवृक्षः (वि० ८।१३५)
—धन्वनवृक्षः (वि० ८।१४०)
—धन्वननामा वृक्षः (चि० ३।२५८)
—धाअन इति लोके (चि० ६।२७)
यो०—धनुर्वृक्षः धामन इति लोके
—धनुर्वृक्षः } ([1]सू० २५।४९)
—धन्वनं धनुर्वृक्षफलं। धामन इति ख्यातम् (सू० २७।१४२)
—धामनवृक्षः (वि० ८।१३५; चि० ६।२७)
—मरुजद्रुमः करीर इति ख्यातः (चि० ३।२५८)

१. 'उत्तमद्राक्षा श्वेतद्राक्षेत्यर्थः' इति पा०।

१. फलासव एवं सारासव दोनों सन्दर्भो में पठित है।

धन्वयासः

जे०—दुरालभा (चि० ३।२०४)
च०—दुरालभा (सू० २।१२)
ग०—दुरालभा (सू० ४।१२; चि० ३।२०७)
यो०—दुरालभा (सू० ४।१२,२९; चि० ३।२०४, २०७; ४।४६ इत्यादि)

धवः

ग०—स्वनामको वृक्षः धवो इति लोके (चि० १।२।१२)
—स्वनामख्यातः (चि० ७।१२९)
यो०—धवादयः प्रसिद्धाः (चि० ३।२५८)

धातकी

ग०—धातृपुष्पा (चि० ३।२५८)
यो०—धातृपुष्पी स्वनामख्याता (सू० ४।५)
—धातकीपुष्पं धाइफुल इति ख्यातम् (सू० ४।३१)
—धातृपुष्पा (चि० ३।२५८)
—धातकीपुष्पम् (चि० ४।४६; १४।२३०; १५।११२,१२९)

धात्री

ग०—आमलकीफलानाम् (चि० १२।१००)
—आमलकी (चि० २०।३२; २६।२६०)
यो०—आमलकी (सू० ४।५०; चि० ७।१५५; ११।६३; १२।३२, १०० इत्यादि)
—धात्रीफलं आमलकम् (चि० १६।१०१; १८।९२)
—धात्रीफलानामामलकानाम् (चि० १६।१११)
—धात्रीफलैरामलकीफलैः (चि० १८।९०, १०७, १६५)

धान्यम्

ग०—धन्याकम् (सू० २७।३०७; ५।७४; २२।६१)
—धान्यकम् (चि० २।२।४)
—धान्यानि शालिसंज्ञकानि (चि० ५।१६४)
यो०—धन्याकम् (चि० २।१।४३; २।२।४; २।४।१६, २१; ५।६५ इत्यादि)
—धान्यानि शूकधान्यानि शमीधान्यानि च (चि० ८।१८१)
—धनिका (चि० १९।४४, ११०)

धान्यकम्

ग०—कुस्तुम्बुरुः (सू० २७।१७३)
—धनीयकम् (च० ३।२६७)
यो०—धन्याकम् (सू० ४।२९, ४२; चि० ३।१८३, २६७; ११।८६ इत्यादि)
—कुस्तुम्बुरु (सू० २७।१७३)
—धनिका (चि० १९।२०, २६, १०५)

धान्यमाषः

च०—धान्यमाषशब्देन व्रीहिमाषं ग्राहयन्ति, सुवर्णमाषं वा व्यावर्तयन्ति (शा० ८।१९)

धामार्गवः

च०—पीतघोषकः (सू० १।८१)
ग०—घोषकः (सू० १।८१; १०।२५)
—घोषकभेदः (सू० २।७)
—पीतघोषको (सू० ४। (४); क० ४।३)
—पीतघोषकभेदो वामकस्त्वान्नेहापामार्गः (वि० ८।१३५)
—घोषकः पीतः (वि० ८।१३५)
—जीमूतकधामार्गवौ घोषकभेदौ (शा० ८।४१)
यो०—पीतघोषा राजकोशातकी (सू० १।८१)
—कृतवेधनधामार्गवौ कोशातकीद्वयम् (सू० २।७; वि० ८।१३५)

धावनी

जे०—कण्टकालिका (चा० ३।२२४)
च०—कण्टकारी (चि० ३।१८७)
ग०—पृश्निपर्णी (चि० ३।१८७, २२४)
यो०—कण्टकारी (चि० ३।१८७, २२४)

ध्यामकम्

जे०—ध्या (श्या) मकं कत्तृणानुकरितृणम् । (चि० २५।११७)
च०—गन्धतृणम् (सू० ४।१४; चि० २१।१२४)
ग०—गन्धतृणम् (सू० ५।२१; चि २३।५४; २५।११७)
—कतृणम् (चि० ३।२६७)
यो०—गन्धतृणम् (सू० ५।२१; चि० १२।६६)
—कतृणम् (चि० ३।२६७)

नक्तमालः

च०—करञ्जः (सू० ४।१४; चि० २१।१२४)
ग०—करञ्जः (सू० ४।१४)
—नाटाकरञ्जः (वि० ८।१३५, १४३; चि० २१।१२४)
यो०—करञ्जः (सू० ४।१४)
—नाटाकरञ्जः (वि० ८।१३५, १४३; चि० १५।१७९ (पा०)

नखम्

च०—नखी[1] स्वल्पनखी (चि० २८।१५३)
ग०—नखी (सू० ५।२०)

१. इस स्थल पर मूल में 'नख' पाठ है ।

—व्याघ्रनखम् (चि० ६।४२)
—व्याघ्रनखो हिंस्रा (चि० १२।६६)
यो०—नखी (सू० ५।२०)
—व्याघ्रनखम् (चि० ६।४२)
—व्याघ्रनखाः सुगन्धितद्रव्यभेदाश्च (चि० १२।६६)

नतम्

जे०—तगरम (चि० २८।११३)
च०—तगरपादिका, तदभावे शीउलीचोष्पडको गृह्यते (सू० ३।२३)
—तगरम (चि० २३।१८४)
ग०—तगरं तदभावे शीतलीछोष्पड़ः (सू० ३।२३)
—तगरम (सू० ३।२८)
—नतात्तगरपादुकाः (चि० २३।१८४)
यो०—तगरम् (सू० ३।२३, २८; चि० ६।४२)
—तगरपादिकम् (चि० ९।३५)

नता

च०—प्रियङ्गुः (चि० २५।११६) (कल०)

नदीमाषकः

च०—'उदीमानक' इति ख्यातः (सू० २७।११४)
ग०—वर्द्धमानकः (सू० २७।११४)
यो०—नन्दी तुण्डेरिका, माषकः वास्तुलः, नदीमाषक उन्दीमासवक इति ख्यातः इति चक्रः (सू० २७।११४)

नन्दी (पा०)

यो०—नन्दी तुण्डेरिका (सू० २७।११४)

नन्दीतकः

च०—अम्लस्कन्धे नन्दीतकः कर्परनन्दी (वि० ८।१४०)
यो०—कर्परनन्दी (वि० ८।१४०)

नन्दीमुखी

च०—यविका (सू० २७।२२)
ग०—गोधूमविशेषौ द्वे नान्दीमुखी-मधूलिके (सू० २७।२२)
यो०—मधूली मधूलिका मर्कटहस्ततृणं। तद्भेदः नान्दीमुखी इमौ तृणधान्यभेदौ (सू० २७।२२)

नलदम्

जे०—मांसी (चि० ३।२६७)
च०—मांसी (सू० ३।२५; ४।१४)
ग०—जटामांसी (सू० ३।२५; ४।१४; वि० ८।१३५; चि० २३।७७)
—उशीरं जटामांसीत्यन्ये (वि० ८।१४३)
—उशीरम् (चि० ३।२६७; २१।७७)
यो०—मांसी (सू० ३।२५; ४।१४)
—जटामांसी (वि० ८।१३५)
—उशीरभेदः (वि० ८।१४३)
—लामज्जकम् (चि० ३।२६७)

नलिका

च०—स्वनामख्याता (चि० २८।१५२)

नलिनम्

जे०—रक्तोत्पलम (चि० ३।२५८)
च०—कमलम् (सू० ३।२७)
—पद्मभेदाश्चत्वारः (सू० ४।३४)
—श्वेतमष्टदलपद्मम् (सू० २५।४९)
—नलिनी[1] पद्ममृणालं, नीलिनीतिपाठपक्षे बुद्धा (सू०२७।१०१)
—पद्मभेदः (चि० ३।२५८)
ग०—नलिनानि पद्मकिञ्जल्काः (सू० ३।२७)
—पद्म-नलिन-पुण्डरीक-शतपत्राणि चत्वारि पद्मविशेषणानि (सू० ४।३४)
—स्वल्पदलपद्मम् । तच्चाष्टदलं द्वादशदलञ्चारुणवर्णम् (सू० २५।४९)
—नलिनीका पद्ममृणालम् । नीलिनीकेति पाठे नीली पत्रम् (सू० २७।१०१)
—सहस्रपत्रं पद्मम् (चि० ३।२५८)
यो०—रक्तोत्पलम् (सू० ४।३४)
—··· ईषद्रक्तम् । एतत् क्षुद्रं उत्पलत्रयम् (सू० २५।४९)
—[1]नलिनी पद्मिनी (सू० २७।१०१)
—पद्मोत्पलनलिनानि क्रमात् ईषच्छ्वेतनीलरक्तानि क्षुद्रोत्पलानि (चि० ३।२५८)

नवमालिका

ग०—नवमल्लिका (चि० २६।१८४)

नाकुली

जे०—सर्पवत् सुगन्धा (चि० ३।२६७)
—सर्पसुगन्धा (चि २३।२१२)
च०—चविका (चि० ३।२६७)
—रास्ना (चि० २३।५७, २१२)
—नाकुलीद्वयं रास्नाद्वयम् (चि० ९।४६)

---

१. इस स्थल पर मूल पाठ 'नलिनीका' है।

ग०—रास्नाभेदः घाहया इति लोके (चि० ३।२६७)
—रास्ना (चि० २३।५७)
—नाकुलीद्वयं रास्नाद्वयं रास्ना सुगन्धरास्ना च (चि० ९।४६)
यो०—नाकुलीगन्धनाकुल्यौ रास्नाभेदौ (चि० ३।२६७)
—सर्पगन्धा (चि० ३०।३४)
—नाकुलीद्वयं सर्पाक्षी सर्पगन्धा च (चि० ९।४६)

नागदन्ती

च०—काष्ठपाटला (चि० १०।४२)
—दन्तीभेदः (चि० २३।२४१)
ग०—त्रिधा दन्ती; दीर्घमूला नागदन्ती ह्रस्वमूलात्रिवृद्दन्ती ह्रस्वमूलाक्षुद्रवृत्ता द्रवन्ती (चि० २३।२४१)

नागपुष्पम्

ग०—नागकेशरपुष्पम् (चि० ३।२५८; १४।१६१)
यो०—नागकेशरपुष्पम् (चि० ४।६७)

नागपुष्पा (पा०)

यो०—नागदमनी (चि० ३।२५८)

नागबला

ग०—गोरक्षतण्डुला (चि० ११।५८ (२); १।४।६; ११।३३, ९१)
—गोरक्षतण्डुलानामकवृक्षः (चि० (१।२।११)
यो०—गोरक्षतण्डुला (चि० ११।९१)

नागरम्

च०—मुस्तं; यदुक्तं जतूकर्णे—'रक्तातिसारेऽजाक्षीरजले घनजलोत्पलैः' इति (ब०)। 'रक्तातिसारेऽजाक्षीरकौष्ट्रीघनजलोत्पलैः' इति (कल०) (सू० २।२१)
—शुण्ठी (चि० ३।१४५, १८०)
ग०—शुण्ठी (सू० ४।११; चि० ३।१४५, १८०, २३६; ५।९१)
यो०—शुण्ठी (सू० २।५, १८, २४; ४।११, १२, २९ इत्यादि)
—मुस्तं न तु शुण्ठी ··· तथा च जतूकर्णः-रक्तातिसारेऽजाक्षीरकौष्ट्रीघनजलोत्पलैः। इति (सू० २।२१)
—नागरकं मुस्तम् (चि० १८।४९)

नागरङ्गम्

ग०—नागरङ्गफलं कमलालिम्पाकम् (सू० २७।१५६)

नाडी

च०—नाडीचः (सू० २७।९७)
ग०—नाडीशाकं डाँढा इति लोके (सू० २७।९७)
—कूष्माण्डनालादिका (च० २३।१७०)
यो०—नाडीचः तिक्तपट्टशाकः (सू० २७।९७)

नान्दीमुखम्

च०—नान्दीमुखानि च फलानि नान्दीमुखश्राद्धाय हितानि फलानि; किंवा नान्दी मुरजः, तन्मुखाकृतीति फलानि खर्जूरादीनि (शा० ८।३५)
ग०—नान्दीमुखानि मांगल्यसूचकफलानि केचित् नान्दीमुखो मृदङ्गस्तदाकारफलानि (शा० ८।३५)

नालिका

च०—गोनाडीचः (सू० २७।१०१)
ग०—गोलाड्चिः (सू० २७।१०१)
यो०—गोनाडी, दीर्घनालकलम्बीभेदो वा (सू० २७।१०१)

निकुचः

ग०—डहुः (सू० २५।३९; २६।८४)
यो०—लकुचं डहुफलम् (सू० २५।३९)
—लकुचं उहुफलम् (सू० २७।१३२)
—लकुचं डहुः (सू० २६।८४)

निकुम्भः

च०—दन्ती (सू० ३।५; सि० ११।३२)
—तयोः पर्यायानाह—दन्तीत्यादि (क० १२।३)
ग०—दन्तीः (सू० ३।५; चि० २६।६०; सि० ११।३३)
—पर्यायैर्दन्तीनामौषधिरुच्यते (क० १२।३)
यो०—दन्ती (सू० ३।५)

निकोचकः

च०—आरुकनिकोचकाचोडा औत्तरापथिकाः (सू० १३।१०)
—वातामादयं औत्तरापथिकाः (सू० २७।१५७)
—भव्यादय औत्तरापथिकाः (चि० २९।६५)
ग०—निकोठकः क्षुद्र आक्षोडः (सू० १३।१०)
—पर्वतीयाखरोटस्य फलम् (सू० २७।१५७)
—भव्यादिकं देशविशेषे स्वनामप्रसिद्धम् (चि० २९।६५)
यो०—अभिषुकनिकोठकाक्षोटकाः औत्तरापथिकभेदाः (सू० १३।१०)
—वातामाभिषुकाक्षोडमुकूलकनिकोचकोरुमालानि उत्तरापथ जातानि फलानि; तत्रैव प्रसिद्धानि (सू० २७।१५७)

निचुलः

जे०—वञ्जुलः (चि० २५।११७)
च०—हिज्जलमिति प्रसिद्धम् (सू० २।१०)
—हिज्जलः (चि० १०।२०)

ग०—निचुलानि हिज्जलफलानि (सू० २।१०)
—ह (हि ?) जलः (वि० ८।१३५ (पा०)
यो०—वेतसो हिज्जलो वा (सू० २।१०)
—वेतसः (चि ७।९८)
—निचुलानि निचुलो जलवेतसः तस्य फलानि (चि० १०।२०; १२।५३)
—[1]जलवेतसम् (चि० १३।१३७)

निदिग्धिका

च०—द्वे निदिग्धिके इति वचनेन बृहती क्षुद्रा च ग्राह्या (ब०) निदिग्धिके इति वचनेन बृहतीलता बृहतिका ग्राह्या (कल०) (चि० ११।३५)
ग०—कण्टकारी (चि० १।१।४२; १६।८९)
—द्वे निदिग्धिके बृहतीकण्टकार्यौ (चि० ११।३५)
यो०—कण्टकारिका (सू० २।११; चि० १।१।४२; ८।११४; १४।११८, २३७ इत्यादि)
—निदिग्ध्याः निदिग्धिकायाः कण्टकार्याः (सू० १६।८९)
—निदिग्धिका कण्टकारी (चि० ३।२२०)
—द्वे निदिग्धिके कण्टकारी गोक्षुरं च (चि० ११।३५)
—गोक्षुरकम् (चि० १२।३४, ४१)
—कण्टकारी (चि० १५।१७१ (पा०); १८।८८ (पा०)
—निदिग्धी निदिग्धिका कण्टकारी (चि० १८।५४ (पा०)

निम्बः

यो०—निम्बपर्पटकौ प्रसिद्धौ (सू० २७।९७)
—निम्बं निम्बवृक्षत्वचम् (चि० ३।२०४)
—निम्बः निम्बवृक्षत्वक् (चि० ३।२०१; ६।३०)
—पटोलनिम्बौ प्रसिद्धौ (चि० ४।३८)

निम्बकोलकः

जे०—निम्ब एव निम्बकोलकः (चि० २५।८४)
च०—निम्बकोलकपत्राणीत्यत्र निम्ब एव मृदुर्निम्बकोलक उच्यते, किंवा कुलकेति पाठः, कुलकः पटोलः (चि० २५।८४)

निर्गुण्डी

च०—सिन्धुवारः (सू० ४।१५)
ग०—सिन्धुवारः (सू० ४।१५)
यो०—सिन्धुवारः (सू० ४।१५)
—सिन्धुवारकः (वि० ७।२१)

१. यहाँ मूल में 'च्छलक' पाठ है किन्तु व्याख्या 'निचुल' की है।

निशा

ग०—द्वे निशे हरिद्रादारुहरिद्रा (चि० ७।१६१)
यो०—हरिद्रा (चि० ६।३१, ४०)
—द्वे निशे हरिद्रे (चि० ७।१६१)

निष्पावः

च०—श्वेतशिम्बी (सू० २४।६)
—वल्लः (सू० २७।३३)
—शिम्बः (वि० १६।७)
ग०—श्वेतशिम्बा (सू० २४।६)
—शिम्बः (सू० २७।३३)
—शिम्बाफलम् (सू० २७।१००)
—शिम्बिः (वि० १६।७)
यो०—श्वेतशिम्बः (सू० २४।६)
—श्वेतशिम्बी (सू० २६।८४)
—राजशिम्बि (सू० २७।३३)
—शिम्बः (सू० २७।१००)
—राजशिम्बिः (नि० २।४)
—शिम्बिः (चि० १६।७; १७।१४)

निस्त्रिंशपत्र (क):

ग०—निस्त्रिंशपत्रकः खड्गपत्रः (क० १।१८)

नीपः

च०—कदम्बकः (सू० २७।१४५; क० १।१४)
ग०—कदम्बः (सू० ४।२३; वि० ८।१३५; [1]क० २।८-११)
—नीपं पक्वं कदम्बफलम् (सू० २७।१४५)
यो०—कदम्बः (सू० ४।२३; वि० ८।१३५)
—नीपं कदम्बफलम् (सू० २७।१४५)
— धूलिकदम्बः (वि० ७।२१)

नीरजः

ग०—अब्जः (चि० २४।४ (पा०).

नीलः

ग०—इह नीलिनीपत्रम् (चि० १९।९)

नीलिका-नीलिनी-नीली

च०—नीलिका [2]नीलबुह्वा (सू० २।९)
—नलिनी पद्ममृणालं, नीलिनीतिपाठपक्षे बुह्वा (सू० २७।१०१)

१. कल्पस्थान १।१४ के सन्दर्भ को इस स्थल पर उद्धृत कर उसी की व्याख्या है।
२. 'नीलवंशा' इति पा०।

—नीलिनी नीलिका, नीलबुह्ना वा (चि० ३।२९९)
—नीलिनी नीलिका (चि० १०।१८) १५
—नीलिनी नीलबुह्ना, 'नीलाञ्जनिका' इत्यन्ये (सि० १०।२६)
—नीलीसारमिति नीलिनीफलसारम् (चि० १८।८७)

ग०—नीलिनी नीली (सू० ३९)
—नीलिनी नीलबुह्ना (वि० ८।१३६)
—नीलिनीं वननीलस्य मूलम् (चि० ३।२९९)
—नीलिनीच्छल्लकमिति नीलिन्याश्छल्लकं वल्कलम् (चि० १३।१३७ (पा०)
—नीली नीलिनीपत्रम् (चि० २६।२७१)

यो०—नीलिनीं नीलपुष्पां श्रीफलिकाम् (सू० ३९)
—नीलिनी नीलबुह्ना (वि० ८।१३६)

नीवारः

च०—उड़िका (सू० २७।१७; चि० २९।५०)
—निवाराः प्रशातिका जलमध्ये प्रायो भवन्ति (कल०) (चि० ४।३६)

ग०—नीवारः··· सर्वे तृणसम्भवाः (सू० २७।१७)
—उड़िधान्यम् (चि० ४।३६)

यो०—······नीवारः उड़िकाधान्यं । तच्च द्विविधं एकं धान्यसदृशविटपं धान्यक्षेत्रजं, अन्यत् महादलकाण्डं सलिलजं, तत्र सलिलजं सलिलवृद्धिमात्रस्तम्बप्ररोहं रक्तशूकं, तदेव प्रशान्तिकेत्युच्यते······एते तृणधान्यविशेषाः (सू० २७।१७)
—उड़िधान्यम् (चि० ४।३६)

न्यग्रोधः

जे०—रक्तफलः प्ररोही वटभेदः प्रसिद्ध एव (चि० ३।२५८)

च०—न्यग्रोधस्तु प्ररोहवान् (चि० ३।२५८)
—न्यग्रोधपादा इति वटप्ररोहाः (चि० २१।७३)
—न्यग्रोधाद्याश्चत्वारः न्यग्रोधोदुम्बराश्वत्थप्लक्षाः (सि० १०।२८)

ग०—वटः (शा० ८।१९)

यो०—वटः (सू० ५।२२; २५।४९; चि० ११।३१; १४।२०३, २२५)
—वटभेदः (चि० ३।२५८)

न्यग्रोधी

च०—तयोः पर्यायानाह—दन्तीत्यादि (क० १२।३)

ग०—पर्यायैर्दन्तीनामौषधिरुच्यते (क० १२।३)

पक्तसुरा

च०—गोरक्षकर्कटी (चि० ७।१२३)

पञ्चाङ्गुलः

च०—एरण्डभेदः (सू० १४।४२)
—चित्रैरण्डः (सू० २७।१०९)

ग०—क्षुद्ररण्डः (सू० २७।१०९)

यो०—पञ्चाङ्गुलारुबूकौ श्वेतरक्तैरण्डौ (सू० १४।४२)
—चित्रैरण्डः (सू० २७।१०९)

पटोलः (ली)

ग०—दीर्घपटोलम् (वि० ८।१४१)
—पटोली तिक्तपटोलम् (चि० ७।१२८ (पा०)

यो०—प्रसिद्धम् (सू० २७।९६)
—पटोलनिम्बौ प्रसिद्धौ (चि० ४।३८)
—पटोली पटोलम् (चि० ७।१२८ (पा०)

पत्तङ्गम्

च०—रक्तचन्दनम् (चि० २६।२१०)

पत्तूरः

जे०—सारिवा (चि० ३।२६७)

च०—शालिञ्चः (सू० २७।१००)
—शालिञ्चिका (चि० २६।४६)

ग०—शालिञ्चः (सू० २७।१००; चि० २६।४६)
—पत्तूरा वकम् इति लोके (चि० ३।२६७)

यो०—शालिञ्च (सू० २७।१००)
—शालिञ्चशाकः (चि० ३।२६७)

पत्र(क)म्

जे०—पत्रं तमालपत्रम् (चि० ३।२६७)

ग०—तेजपत्रम् (सू० ३।२९; ५।२१, चि० ३।२६७; ७।१३०; १२।६५ इत्यादि)

यो०—तेजपत्रम् (सू० ३२९; ५२१, ६३; चि० १।१।६९; ५।१५७ इत्यादि)
—तालीशपत्रम् (चि० ३।२६७)
—पत्रकं पत्रं तेजपत्रम् (चि० १५।१६५)

पथ्या

च०—हरीतकी (चि० ५।१२२)
—पथ्यावृन्तार्धशतं हरीतकीफलबन्धनार्धशतम्; अन्ये पथ्यावृन्तचूर्णं हरीतकीफलस्यैव चूर्णं तदस्थिशून्यमित्याहुः (चि० १६।५०)

ग०—हरीतकी (चि० ५।१२२)
यो०—हरीतकी (चि० ४।६५; ५।१०५, १२२; ८।१००; १०।३४; १६।५० इत्यादि)

पद्मम्

च०—पद्मभेदाश्चत्वारः (सू० ४।३४)
—सरक्तमष्टदलपद्मम् (सू० २५।४९)
ग०—पद्म-नलिन-पुण्डरीक-शतपत्राणि चत्वारि पद्मविशेषाणि (सू० ४।३४)
—अरविन्दं कमलम् (सू० २५।४९)
—प्रसिद्धम् (चि० ३।२५८)
—पद्मकिञ्जल्कम् (चि० ३।३१)
—पद्म…श्वेतपद्मम् (चि० १४।२१८)
—पुष्पम् (चि० २९।११०)
यो०—श्वेतोत्पलम् (सू० ४।३४)
—ईषच्छ्वेतम्;…एतत् क्षुद्रं त्रत्पलत्रयम् (सू० २५।४९)
—पद्मोत्पलनलिनानि क्रमात् ईषच्छ्वेतनीलरक्तानि क्षुद्रोत्पलानि (चि० ३।२५८)
—पद्मोत्पले ईषच्छ्वेतनीले क्षुद्रोत्पले (चि० ३।२६०)
—ईषच्छ्वेतम् (चि० ६।३१)
—श्वेतं उत्पलम् (चि० १४।२१८)

पद्मकः

च०—पद्मकाष्ठम् (सू० ५।२१)
ग०—पद्मकाष्ठम् (सू० ३।२४; ४।८; ५।२१; वि० ८।१४४; चि० ३।२५ इत्यादि)
—महापद्मतैलादनन्तरमिदं खुड्डाकपद्मसंज्ञत्वादिह पद्मकशब्देन पद्मपुष्पमेव न तु पद्मकाष्ठं महापद्मे प्रथमं पद्मशब्दोपादानात् पद्मसंज्ञा कृता तत इह पद्मशब्देनैवेति सामान्ये सती खुड्डाकविशेषणं न तु पद्मकशब्देन पद्मकाष्ठग्रहणे संज्ञाहेतु पद्मसामान्यं भवति, खुड्डाकविशेषणञ्चानर्थकं स्यात् न च मध्ये निर्दिष्टेन पद्मशब्देन संज्ञाकरणव्यवहार आचार्याणामिति पद्मपुष्पोशीरादीनाम् (चि० २९।११४)
यो०—पद्मकाष्ठम् (सू० ३।२४, २७; ४।८, ४७; ५।२१; वि० ८।१४४; चि० ३।२५८ इत्यादि)

पद्मचारटी

ग०—कुष्माण्ड लता (चि० २३।५५)

पद्मा

जे०—पद्मप्रचारिणी (चि० ३।२५८)
च०—ब्राह्मणयष्टिका (सू० ४।३१)
ग०—ब्राह्मणयष्टी (सू० ४।३१)
—पद्मचारिणी ब्राह्मणयष्टी (वि० ८।१४४)
—पद्माकारा पद्मवद्रक्तवर्णा पद्मगन्धा च (चि० १।४।७)
—भार्गी (चि० ३।२५८)
यो०—ब्राह्मणयष्टिका (सू० ४।३१)
—पद्मचारिणीं ब्राह्मणयष्टिः (वि० ८।१४४)
—पद्माकारा पद्मसदृशाकृतिः, पद्मरक्ता पद्मगन्धा, पद्मस्य गन्ध इव गन्धो यस्याः सा (चि० १।४।७)
—भार्गी (चि० ३।२५८)

पद्मोत्तरिका

च०—कुसुम्भः (सू० २६।८४)
ग०—कुसुम्भः (सू० २६।८४)
यो०—कुसुम्भः (सू० २६।८४)

पनसः

ग०—कण्टकिफलम् (सू० २७।१४३)
यो०—वहिःकण्टकः महाफलः काँठाल इति वङ्गेषु प्रसिद्धः (सू० २५।४९)
—वहिःकण्टकमहाफलम् (सू० २६।८४)
—काँठाल इति ख्यातम् (सू० २७।१४३)

पयस्या

जे०—अर्कपुष्पी (चि० २।१।२५, ३।२५८)
च०—विदारीकन्दः (सू० ४।२)
—पयस्येह क्षीरविदारी काकोली वा (ब०)। पयस्येह विदारिकन्दो क्षीरकाकोली वा (कल०) (सू० ४।७
—पयस्येह क्षीरकाकोली विदारिकन्दो वा (कल०) (सू० ४।८)
—क्षीरविदारी (चि० २।१।२५;)
—क्षीरविदारी (ब०)। विदारिगन्धा (कल०) (चि० १।१।३७)
—क्षीरकाकोली (चि० ८।७९)
—अर्कपुष्पी (चि० २९।९२; ३०।५०; क० ७।१९)
ग०—श्वेतविदारिकन्दः (सू० ४।२)
—विदारी (सू० ४।७)
—विदारीकन्दः (सू० ४।८, ३२)
—अर्कपुष्पी (वि० ८।१३९ (पा०)
—क्षीरकाकोली (चि० १।४।६, १५; २।१।२५; २।२।८; ४।१०२ इत्यादि)

—क्षीरकाकोली क्षीरविदारी वा (चि० ३।२५८)
—पयस्यामिह क्षीरविदारीम् (चि० ११।३७)
—क्षीरविदारी (चि० २७।४१; ३०।५०, ८९)
—क्षीरशुक्ला क्षीरविदारी, पयस्या तदितरविदारी, भूमिकूष्माण्डद्वयमिति यावत् (क० ७।१९)

यो०—विदारीकन्दः (सू० ४।२, ३२)
— विदारीकन्दः क्षीरकाकोली वा (सू० ४।७)
—क्षीरकाकोली विदारीकन्दो वा (सू० ४।८)
—विदारीभेदः (वि० ८।१३९ (पा०)
—क्षीरकाकोली (चि० १।४।६, १५; २।१।२५; २।२।१८; २।३।८ इत्यादि)
—विदारीकन्दाम् (चि० ११।३७)

परिपेलवम्

च०—कैवर्तमुस्तकम् (वि० ८।१४४; क० १।२३)
ग०—कैवर्त्तमुस्तकः (वि० ८।१४४; क० १।२३)
यो०—कैवर्तमुस्तकम् (वि० ८।१४४)

परिव्याधः

च०—वेतसभेदः (शा० ८।२९)
ग०—जलवेतसः (शा० ८।२९)

परूषकम्

च०—परूषकं चेह मधुरपरूषकं ज्ञेयम् (सू० २७।१२८)
ग०—स्वनामख्यातम् (सू० ४।२४)
—द्विविधं परूषकं'''मधुराम्लभेदात् (सू० २७।१३२)
—परसफलेति लोके (चि० ३।१५५-१५६ (पा०)
—परूषकं परूषफलम् (चि० ३।२०६)

यो०—परूषकं मृदुफलम् (सू० ४।२४)
—परूषकः अल्पास्थिः मृदुफलः (सू० २७।१२८)
—परूषकं परूषकफलम् (चि० ६।३६)

पर्कटकी(पा०)

ग०—पर्कटकीफलं पर्कटस्य पक्वं फलम् (सू०२७।१६२ (पा०)
यो०—पर्कटकीफलं पर्पटकस्य फलम् (सू० २७।१६२ (पा०)

पर्णासः

च०—सुमुखादयः फणिज्झककान्ताः पर्णासभेदाः (नि० २।४)
—सुमुखादयः पर्णासभेदाः (वि० ८।१५१; चि० ३।२६७)
ग०—क्षुद्रपर्णासः (वि० ८।१४२)
—कृष्णपर्णासः (चि० ३।२६७)
यो०—सुरसकुठेरककालमालकपर्णासफणिज्झकाः तुलसी-भेदाः (चि० ३।२६७)

पर्पट(क):

ग०—पार्पटकञ्च शाकं क्षेत्रपर्पटीपत्रम् (सू० २७।९७)
यो०—पर्पटकः स्वनामख्यातः (सू० ४।२९)
—निम्बपर्पटकौ प्रसिद्धौ (सू० २७।९७)

पर्वणी

च०—पर्वशाकम् (सू० २७।१०८)
ग०—पर्वशाकम् (सू० २७।१०८)
यो०—पर्वशाकम् (सू० २७।१०८)

पर्वपुष्पी

च०—कुक्कुटी (सू० २७।१०८)
ग०—कुक्कुटी पथ्यशाकं पत्रम् (सू० २७।१०८)
यो०—पर्वपुष्पी कुक्कुमा (सू० २७।१०८)

पलङ्कषा

च०—गुग्गुलुः जटामांसी वा (सू० ४।४८)
—गुग्गुलुः (चि० ८।७८; ९।४६)
ग०—गुग्गुलुर्गोक्षुरको वा (सू० ४।४८)
—साधारणगुग्गुलुः (शा० ८।६१)
—गोक्षुरकः (चि० ९।४६)
—गोक्षुरा (चि० १०।२७, ३४)

यो०—गुग्गुलुः क्षुद्रगोक्षुरको वा (सू० ४।४८)
—गुग्गुलुः (चि० ३।३०७; ८।७८; १०।२७, ३४)
—लाक्षा (चि० ४।४६)

पलाण्डुः

ग०—स च द्विविधः पलाण्डुः क्षीरपलाण्डुः (सू० २७।१७५)
—पलाण्डुर्नाम कन्दविशेषः (चि० १४।२०८)

पलाशः-पलाशा

जे०—पलाशः शटीपलाशः (चि० २८।१५२)
च०—पलाशः शटी (कल०) (चि० १२।६५)
—पलाशा शटी (सि० ३।३८)
ग०—पलाशः शटी (चि० १२।६५)
—पलाशं शटीमूलम् (चि० १५।१४२)
यो०—तमालपत्रम् (सू० २।१३)

वाकलम्

च०—कुष्ठम् (चि० ७।१६१; २३।१९६)
ग०—कुष्ठम् (चि० ७।१६१; २३।१९६)
यो०—कुष्ठम् (चि० ७।१६१)

पाटलः

च०—व्रीहिविशेषः (सू० २७।१५)
ग०—पाटलवर्णो व्रीहिः (सू० २७।१५)
यो०—पाटलाकुसुमवर्णको व्रीहिरुच्यते (इति भावप्रकाश) (सू० २७।१५)

पाटला

ग०—पाटलिमूलम् (वि० ८।१३५)
यो०—स्वनामख्याता (सू० २।११)
—स्वनामप्रसिद्धा (वि० ८।१३५)

पाठा

च०—'द्वे पाठे' इत्यनेन स्वल्पपत्रां द्वितीयां पाठां ग्राहयन्ति (चि० १८।३९)
—पाठेत्यादौ अम्बष्ठा पाठाभेदः; अन्ये तु पाठाभागद्वय-ग्रहणार्थं पुनः 'अम्बष्ठा' इति पदं वर्णयन्ति । उक्तं हि "घृते तैले च योगे च यद्द्रव्यं पुनरुच्यते । भागतो द्विगुणं तद्धि ग्रहणीयं मनीषिभिः" इति (चि० ३०।९०-९१)

ग०—आकनिधिः (सू० २७।८८)
—आकनादिः (वि० ८।१३५)
—अम्बष्ठा (वि० ८।१४३)
—द्वे पाठे पाठाद्वयं क्षुद्रवृहद्भेदात (चि० १८।३९)
—पाठा चाम्बष्ठा चेति द्विरुक्तत्वाद् भागद्वयम (चि० ३०।९०-९१)

यो०—अम्बष्ठा (सू० ४।१८, ३९; २७।८८; वि० ८।१३५)
—द्वे पाठे, द्वितीया स्वल्पपत्रा (चि० १८।३९)

पापचेलिकम्

च०—पापचेलिकं पाठाशाकम् (चि० ३।१८९)
ग०—पापचेलिमं कारकेल्वकम् (कारवेल्लकम् ?) (चि० ३।१८९)
यो०—पापचेलिकं पाठाशाकम् (चि० ३।१८९)

पारावतः

च०—कामरूपप्रसिद्धः (सू० २७।१३४)
ग०—जम्बीरविशेषः (सू० २६।८४)
—कामरूपे प्रसिद्धम्; तदपि द्विविधं मधुरं शीतमम्ल-मुष्णम (सू० २७।१३४)
यो०—कामरूपे प्रसिद्धं फलं पाककाले धवललोहितं मधुराम्लं च (सू० २६।८४)
—पारावतं फलं कामरूपे प्रसिद्धं फलं पाककाले धवललोहितं च मधुराम्लं च (सू० २७।१३४)

पारावतपदी

च०—ज्योतिष्मती (क० १।२३)

पारावताङ्घ्रिः

ग०—लतापुटकी (क० १।२३ (पा०)

पालङ्क्या

ग०—ख्यातो लोके (सू० २७।१००)
यो०—पालक इति ख्यातः शाकः (सू० २७।१००)

पालिन्दी

च०—श्यामलता (सू० ४।१६)
ग०—श्यामालता (सू० ४।१६)
यो०—श्यामलता (सू० ४।१६)

पाषाणभेदः

ग०—पाथरचुनीति लोके (सू० ४।३५)
—चाङ्गेरी अश्मान्तको वा; कश्चित् तु प्रस्तरचूर इत्याह (चि० २६।६०)

पिचुः

ग०—तूलकपत्री (चि० ३०।७५)

पिचुमर्दः

च०—निम्बः (चि० २७।५०)
ग०—निम्बः (वि० ८।१३५)
—निम्बपत्रम् (चि० ३।२५२)
—निम्बत्वक् (चि० ७।४६)
यो०—निम्बः (वि० ८।१३५; चि० ३।२५२; ७।१३१, १४४)
—निम्बः, तयोः पत्रम् (चि० ७।४६)

पिण्डफला

च०—लम्बेत्यादि पर्यायकथनम् (क० ३।३)
ग०—लम्बा…पिण्डफला…पर्यायैरिक्ष्वाकुः प्रोच्यते (क० ३।३)

पिण्डालुः

ग०—पिण्डाकारालुकः (सू० २४।६)
—पिण्डाकारः कन्दः (सू० २७।१२३)
—वर्तुलाकार आलुः (चि० १४।९)
यो०—वर्तुलाकारालुभेदः (चि० १४।९)

पिण्डीत(क):

जे०—पिण्डीतं मदनकमित्यपरे (चि० ३।२५८)
च०—पिण्डीतकैरिति मदनैः (चि० २०।३४)
—मदनः (सि० ३।६२; १०।३०)
ग०—मदनफलः (चि० २०।३४; सि० ३।६२)
यो०—मदनफलः (चि० २०।३४)

पिण्याकः

च०—तिलखलिः, किंवा पिण्याकशाकम् (सू० २२।२९)
—पिण्याकशाकम्-पिण्याकः तिलकल्कः; निघण्टुकारस्त्वाह-पिण्याको हरितशिग्रुः (सू० २७।४)
ग०—निःस्नेहतिलखलि, किंवा पिण्याकशाकविशेषः (सू० २२।२९)
यो०—तिलखलिः (सू० २२।२९)
—उमासर्षपादीनां यन्त्रादिपीडितानां निःस्नेहः कल्कः, हरितशिग्रुः इति केचित् (सू० २७।४)

पिप्पली (कम्)

च०—पिप्पलीकं पिप्पली (चि० ८।९७)
—समूलां पिप्पलीमिति पिप्पलीं पिप्पलीमूलं च (चि० १५।१६८)
ग०—पिप्पलीशब्दो बीजवाची, न तु ऊषणावाची अत्र बोध्या (वि० ७।१७)
—मगधोद्भवा (चि० ११।२४)
—मदनफलपिप्पलीः (क० १।१६ (पा०)
—पिप्पलीकं पिप्पली (चि० १२।६२; सि० ३।५८)
यो०—पिप्पलि इति ह्रस्वश्छान्दसः (चि० १५।१६३)
—पिप्पली हस्तिपिप्पली च पिप्पलीद्वयम् (चि० १४।७२)
—पिप्पलीकं पिप्पली (चि० ११।२८; १२।६२)

पिप्पलीमूलम्

च०—समूलां पिप्पलीमिति पिप्पलीं पिप्पलीमूलं च (चि० १५।१६८)
ग०—समूलां पिप्पलीं पिप्पलीं पिप्पलीमूलञ्च (चि० १५।१६८, १७३)
यो०——समूलां पिप्पलीं पिप्पलीमूलं च (चि० १५।१६८)
—समूलां पिप्पलीं पिप्पलीं पिप्पलीमूलं च (चि० १५।१७३)

पीतदारु

ग०—सरलकाष्ठम् (सि० ९।८)

पीतद्रुः

च०—देवदारुः (चि० १०।४३; १२।२५)
—पीतद्रुतैलं च पीतद्रु-सौवीरका[1]दिद्रवेण साध्यमिति ब्रवते (वि० ४।२९)
ग०—दारुहरिद्रा (चि० १०।४३; १२।२५)
—सरलद्रुमः (सि० ४।२९)
यो०—देवदारुः (चि० १०।४३)
—दारुहरिद्रा, देवदारुरिति केचित् (चि० १२।२५)

पीलु

च०—औत्तरापथिकं फलम् (सू० २।४; क० ७।२०)
—औत्तरापथिकम् (सू० २७।१४५)
—औत्तरापथिकं फलं, पीलु स्थाने केचिद् बिल्वं पठन्ति (सि० ७।६३)
ग०—पीलूनि स्वनामख्यातानि कोङ्कणदेशे भूमिजातानि आखरोट् इति लोके, तस्य फलानि (सू० २।४)
—पीलूनीति पीलुफलम् (सू० २।१०)
—पीलूनि काञ्चनदेशीयपर्वतजाखोडफलानि (सू० ३।४)
—उत्तरापथिकं गुडफलम् (सू० २५।४९)
—पीलुफलम् गुडफलम् (सू० २७।१४५)
यो०—औत्तरापथिकं फलम् (सू० २।४; ३।४)
—औत्तरापथिकं मधुरफलम् (सू० २५।४९)
—पीलुफलम (सू० २७।१४५)

पीलुकः

जे०—गुग्गुलुकः (चि० ३।२६७)

पीलुपर्णी

जे०—मधुस्रवा, मूर्वेत्यपरे पीलुपर्णिकायाः भेदः। तस्याः जातिद्वयं स्निग्धपत्रा, धूसरपत्रा च। (चि० ३।२६७)
—मोरटः (चि० ३०।५०)
च०—मोरटकः (सू० २७।१०२)
—मोरटा, मूर्वेत्यन्ये (चि० ३।२६७)
—मोरटः, रास्नाभेद इत्यन्ये (चि० २७।४१)
—मुद्गपीलुमाषाख्यपर्णिभिः-मुद्गपीलुमाषाख्यैः पर्णीशब्दः प्रत्येकमभिसंबध्यते; तत्र पीलुपर्णी मोरटा, केचिन्मूर्वामाहुः (चि० ३०।५०)
ग —नोव (मोर ?) टकः (सू० २७।१०२)
—मूर्वा (चि० २७।४१)
यो०—मोरटकः (सू० २७।१०२)

---

१. 'पीतद्रव्यसौवीरकादिद्रवेण' इति पा०।

—मूर्वा (चि० ३।२६७)

पुण्डरीकम्

जे०—श्वेतपद्मम् (चि० ३।२५८)

च०—श्वेतशतपत्रपद्मम् (सू० २५।४९)

—पुण्डरीकपलाशशब्देन पद्मपुष्पदलमिह (नि० ५।८।५)

ग०—पद्म-नलिन-पुण्डरीक-शतपत्राणि चत्वारि पद्मविशेषाणि (सू० ४।३४)

—श्वेतपद्मम् (सू० २५।४९; चि० ३।२५८)

यो०—श्वेतपद्मम् (सू० ४।३४; २५।४९; चि० ३।२५८)

—पुण्डरीकदलोपमम्-पुण्डरीकं श्वेतपद्मं। तस्य दलं पत्रं श्वेतरक्तम् (चि० ७।१८)

—कमलमिव (चि० १५।१३८)

पुण्डरीक (विष)

च०—[1]एतेषां च संज्ञासंबन्धे शबरकिरातादय एव तद्विदाः प्रमाणं, ते हि गुरुपरंपरया व्याख्यानयन्ति (चि० २३।१२)

ग०—मुस्तकादि कन्दविषाणि (चि० २३।१२)

पु(पौ)ण्ड्रकः

ग०—श्वेतेक्षुः (सू० २५।४९)

—पौण्ड्रकादिजातिविशेषेण परिगृहीतः (सू० २७।२३८)

यो०—इक्षुभेदः (सू० २५।४९)

—पौण्ड्रकवंशौ इक्षुभेदौ (सू० २७।२३८)

पुनर्नवा

ग०—रक्तपुनर्नवा (सू० ४।२२; वि० ८।१३५, १३९)

—रक्ता (वि० ८।१३६)

—श्वेतपुनर्नवा (चि० ११।४३; १।२।४)

—पुनर्नवा रक्ता श्वेता तु वर्षाभूः (चि० १।४।६)

—द्वे पुनर्नवे श्वेतरक्ते (चि० ११।३६)

यो०—रक्तपुनर्नवा (सू० ४।१२)

—रक्तवर्षाभूः (सू० ४।२६, ३६)

—रक्ता (वि० ८।१३६)

—पुनर्नवा रक्ता (चि० १८।१२७)

—पुनर्नवां वर्षाभूं च श्वेतरक्तपुनर्नवाद्वयम् (चि० १३।१०९-११० (पा०)

—द्वे पुनर्नवे श्वेतपुनर्नवां रक्तपुनर्नवां च (चि० ११।३६; १२।३४)

१. 'मुस्तकादीनां' इति पा०

पुरः

ग०—गुग्गुलुः (चि० ३।२६७)

यो०—गुग्गुलु (चि० २।२६७)

पुलाकम्

च०—तुच्छधान्यम् (सू० १४।४२; चि० १४।४०; २३।१७०)

ग०—तुच्छधान्यं तण्डुलहीनं चिप्पटरूपम् (सू० १४।४२)

—अजाततण्डुलधान्यानाम् (चि० १४।४०)

—तुच्छधान्यम (चि० २२।१७; ३०।१७०)

यो०—तुच्छधान्यम् (सू० १४।४२)

—अजाततंडुलधान्यानाम् (चि० १४।४०)

[1]पुलासः (पा०)

जे०—उत्तरापथे प्रसिद्ध एव (चि० ३०।८३)

पु(पौ)ष्करम्–पुष्करमूलम्

च०—पुष्कराख्यं पुष्करमूलम् (चि० ८।१०१)

—पौष्करं पुष्करपत्ररूपं शाकम् (सू० २६।८४)

ग०—पुष्करं वृक्षविशेषस्तस्य मूलं न तु कुष्ठम् (सू० २५।४०)

—पुष्करबीजं पद्मबीजम् (सू० २६।८४; शा० ८।२४; चि० ३।२५८)

—पौष्करं बीजं पद्मबीजम् (सू० २७।११९)

—पुष्करसहस्रपत्रा पद्मसहस्रपत्रा (चि० १।४।७)

—पौष्करं पुष्करमूलं तदभावे कुष्ठम् (चि० ३।२१३)

—(पौष्करेषु)-पुष्करं वृक्षविशेषस्तस्य दलेषु (चि० ३।२६०)

—पुष्करं स्वनामख्यातं तस्य मूलं, तदभावे कुष्ठम् (चि० २।२६७)

—पौष्करमूलं पुष्करो नाम वृक्षविशेषस्तस्य मूलं तदभावे कुष्ठम् (चि० १३।१२७)

—पुष्करस्य पद्मस्य (चि० १४।२१८)

—पुष्कराह्वं पुष्करम् (चि० १७।१०४; २६।८४)

—पुष्करं स्वनामख्यातवृक्षविशेषस्तस्य मूलं तदभावे कुष्ठमपि द्विवारं ग्राह्यम् (चि० २६।२२)

—पुष्करं पद्मपुष्पम् (चि० २६।२७२)

यो०—पुष्करमूलं काश्मीरः कन्दभेदः (सू० ४।३०, ३७)

—पौष्करं बीजं पुष्करबीजम् (सू० २७।११९)

—पुष्करबीजं पद्मबीजम् (वि० ८।१३९; चि० ३।२५८)

—पुष्करबीजं पुष्करस्य पद्मस्य बीजम् (वि० ८।१४४)

—पौष्करं पुष्करमूलम् (चि० ३।२१३; १०।१९;१७।१०२)

१. यह शब्द ब. और कल० में नहीं है।

पूगम्

ग०—गुवाकस्य फलानि (सू० ५।७७)
यो०—गुवाकः (सू० ५।७७)

पूतना

च०—हरीतकी (चि० ९।४५)
ग०—हरीतकी (चि० ९।४५; १०।३४, ३९)
यो०—हरीतकी (चि० ९।४५; १०।३९)

पूतनाकेशी

च०—पूतनापूर्वा या केशी पूतनाकेशी गोलोमीत्यर्थः। तथा हि जतूकर्णे पूतनाकेशीत्यत्र गोलोमी पठ्यते (चि० १०।३४)
यो०—सुगन्धिजटामांसी (चि० १०।३४)
—पूतनाकेशि-पूतना हरीतकी । केशी जटामांसी। पूतनाकेशी सुगन्धिजटामांसी वा। केशिः केशी। ह्रस्वश्छान्दसः (चि० १०।३९)

पूतीकः

च०—कण्टकी करञ्जः (सू० १।११६)
—शम्पाकपूतीककरञ्जयोश्चेत्यत्र पूतीकशब्दः करञ्जविशेषणम्। तथाहि जतूकर्णः—"आरग्वधपूतिकपुनर्नवास्थिराद्यैर्घृतं सिद्धम्" इत्यादि (चि० २६।२३)
ग०—करञ्जः (सू० १।११६)
—नाटाकरञ्ज (चि० ७।१२३)
यो०—चिरबिल्वः (सू० १।११६)
—पूतिकं करंजभेदः (चि० ७।१२३)

पूति(क)करञ्जः

च०—शम्पाकपूतीककरञ्जयोश्चेत्यत्र पूतीकशब्दः करञ्जविशेषणम्। तथा हि जतूकर्णः-"आरग्वधपूतिकपुनर्नवास्थिराद्यैर्घृतं सिद्धम्" इत्यादि (चि० २६।२३)

पृथक्पर्णी

ग०—पृश्निपर्णी (चि० १८।७७)
यो०—पृश्निपर्णी (चि० ११।४४; १८।७७)

पृथ्वीका

जे०—हिङ्गुपत्रिका (चि० ३।२६७)
च०—कृष्णजीरकम् (सू० ५।२०)
ग०—सूक्ष्मैला (सू० २।४; वि० ८।१३५; चि० ३।२६७)
—कृष्णजीरकम् (सू० ५।२०)
यो०—स्थूलैलां हिङ्गुपत्रीं वा (सू० २।४)
—कृष्णजीरकम् (सू० ५।२०)
—सूक्ष्मैला (वि० ८।१३५; चि० ३।२६७; ७।१२२)
—स्थूलैला (वि० ८।१५१)
—हिङ्गुपत्री (चि० ५।७१)

पृश्निपर्णी

च०—वर्तुलपत्रा सिंहपुच्छी (सू० २।२०)
ग०—पृथक्पर्णी (सू० ४।५)

पोट (गल)ः

च०—पोटगलो होगलः (वि० ८।१३५; सि० १०।१३)
—पोटा इक्षुगन्धा (क० १।२५)
ग०—पोटगलो होगलः (वि० ८।१३५)
—पोटः पोटगलो नल इति प्रसिद्धः (क० १।२५)
यो०—पोटगलः होगलः (वि० ८।१३५)

प्रकीर्या

च०—प्रकीर्योदकीर्ये करञ्जद्वयम् (सू० १।८२)
—करञ्जः (सि० १०।२६)
ग —प्रकीर्या चोदकीर्या च करञ्जद्वयम् (सू० १।८२)
—नाटाकरञ्जः (वि० ८।१३६)
यो०—प्रकीर्योदकीर्ये करञ्जद्वयम् (सू० १।८२; वि० ८।१३६)

प्रग्रहः

च०—व्यवहारार्थं पर्यायानाह-आरग्वध इत्यादि (क० ८।३)
ग०—आरग्वध इत्यादयः पर्यायाः (क० ८।३)

प्रतिविषा

यो०—अतिविषा (चि० ७।१४४)

प्रत्यक्पर्णी

च०—मूषिकपर्णी (क० ११।१४)

प्रत्यक्पुष्पा (ष्पी)

च०—प्रत्यक्पुष्पा अपामार्गः (सू० १।८२; ४।२३)
—प्रत्यक्पुष्पी अपामार्गः (क० १।१४)
ग०—प्रत्यक्पुष्पी अपामार्गः (सू० १।८२; ४।२३; वि० ८।१३५; क०[1] १।१४)
— प्रत्यक्पुष्पी अपामार्गबीजम् (सू० २५।४०)
यो —प्रत्यक्पुष्पी अपामार्गः (सू० १।८२)
—प्रत्यक्पुष्पी अपामार्गः (सू० ४।२३; २५।४०; वि० ८।१३५)

---

१. इस स्थल के सन्दर्भ को कल्प० २।८-११ की व्याख्या में उद्धृत कर व्याख्या की गई है।

प्रत्यक्श्रेणी

च०—दन्ती (सू० १।७७)
—तयोः पर्यायानाह-दन्तीत्यादि (क० १२।३)
ग०—मूषिकपर्णी दन्तीभेद एव (सू० १।७७)
—द्रवन्ती (क० ११।१४ (पा०)
—पर्यायैर्दन्तीनामौषधिरुच्यते (क० १२।३)
यो०—दन्ती (सू० १।७७)

प्रपुन्नाडः

च०—एडगजः (सू० ३।१३)
ग०—चाकुन्दा (सू० ३।१३)
—एडगजा (सू० २७।१०१)
यो०—एडगजः (सू० ३।१३; २७।१०१)

प्रपौण्डरीकम्

च०—पुण्डरीकम् (सू० ३।२४)
ग०—पुण्डरीयकाष्ठम् (सू० ३।२४; ५।६४; चि० ३।२५८; ४।६८; ८।८४)
—पुण्डरीककाष्ठम् (चि० ४।७४)
—पौण्डर्यम् (चि० २१।८२)
यो०—पुण्डरीयकम् (सू० ३।२४, २६; ५।६४)
—पुण्डरीककाष्ठम् (चि० ३।२५८; ४।६८, १०२; ७।१३३; ८।८४ इत्यादि)

प्रशातिका

च०—'उडिका' इति प्रसिद्धा (सू० २१।२५)
—प्रशान्तिका-प्रशातिका उडिकैव स्थलजा रक्तशूका (सू० २७।१७)
—प्रशान्तिका जलमध्ये प्रायो भवति (ब०)'।
निवाराः प्रशातिका जलमध्ये प्रायो भवन्ति (कल०) (चि० ४।३६)
ग०—प्रसातिका आडिधान्यमिति लोके प्रसिद्धा (सू० २१।२५)
—कोरदूषः'''प्रशातिका'''सर्वे तृणसम्भवाः (सू० २७।१७)
—प्रसातिका कङ्गुः । द्वे चैव ते धान्ये कुधानाख्ये भवतः (चि० ४।३६)
यो०—प्रसातिका व्रीहिभेदः (सू० २१।२५)
—नीवारः उडिकाधान्यं । तच्च द्विविधं । एकं धान्यसदृशविटपं धान्यक्षेत्रजं । अन्यत् महादलकाण्डं सलिलजं । तत्र सलिलजं सलिलवृद्धिमात्रस्तम्बप्ररोहं रक्तशूकं । तदेव प्रशान्तिकेत्युच्यते'''एते तृणधान्यविशेषाः (सू० २७।१७)
—प्रशान्तिका प्रायो जलमध्ये भवति (चि० ४।३६)

प्राचीनामलकम्

च०—पानीयामलकम् (सू० २७।१४६)
ग०—प्राचीनामलकं पानीयामलकफलम् (सू० २७।१४६)
यो०—प्रागदेशोद्भवं पानीयामलकं इति लोके (सू० २७।१४६)

प्रियकः

ग०—प्रियङ्गुवृक्षः (सू० २५।४९)
यो०—प्रियकाश्वकर्णौ शालभेदौ (सू० २५।४९)

प्रियङ्गुः

जे०—कङ्गुः (चि० ४।३६)
च०—'काङ्गनी' इति प्रसिद्धा (सू० २७।१७)
—कङ्गुः (चि० ४।३६)
ग०—स्वनामख्याता (सू० ५।२०)
—प्रियङ्गुनामधान्यविशेषः (सू० २१।२५)
—प्रियङ्गुवृक्षस्य पुष्पम् (सू० २५।४९)
—'''प्रियङ्गु'''सर्वे तृणसम्भवाः (सू० २७।१७)
—स्वनामा (चि० ८।१३५)
—कुधान्यं स्वनामाख्यम (चि० ४।३६)
—प्रियङ्गव इति पदच्छेदः (चि० २३।७८)
—प्रियङ्गवः प्रियङ्गुर्नाम धान्यविशेषः (चि० २३।२२४)
—प्रियङ्गवो धान्यविशेषाः (चि० ३०।२५७, २६६)
यो०—प्रसिद्धा (सू० ४।३१)
—'''प्रियङ्गु'''एते तृणधान्यविशेषाः (सू० २७।१७)
—कंगुः (चि० ४।३६)
—प्रियङ्गुका फलिनी (चि० ४।७३)

प्रियालः

च०—प्रियालोऽयं मगधप्रसिद्धः (सू० २७।१५८)
ग०—पियालस्य फलं द्विविधं, राजादनं पियालश्च । तत्र राजादनगुणा उक्ताः । पियालस्य वचनमिदम् (सू० २७।१५८)
यो०—पियालः मधुराम्लफलः प्रायशः मगधेषु जायते (सू० २७।१५८)

प्लक्षः

च०—अल्पदीर्घपत्रः पर्कटी (ब०)।
अल्पदीर्घपत्रः (कल०) (चि० २१।८५)

बल्वजः

ग०—छलूयाघासः (शा० ८।४१)
—ऊल्वाकतृणानि (चि० ५।१३८)
यो०—उलपान् (चि० ५।१३८)

बस्तगन्धा

ग०—वस्तगन्धा अजमोदा (चि० ३०।२६० (पा०)

बहुफेनरसा

ग०—सप्तला चर्मसाह्वा बहुफेनरसा चेति पर्यायैरुच्यते (क० ११।३)

बहुला

ग०—एला (चि० ८।१०३)
यो०—एला (चि० ८।१०३)

बाल(क)म्

ग०—बालं ह्रीवेरम् ([1]सि० ८।३९)

बाह्लीकम्

जे०—कुङ्कुमम् (चि० ३०।९१)
च०—कुङ्कुमम् (चि० ३०।९१)
ग०—बाह्लीकं हिङ्गु, तेन हिङ्गुभागद्वयम् ([2]चि० २३।१०२)
—हिङ्गु (चि० ३०।९१)

बिम्बी

च०—ओष्ठोपमफला (सू० १।७८)
—अष्ठोपमफला (व०)।
औष्ठोपमफला (कल०) (चि० ७।८५)
ग०—ओष्ठोपमफलम् (सू० १।७८; ४।२३; २७।१४५
—बिम्बी बिम्बफलम् ओष्ठोपममिति यावत् (चि० ८।१३५)
—[3]ओष्ठोपमफलम् (क० ३।८–११)
यो०—रक्तफला। तेलाकुचा इति वङ्गभाषायाम् (सू० १।७८)
—रक्तफला (सू० ४।२३)
—ओष्ठोपमफला (सू० २७।१४५, चि० ८।१३५; चि० १४।१०)

---

१. चक्रपाणिदत्त ने 'बाल' को 'उदुम्बर' का विशेषण मानकर 'बालोदुम्बर' की व्याख्या की है।

२. इसी श्लोक में हिङ्गु भी पठित है।

३. इस स्थल पर मूल में बिम्बी पाठ नहीं है। कल्प. १।१४ के सन्दर्भ को उद्धृतकर उसी की व्याख्या यहाँ की गई है।

बिल्वः

च०—बालबिल्वम् (चि० १४।९०)
—बिल्वादिभिः-बिल्वादिरिति बृहत्पञ्चमूलं, किंवा
—"बिल्वमूलत्रिवृद्दारुयवकोलकुलत्थवान्" (सि० अ० ७।११) इत्यनेनोक्तो बिल्वादिर्ज्ञेयः (सि० ९।८)
—बिल्वादीनामिति बिल्वादिपञ्चमूलस्य (क० १०।१०)
—बिल्वाद्यो गणः दशमूलम् (सि० ४।१७)
—बिल्वादीनि दशमूलानि (सि० ४।२७)
—बिल्वादि दशमूलम् (सि० ५।१४)
—बिल्वादिमूलं दशमूलम् (सि० ८।५)
—बिल्वादिभिश्च निरूह इति "बिल्वमूलत्रिवृद्दारुयवकोलकुलत्थवान्" इत्यादिनोक्तः (सि० ७।२६)
ग०—बिल्वं बिल्वशलाटुः (सू० २।२८; चि० ३।१८६; ८।१२६, १२७)
—बिल्वमामबिल्वफलम्। न तु मूलादिकम् (सू० २५।४०)
—बिल्वेत्यादिपञ्चकं बिल्वादिगणं बृहत्पञ्चमूलं विद्यात् (चि० ११।४३)
—बिल्वशलाटुभिः आमबिल्वानाञ्च शुष्काणाम् (चि० ३।२३५)
—बिल्वमध्यं बिल्वफलशस्यम् (चि० १५।१८८; १७।९४)
—बिल्वादि पञ्चमूलम् (चि० २०।२३)
—बिल्वादिभिः पञ्चमूलैः (चि० २६।२३७)
—बिल्वादीनां बिल्वादिपञ्चमूलानाम् (क० १०।१०)
—बिल्वादि बिल्वादिपञ्चमूलम् (सि० ४।३७)
—बिल्वादीनां बिल्वादिपञ्चमूलम् (सि० ७।२६)
—बिल्वादिमूल बिल्वादिपञ्चमूलम् (सि० ८।५)
यो०—बिल्वं बिल्वशलाटुः (सू० २।१८, १९, २७, २८ (पा०); १९।५२)
—बिल्वं आमम् (सू० २५।४०)
—बिल्वाग्निमन्थेत्यादि। एतत् बृहत् पञ्चमूलम् (चि० ११।४३)
—बिल्वपेशिका बिल्वमध्यम (चि० १४।६३)
—बिल्वादिमूलं बृहत्पञ्चमूलम् (चि० २०।२३)

बिल्वपर्णी

च०—बिल्वार्जकम् (सू० २७।१०७)
ग०—बिल्वपर्णी बिल्वार्जकम् (सू० २७।१०७)
यो०—बिल्वार्जकम् (सू० २७।१०७)

बिसम्

च०—बिसं करहाटः (कल०) (वि० ८।१४४)
—मृणालसूत्रम् (चि० ३।२५८)
—बिसं स्थूलम् (चि० १४।९) (ब०)।
—बिसं स्थूलं मृणालम् (कल०) (चि० १४।९)

ग०—बिसानि मृत्तिकाधःस्थितच्छुद्रावरोहवन्मृणालानि (सू० ५।१०)
—बिसं पद्मादीनां क्षुद्रमृणालम् (सू० २७।११६)
—बिसं मृणालम् (चि० ३।२५८; ४।५० (पा०); ११।१८; २६।२४३)
—बिसं बृहन्मृणालम् (चि० १४।९)
—क्षुद्रमृणालं कन्दप्रसूनमात्रं बिसम् (चि० २१।७९)
—बिसग्रन्थिमृ'णालग्रन्थिः (चि० २१।७३)
—बिसस्य ग्रन्थिश्च-बिसस्य मृणालस्य ग्रन्थिः (चि० २६।९४)

यो०—बिसानि मृणालानि (सू० ५।१०)
—बिसं मृणालम् (सू० २७।११६; (चि० ११।४६)
—पद्ममूलम् (वि० ८।१४४)
—बिसं स्थूलं। सूक्ष्मं मृणालमिति द्विविधम् (चि० ३।२५८)
—बिसं स्थूलम् (चि० ४।५०; १४।९)

बीजकः

च०—असनः (चि० १६।१०६)
यो०—असनः (चि० १६।१०६)

बीजपूर(क)म्

ग०—मातुलुङ्गम् (चि० ५।७७; १५।९१)
—मातुलुङ्गफलम् (चि० ५।१६६)
यो०—मातुलुङ्गम् (चि० ५।७७)

बु(बू)कः

जे०—[1]बूक एरण्डः (चि० २८।१७०, चि० ३०।८२)

बृहती

ग०—बृहत्यौ–द्वे बृहत्यौ बृहतीकण्टकार्यौ (चि० ३।२१०)
—बृहत्यौ–बृहतीद्वयम् (चि० ३।२१३)
यो०—बृहत्यौ द्वे–द्वे बृहत्यौ बृहती कण्टकारिका च (सू० २३।१९)
—बृहतीद्वयं बृहती कण्टकारी च (चि० ११।६२)

१. यह शब्द चक्रपाणिदत्त की व्याख्या में उपलब्ध नहीं है।

—बृहत्यौ बृहतीद्वयं बृहती कण्टकारी च (चि०३।२१०)
—बृहत्यौ बृहतीद्वयम् (चि० ३।२१३)
—बृहतद्वयं बृहती कण्टकारी च। तयोः फलानि (चि० १२।२९)
—बृहत्यौ–द्वे बृहत्यौ (चि० १८।७५ (पा०)
—(बृहतीयुग्मैः)—काकोलीबृहतीमेदानां युग्मानि द्रव्याणि बृहतीद्वयं-बृहती कण्टकारी च (चि० १८।९९)
—द्वे बृहत्यौ—बृहत्यौ बृहतीं कण्टकारीं च (चि० १७।१७६)

बृहत्पत्रः

ग०—तिलवको लोध्रो बृहत्पत्रस्तिरीटक इति पर्यायाः (क० ९।३)

बोधिवृक्षः

ग०—अश्वत्थः (चि० २९।१५८)

ब्रह्मसुवर्चला

च०—ब्रह्मसुवर्चलाद्यौषधान्यायुर्वेदसमुत्थानीये वक्ष्यमाणानि (चि० १।१।५८)
—ब्रह्मसुवर्चलाप्रभृतयो यथोक्तलक्षणा दिव्यौषधयो नातिप्रसिद्धाः (चि० १।४।७)

ग०—स्वनामख्याता (चि० १।१।५८)
—सूर्यभक्ता (चि० १।३।२४)
—ब्रह्मसुवर्चला नामौषधिर्या हिरण्यक्षीरा पुष्करसदृशपत्रा—हिरण्यक्षीरा सुवर्णवर्णक्षीरा, पुष्करसदृशपत्रा पद्मपत्रसदृशपत्रा (च० १।४।७)

यो०—आयुर्वेद समुत्थानीये पश्चाद् वक्ष्यमाणलक्षणा (चि० १।१।५८)
—सूर्यभक्ता (चि० १।३।२४)
—ब्रह्मसुवर्चलादीनां दिव्यौषधीनां नातिप्रसिद्धतया तासां विज्ञानार्थमाह-ब्रह्मसुवर्चलेत्यादि। हिरण्यक्षीरा सुवर्णवर्णक्षीरा। पुष्करसदृशपत्रा पद्मपत्रसदृशपत्रा (चि० १।४।७)

ब्राह्मी

ग०—ब्राह्मी नाम शाकविशेषः (सू० ४।४९)
—ब्राह्मणयष्टी (शा० ८।२०)
—शाकविशेषः (चि० १।३।२४)
—शाकविशेषः स्वनामख्याता (चि० १।४।६)
—ब्राह्मीशाकम् (चि० ७।६९)

[redacted]

ग०—यष्टीमधु तच्च स्थलजानूपजभेदेन द्विधा वमनादिप्रतिकर्मविशेषेण (सू० २।७)
—यष्टीमधु (सू० ४।५, २१, २३; ५।२१; वि० ८।१३५ इत्यादि)
—यष्टिमधुकम् (चि० १।२।१५; ३।२४८; ११।२७)
—यष्टीमधुकस्य (चि० २।२।५; १५।७३; १९।६२; क० ७।१७; सि० ७।१३)
—यष्टिमधूनि (चि० ४।६०)
—द्विमधुकम् अनूपजं (जलजं) स्थलजञ्च (चि० २६।२३८)

यो०—मधुयष्टिकाम् (सू० २।७)
—मधुयष्टिम् (सू० ३।२१)
—मधुयष्टी (सू० ३।२२; ४।१४, ३४, ४४, ४६ इत्यादि)
—यष्टीमधुकम् (सू० ४।१; चि० १।१।४९; १।२।१५; ४।१०१)
—यष्टीमधु (सू० ४।५, ८, २१, २३, ३२ (पा०); ५।२१ इत्यादि)
—यष्ठीमधु (सू० ४।२५)
—यष्टिमधु (वि० ८।१३५; चि० १।३।४५; २।१।२७; २।२।५; ५।११५ इत्यादि)
—यष्टिमधुकम् (चि० ८।८५; १९।८७)
—मधूकेन (चि० १९।६२)

मधुकपर्णी (पा०)

च०—मधुकभेदः (वि० ८।१३९)

मधुपर्णी

जे०—आनूपं यष्टीमधु (चि० २९।९२)
च०—विकङ्कतम् (वि० ८।१३९)
—मध्वसनाख्यपर्ण्यौ मधुपर्णी गुडूची, असनपर्णी अपराजिता, 'दारुपर्णी' इत्यपरे (चि० २६।७०)
ग०—गुडूची (सू० ४।५, २१; चि० २९।७२, ९१ (पा०), ११०)
—लतापुटकी गुडूची वा (वि० ८।१४३ (पा०)
यो०—गुडूची (सू० ४।२१)

मधुयष्टिका

ग०—यष्टीमधुकानाम् (चि० ३।२४६)
—यष्टीमधु (चि० २८।१८६)
यो०—यष्टिमधु (चि० ३।२४१)
—यष्टिमधु (चि० १६।१००)

मधुर(क)म्

च०—मधुरकाणि जीवनीयानि जीवकर्षभकादीनि (सू० ५।२६)
ग०—मधुरकं उत्तकाकोल्यादि (शा० ८।२९)
—मधुरं काकोल्याद्यौषधम् (शा० ८।३२)
—मधुरौषधं काकोल्यादि (शा० ८।३२ (२)
—मधुरैर्द्राक्षाखर्जूरादिभिः (चि० १८।१३४)
—मधुराणां काकोल्यादीनाम् (चि० २२।४६)
यो०—मधुरकैः मधुरद्रव्यगणैः जीवकर्षभकादिभिः (चि० १७।१३३)

मधुरसा

जे०—मूर्वा चोरस्नायुः (चि० ३।२५८)
ग०—मूर्वा (चि० ३।२५८; १६।६१)
यो०—मूर्वा (चि० ३।२५८; १६।६१; १७।१०६)

मधुवल्ली

च०—यष्टीमधुभेदः (वि० ८।१३९)
ग०—यष्टीमधुभेदः (वि० ८।१३९)
यो०—यष्टिमधुभेदः (वि० ८।१३९)

मधुशिग्रुः

च०—स्वल्पशोभाञ्जनकः (नि० २।४)
—शोभाञ्जनः (वि० ७।१७)
ग०—रक्तशोभाञ्जनः (वि० ७।१७, चि० १०।३३; १३।१५५; १५।१३९)
—शोभाञ्जनः (चि० २९।१५१)
यो०—लोहितकुसुमः अल्पविटपः शोभाञ्जनभेदः (नि० २।४)
—लोहितकुसुमः शोभाञ्जनभेदः (वि० ७।१७)
—रक्तशोभाञ्जनः (चि० १०।३३; १३।१५५)
—मधुशिग्रुकं मधुशिग्रुबीजम् (चि० १५।१३५)

मधूकम्

च०—मधूकशब्देन समानगुणत्वात् फलं कुसुमञ्च ज्ञेयम् (सू० २७।१२८)
—मधूकशब्देनेह मधूकपुष्पं ग्राह्यम् (चि० ११।२०)
ग०—गुडपुष्पम् (वि० ८।१३५)
—मधूकानां पुष्पाणाम् (चि० ११।१४)
—मधूकपुष्पं फलं वा (चि० २।१।३४ (पा०)
—गुडपुष्पस्य वृक्षस्य सारम् (चि० ३।२०६)
—मधूद्रुमः (चि० ३।२५८)
—मधूकपुष्पम् (चि० ५।१२३)
—मधूकसारस्य (चि० १०।३१ (पा०); ११।२०)

—मधुकम् (चि० १९।८८)
—मधूकपुष्पं—गुडपुष्पस्य पुष्पम् (चि० ११।५८)
—मधूकात् सारं—मधूकवृक्षस्य सारकाष्ठम् (चि० २३।२७६)
—मधूकानि मधूकफलानि (चि० २।२।१८)
—मधू द्रुमः—मधुद्रुमेण मधूकपत्रवृन्तस्वरसेन (चि० ४।८९ (पा०)

यो०—गुडपुष्पम् (सू० ३।२१)
—प्रसिद्धम् (सू० २७।१२८)
—मधुपुष्पः (वि० ८।१३५)
—मधू द्रुमः (चि० ३।२५८)
—मधूकद्रुमः (चि० ४।९४)
—मधूकपुष्पं गुडपुष्पस्य पुष्पम् (चि० ११।५८)

मधूकपुष्पी

च०—मधूकपुष्पी मधुकभेदः (कल०) (वि० ८।१३९)
ग०—मधूकभेदः (वि० ८।१३९)
यो०—मधूकभेदः (वि० ८।१३९)

मधूलकः

च०—गोधूमविशेषः (नि० २।४)
—गोधूमभेदः, तत्कृतं मद्यं मधूलकम्, अन्ये तु मेदकमाहुः (सू० २७।१९० (पा०)
—शिलारस इति ख्याताम् (सू० ५।२३)
—शल्लकीवृक्षः (वि० ८।१४४)
—शिलारसः (चि० ३।२६७)
—शल्लकीकाष्ठम् (चि० १८।८०)

शाकः

च०—बृहत्पत्रस्तरुः (चि०[1] १।३।३)
ग०—शाकवृक्षः स्वनामख्यातः (क० १।२५ (पा०)

शाद्वलम्

च०—दूर्वा (चि० १६।१२१; २१।७५)
ग०—नवतृणम् (चि० १०।४८)
—सदाहरिते देशे वर्त्तते, तेन यत्र भूमौ सादाख्यं नवतृणं जातं वर्त्तते तत्तृणस्थानमृत्तिका शाद्वल इति ग्राह्यः (चि० १६।१२१)
—नवतृणस्थानमृत्तिका (चि० २९।१३१)
यो०—नवतृणम् (चि० १०।४८; १६।१२१)

शारदः

च०—वरकोद्दालकादयः षष्टिकविशेषाः, केचित् कुधान्यानि वरकादीनि वदन्ति (सू० २७।१४)
यो०—वरकादयः षष्टिकभेदाः। कुधान्यविशेषाः इति केचित् (सू० २७।१४)
—षष्टिकभेदः (चि० १४।९५)

शार्ङ्गेष्टा

च०—काकतिक्ता (सू० २७।९६)
—गुञ्जा (वि० ८।१३५; चि० १८।७१; २७।३३, सि० ३।५९)
ग०—काकतिक्तिका (सू० २७।९६)
—शार्ङ्गेष्टा रक्तगुञ्जा (वि० ८।१३५)
—घण्टारवा (चि० १८।७१)
—काकजङ्घा (चि० ३०।२६०, २६६, २७७)
—काकजङ्घा गुञ्जामूलं वा (क० १।२२)
यो०—अङ्गारवल्लिका (सू० २७।९६)
—गुञ्जा (वि० ८।१३५; चि० १८।७१)

शालः

जे०—साल एव सालसारः (चि० २५।८४)
ग०—शालस्त्रिविधः। तत्र बृहद्वृक्षः शाल इति विवक्षितः (सू० २५।४९)
—शालकाष्ठम् (वि० ८।१४४)
—प्रसिद्धः (चि० ३।२५८)
यो०—शालतालौ प्रसिद्धौ (चि० ३।२५८)

शालकल्याणी

च०—शालिञ्चभेदः (ब०)। शालिञ्चीभेदः (कल०) (सू० २७।१०२)
ग०—शालिञ्चप्रभेदः (सू० २७।१०२)
यो०—शालिञ्चभेदः (सू० २७।१०२)

शालपर्णी

—'शालिपर्णी' शब्द केवल सिद्धिस्थान में उपलब्ध होता है।

शालिः

च०—रक्तशालिः (सू० ५।५, १२; २१।३१)
—इह च द्रव्यनामानि नानादेशप्रसिद्धानि, तेन नामज्ञाने सामर्थ्यं तथाभूतं नास्त्येवान्येषामपि टीकाकृतां, तेन देशान्तरिभ्यो नाम प्रायशो ज्ञेयं, यत्तु प्रचरति गौडे तल्लेखिष्यामोऽन्यदेशप्रसिद्धं च किंचित्। ...अत्र च शालिर्हैमन्तिकं धान्यम् (सू० २७।८)
ग०—हैमन्तिकधान्यम् (सू० ४।१७, ६।४३; चि० ५।११०)
—हैमन्तिकशूकधान्यम् (सू० ५।५)
—शालीनां लोहितशालितण्डुलानाम् (सू० १५।१६)
—शालयो रक्तशाल्यादीनाम् (सू० २१।३१)
—अन्ये शालयः—ये चान्ये शालयः शुभा इति हैमन्तिका येऽन्ये शुभा शूकधान्यविशेषाः कर्दमकपाण्डुकपुष्पाण्डकपुण्डरीकशतभीरुकलोध्रपुष्पककाञ्चनकमहिषमस्तकहायनकदूषकप्रभृतयः (सू० २७।९)
—हैमन्तिकधान्यमूलम् (वि० ८।१३९; चि० ३।२५८)
—हैमन्तिकधान्यानि शूकसंज्ञानि (चि० ४।३६)
—शालिधान्यम् (चि० १४।२११)
—शालीन् शाल्यन्नम् (सि० ३।५१)
यो०—अकण्डितशुक्लो हैमन्तः। कण्डनेन विना शुक्ला- हैमन्ताः शालयः स्मृतः। इति। (भा० प्र० धा० ९।३)। कण्डिताः शुक्ला अकण्डिता शुक्लाश्च हैमन्ताः शालय इत्यन्ये (सू० ४।१७)
—रक्तशालिः (सू० ५।५, १२; ६।३८; चि० ५।११०; १९।३९)
—क्षुणः सितः स्मृतः शाली रक्तो व्रीहिरुदाहृतः। इति। (सू० ६।२८)
—शाल्यन्नं शालितण्डुलान्नम् (सू० २१।५२)

१. इस स्थल पर मूल में 'शाक' का पाठ नहीं है।

—(अन्ये शालयः)—अनुक्ता अन्ये च एवंविधाः कर्दमकपुष्पान्तकपुण्डरीकलोध्रशूकशतभीरुकादयः ये शुभा रक्तशाल्यादिसदृशाः शालयः अकण्डितशुक्लाः हैमन्ताः। काण्डनेन ··· स्मृताः (भा० प्र०) इति। कण्डिताः शुक्ला अकण्डितशुक्लाश्च हैमन्ताः शालयः इत्यन्ये (सू० २७।९)

—(··· नैषधकादयः)—आदिशब्देन यवपत्रिकादयः शालिविशेषा गृह्यन्ते। ते च शालयः शालिविशेषाः (सू० २७।१२)

—शालिषष्टिकमन्नम् (चि० १।१।७६, १।२।११)

—शालिषष्टिकौ प्रसिद्धौ (चि० ४।३६)

—शालीन् शाल्योदनम् (चि० ४।८७)

शालूकम्

ग०—शालूकानि कुमुदादीनां कन्दाः (सू० ५।१०)

—पद्मादीनां कन्दः (सू० २७।११६; चि० ३।२५८; १४।९; २१।७१ (पा०)

यो०—शालूकानि कुमुदादीनां कन्दान् (सू० ५।१०)

—पद्ममूलम् (सू० २७।११६)

—पद्मादीनां कन्दः (चि० ३।२५८; १४।९)

—उत्पलादीनां मूलम् (चि० १७।१५)

शालेयम्

च०—चाणक्यमूलं मरौ प्रसिद्धं, किंवा शालेयमिति मिस्तेयं पाटकप्रसिद्धं, वचनं हि—"चाणक्यमूलमिस्तेये शालेयाभिख्यया जगुः" इति। (सू० २७।१७०)

ग०—चाणक्यमूलं मगधे,प्रसिद्धम् (सू० २७।१७०)

—जम्बूः (चि० ४।७५)

यो०—चानाक्यमूलं मरौ प्रसिद्धम् (सू० २७।१७०)

—जम्बूः (चि० ४।७५)

शाल्मल(लि)कः

च०—शाल्मलिको रोहितकः, स्वल्पशाल्मलिर्वा (ब०)। शाल्मलिको रोहडकः, स्वल्पशाल्मलिर्वा (कल०) (वि० ८।१३५)

—शाल्मलकः शाल्मलीभेदः, रोहितको वा ([1]क० १।८)

यो०—शाल्मलिको रोहितकः (वि० ८।१३५)

शाल्मलिः (ली)

जे०—शाल्मलीवेष्टं खपुरमित्यर्थः। (चि० ३०।९१)

च०—शाल्मलीवेष्टकः शिमलीआठा (ब०)। शाल्मली शिमलीआठा (कल०) (सू० ४।३२)

—शाल्मलं शाल्मलीवेष्टकम् (चि० १५।१३)

—शाल्मलं शाल्मलीवेष्टकम् (ब०)। शाल्मलं शाल्मली (कल०) (चि० २७।२९)

—शाल्मलीश्लेषमिति शाल्मलीवेष्टकम् (चि० ३०।९१)

ग०—शाल्मली शाल्मलीवेष्टः (सू० ४।३२)

—शाल्मली शाल्मलवृक्षः (वि० ८।१३५)

—शाल्मली शाल्मलीवेष्टकम् (चि० १४।२०२)

—शाल्मलंश त्वमस्याः (चि० १४।२२५)

—शाल्मलीनिर्यास मोचरसा (चि० १४।२२७)

—शाल्मलं शाल्मलीवेष्टम् (चि० १५।११३)

यो०—शाल्मली शाल्मलीवेष्टः (सू० ४।३२)

—शणशाल्मली प्रसिद्धौ (सू० २७।९९)

—प्रसिद्धः (वि० ८।१३५)

—शाल्मलं पुष्पं शाल्मलीपुष्पम् (चि० १४।२२५)

—शाल्मलिनिर्यासः मोचरसः (चि० १४।२२७)

—शाल्मलं वेष्टम् (चि० १५।११३)

शावर(कः)

च०—सावरकं लोध्रम् (चि० २३।५५)

ग०—सावरको धवललोध्रः (चि० २३।५३)

—सावरकं पट्टिकाख्यं श्वेतलोध्रम् (चि० २६।२३३)

शिंशपा

ग०—शिशु इति ख्यातः (चि० १।२।१२)

शिग्रुः

जे०—विटशाकं पूर्वदेशे प्रसिद्धम्, मध्यदेशे लोहितफुल्लं शोभाञ्जनकं कथ्यते प्रायः। (चि० ३।२६७)

च०—विटपशोभाञ्जनः (ब०)। विटपं शोभाञ्जनम् (कल०) (सू० २७।१७०)

—शोभाञ्जनभेदः (चि० ३।२६७)

ग०—शिग्रूणि शोभाञ्जनबीजानि (सू० २।३)

—शोभाञ्जनम् (सू० २।२३; १४।३१; वि० ७।१७; ८।१३५; चि० ३।२६७)

यो०—शिग्रूणि-शिग्रु शोभाञ्जनफलम् (सू० २।३)

—शोभाञ्जनः (सू० ३।८; २७।१७०; चि० ७।१०६, ११३; १०।२७ (पा०) इत्यादि।

—रक्तशोभाञ्जनः (चि० ३।२६७)

—शिग्रूणि शिग्रुबीजानि (चि० १७।९८)

---

[1]. इस स्थान पर मूल में 'शाल्मलीमूल' पाठ है। चक्रपाणि ने इसकी व्याख्या में विमान ८।१३५ का सन्दर्भ उद्धृत किया है जिसमें 'शाल्मलक' पाठ है।

शितिवारकः

च०—शालिञ्चः (ब०)। शितिमारकः शालिञ्चः (कल०) (चि० २६।५६)

—[1]शितिमारकः कुन्दकुसुमख्यातः (कल०) (चि० २६।६०)

—शालिञ्चः (सि० ९।८)

ग०—शितिमारकः शालिञ्चः (चि० २६।५६)

शिबि(म्बि)रः

च०—शिबिरस्तीरभुक्तौ 'सिद्ध(क्ता)क' इत्युच्यते (सू० २७।१८)

ग०—'''सर्वे तृणसम्भवाः (सू० २७।१८)

यो०—'''शिम्बिर'''एते तृणधान्यविशेषाः (सू० २७।१८)

शिम्बः (म्बी)

च०—विविधाः शिम्बीजातय इति कृष्णपीतरक्तश्वेतकुशिम्बीभेदा इत्यर्थः (सू० २७।३१)

ग०—शिम्बी वैदलयोनिर्मुद्गादीनां शिम्बी अपरिणतावस्थिकी शिम्बीत्युच्यते (सू० २७।३२)

यो०—विविधाः शिम्बिजातयः–विविधाः कृष्णपीतरक्तश्वेतशिम्बीभेदात् नानाविधाः शिम्बीजातयः (सू० २७।३१)

—इह शिम्बी मुद्गादीनां आर्द्रफलिका (सू० २७।३२)

शिरीषः

ग०—बृहद्वृक्षशिरीषत्वक् (चि० ९।७०)

—शिरीषकुसुमानि द्विरुक्त्या स्वल्पबृहच्छिरीषकुसुमानि (चि० २३।९०–९१)

—शैरीषी शिरीषस्य त्वक् (चि० ७।९६)

यो०—शैरीषी शिरीषसम्बन्धिनी (चि० ७।९६)

शिलोद्भेदः

जे०—पाषाणभेदः (चि० ३०।९०)

च०—[2]शिलोद्भवं शैलजम् (चि० १५।११३)

ग०—शालिञ्चः (चि० १५।११३)

यो०—पाषाणभेदम् (चि० १५।११३)

शिवा

ग०—हरीतकी (सू० ४।४९; शा० ८।२०)

यो०—हरीतकी (सू० ४।४९; शा० ८।२०)

—सितेत्यत्र शिवेति क्वचित्पाठः । शिवा हरीतकी (चि० १८।८७ (पा०)

१. 'कुन्दुरुक' की व्याख्या में (देखें कुन्दुरुक)

२. इस स्थान पर मूल में 'शिलोद्भेद' पाठ है ।

शीतकः

च०—अम्ललोटः (ब०)। शीतकोऽम्बुलोठकः (कल०) चि० ८।१४०)

ग०—चालिन्नफलम् (चि० ८।१४०)

यो०—अम्बुलोटकः (चि० ८।१४०)

शीतकुम्भिका

जे०—शीतकुम्भी काष्ठपाटला (चि० ३।२५८)

च०—शीत[1]कुम्भिका काष्ठपाटला (चि० ३।२५८)

ग०—कुम्भाड़लता (चि० ३।२५८)

यो०—कुम्भीरिका लता (चि० ३।२५८)

शीतपर्णी (पा०)

जे०—वृषकलम्बुकः, पानीयवल्लीत्यपरे (चि० ३।२६७)

च०—वृषकलम्बुका (चि० ३।२६७)

शीतपाकी

जे०—दूर्वा (चि० ३।२५८)

च०—शीतला (चि० ८।१३९)

—गण्डदूर्वा (ब०) । गन्धदूर्वा (कल०) (चि० ३।२५८)

—शीतली (सि० ३।५३)

ग०—काकोलीप्रभेदः (चि० ८।१३९)

—शीतला (चि० ३।२५८)

यो०—शीतला (चि० ८।१३९)

—काकोली (चि० ३।२५८)

[2]शीतफलम्

यो०—रावणाम्लिकेति प्रसिद्धम् (सू० २७।१४२)

शीतवल्ली

यो०—नीलदूर्वा (चि० ३।२६७)

[3]शुकनासा

जे०—चर्मकारवटः कुब्जक इति लोके । (चि० ३०।५३)

शुकबर्हम्

च०—ग्रन्थिपर्णकम् (सू० ५।२३)

ग०—ग्रन्थिपर्णकम् (सू० ५।२३)

यो०—शुकबर्हं ग्रन्थिपर्णम् (सू० ५।२३)

१. 'श्वेतकुम्भिका' इति पा०

२. यह शब्द मूल में नहीं किन्तु व्याख्या में है ।

३. यह चक्रपाणिसम्मत पाठ नहीं है किन्तु गंगाधर द्वारा अङ्गीकृत है ।

शुक्तिः

च०—शुक्तिः बदरी (सू० २५।४९)
—शौक्तिकैरिति बदरीफलैः (नि० २।४)
—शुक्तिः बदरिका (चि० २५।६७)

ग०—शुक्तिः बदरीवृक्षः (सू० २५।४९)
—शौक्तिकैर्बदरफलैः (नि० २।४)

यो०—शुक्तिः बदरीवृक्षः (सू० २५।४९)

शुक्लसुरसः

च०—सुरस[1]मञ्जरी पर्णासभेदः (चि० २३।१०१)

ग०—सुरसशुक्लमञ्जरी-सुरसस्य शुक्लनिर्गण्ड्या मञ्जरी, श्वेततुलसी-मञ्जरी वा (चि० २३।१०१)

शुक्ला

च०—शर्करा (वि० ८।१३९)

ग०—शुक्लवर्णा निःक्षीरा विदारी (वि० ८।१३९)

यो०—शर्करा (वि० ८।१३९)

शुभा

च०—शुभा इति विशेषणं पिप्पल्याः (चि० ८।१४५)

ग०—वंशलोचना (चि० ८।१४५)

यो०—पिप्पली शुभा-शुभा पिप्पली। शुभेति पिप्पली-विशेषणं। शुभा वंशलोचनेति केचित्। तदन्ये न मन्यते। समानतन्त्रे हारीतादाव दृष्टत्वात्। तथा च-तालीशं मरिचं शुण्ठी पिप्पल्योऽशांशका मता। त्वगेलार्द्धांशके दद्यात् शर्कराष्टपलं भवेत् ॥ इति ॥ (चि० ८।१४५)

शुषा

च०—कासमर्दः (सू० २७।८८)
—[2]शुषा कासमर्दः, रूक्षदेशजं शाकमित्येके (चि० १९।३३)

ग०—कासमर्दः (सू० २७।८८)

यो०—कासमर्दः (सू० २७।८८)

---

१. 'शुक्लमञ्जरी' इति पा०।
मूलपाठ 'शुक्लसुरसमञ्जरी' है। चक्रपाणिदत्त ने सुरस-मञ्जरी की व्याख्या किया है, तथा व्याख्या में उद्धृत शब्द का पाठान्तर 'शुक्लमञ्जरी' दिया है।

२. यहाँ मूल में 'शुष्कशाक' पाठ है, किन्तु चक्रपाणिदत्त ने 'शुषा' की व्याख्या की है।

शुष्कशाकम्

च०—रूक्षदेशजं शाकमित्येके (कल०) (चि० १९।३३)

ग०—पट्टपत्रं नालिताशाकमिति लोके (चि० १९।३३)

यो०—शुष्केण शाकेन शुष्कशाकेन वा। शट्यादीनाञ्चापि शाकेन शुष्कशाकेन। शुष्कपटुशाकेन ललितापाता-इति वङ्गेषु ख्यातेन इति वा (चि० १९।३३)

शूकधान्यम्

च०—शूकवन्ति धान्यानि शूकधान्यानि (सू० २७।६)

ग०—शालिषष्टिकाशुधान्ययवगोधूमादिकञ्च (सू० १४।४२)
—द्विविधं शूकधान्यं सुधान्यकुधान्यभेदात् तत्र सुधान्यं त्रिविधं शालिषष्टिकव्रीहिभेदात् (सू० [1]२७।१३)
—रक्तशाल्यादिकमुक्तम् (सू० २७।३०९)

शूकरी

च०—'वाराहीकन्द' इति ख्याता (चि० ९।४६)

ग०—वाराही (चि० ९।४६)

यो०—वृद्धदारकम् (चि० ९।४६)

शू(सू)र्पपर्णी-सूर्प्यपर्णी

जे०—[2]सूर्प्यपर्णी माषपर्णी मुद्गपर्णी च (चि० २८।१५१)

च०—शूर्पपर्ण्यौ मुद्गमाषपर्ण्यौ (चि० १।१।४३)
—सूर्पपर्णी मुद्गमाषपर्ण्यौ (चि० १९।५०)
—सूर्पपर्ण्यौ मुद्गमाषपर्ण्यौ (चि० २८।१५१)

ग०—सूर्पपर्ण्यौ मुद्गपर्णीमाषपर्ण्यौ (चि० १।१।४३)
—सूर्पपर्ण्यौ मुद्गमाषपर्ण्यौ (चि० २।२।५)
—[2]सूर्प्यपर्णी माषपर्णी मुद्गपर्णी च (चि० २८।१५१)

यो०—सूर्प्यपर्ण्यौ मुद्गपर्णी माषपर्णी च (चि० १।१।४३)
—शूर्पपर्ण्योः मुद्गपर्णीमाषपर्ण्योः (चि० २।२।५)
—सूर्पपर्णी मुद्गपर्णी माषपर्णी च (चि० १९।५०)

शृङ्गवेरम्

च०—शुण्ठी (सू० ४।६)
—शृङ्गवेरमिति शृङ्गवेररसम् (सू० १३।८६)
—शृङ्गवेरार्द्रकशब्देन शुष्कार्द्रकस्य क्वाथनिष्पन्नं रसं निषेधयति (चि० १३।१५३)

ग०—शुण्ठी (सू० ४।६; चि० ८।१२६; १४।८९; २४।१२१; २८।१४७)
—शृङ्गवेरमार्द्रकम् (सू० १३।८६)
—शृङ्गवेरं शुष्कं शुण्ठीति यावत्, आर्द्रकस्य पुनः पाठात् (वि० ८।१४२)

---

१. यहाँ मूल में 'शूकधान्य' पाठ नहीं है।

२. इस स्थल पर चक्रपाणिदत्तसम्मत 'सूर्पपर्णी' पाठ है।

—शृङ्गवेरार्द्रकरसः आर्द्रकरसः (चि० १३।१५३)
यो०—शुण्ठी (सू० ४।६, ४२, ४५; वि० ८।१३५, १४२ इत्यादि)
—शुण्ठीरसम् (सू० १३।८६)
—आर्द्रकम् (सू० २५।३७)
—शृङ्गवेरार्द्रक अशुष्कनागरं आर्द्रकमित्यर्थः (चि० १३।१५३)

शृङ्गवेरिका

च०—शृङ्गवेरी गोजिह्विका, किंवा आर्द्रकाकृतिः शृङ्गवेरी; यदुक्तं—
"शृङ्गवेरवदाकृत्या शृङ्गवेरीति भाषिता।
कुस्तुम्बुरुसमाकृत्या तुम्बुरूणि वदन्ति च ॥" इति
(सू० २७।१७१)

ग०—शृङ्गवेरी शृङ्गवेराकृतिः। उक्तञ्च—
"शृङ्गवेरवदाकृत्या शृङ्गवेरीति भाष्यते।
कुस्तुम्बुरुसमाकृत्या तुम्बुरूणि वदन्ति हि ॥"
(सू० २७।१७१)

यो०—शृङ्गवेरी गोजिह्विका। शृङ्गवेरी आर्द्रकाकृतिर्वा।
तदुक्तं—
"शृङ्गवेरवदाकृत्या शृङ्गवेरीति भाषितः।
कुस्तुम्बुरुसमाकृत्या तुम्बुरूणि वदन्ति च ॥" इति ॥
(सू० २७।१७१)

शृङ्गाटकम्

ग०—शृङ्गाटकं पानीयफलम् (सू० २७।११७; चि० ३।२५८)
यो०—जलवल्ली शिङ्गाड़ा इति भाषायाम् (सू० २५।४९)
—शृङ्गाटकं पानीयफलम् (सू० २७।११७; चि० ४।७१; ११।३७, ५८; १४।९ इत्यादि)
—सिंगाड़ा इति ख्यातम् (चि० २।२।१४)
—पानीयफलं। शिंगाड़ा इति ख्यातम् (चि० ३।२५८)
—शृङ्गाटः शृङ्गाटकः पानीयफलम् (सि० ८।१००)

शृङ्गाटिका

ग०—शिङ्गाड़ा (वि० ८।१३५)
—शृङ्गाटकः (वि० ८।१३९)
यो०—शृंगाटः (वि० ८।१३५; १३९)

शृङ्गी

ग०—कर्कटशृङ्गी (सू० ४।३६; चि० १।१।६३)
यो०—कर्कटशृङ्गी (सू० ४।३६; चि० १।१।६३; ८।१००; १७।१०२; १८।११२)
—शृङ्गीकर्कटकस्य-कर्कटकस्य शृङ्गी कर्कटकशृङ्गी (चि० १८।११५)

शृङ्गीविषम्

च०—[1]एतेषां च संज्ञासंबन्धे शबरकिरातादय एव तद्विद्याः प्रमाणं, ते हि गुरुपरंपरया व्याख्यानयन्ति
(चि० २३।१३)
ग०—मुस्तकादि कन्दविषाणि (चि० २३।१३)

शेलुः

च०—श्लेष्मातकः (चि० २३।१८७)
ग०—चालित्रफलवृक्षः (चि० २३।१८७)
—चालित्रफलः (चि० २३।२०१)

शैखरिकः

च०—शैखरिककषायेणेति विडङ्गकषायेण, विडङ्गकषायो हि वैद्यव्यवहारात् शैखरिककषाय उच्यते
(वि० ७।१९)
ग०—अपामार्गः (वि० ७।१९)

शैलेयम्

ग०—शैलजम् (सू० ३।२८; ५।२२)
—भिषिजः (चि० ३।२५८ (पा०)
—शैलजम् (चि० २३।५४)
—शैलेयकं शैलजम् (चि० २६।२४२)
यो०—शिलापुष्पम् (सू० ३।२८)
—शैलजम् (सू० ५।२२)
—तन्नामकगन्धद्रव्यभेदः (चि० १२।६५)
—शिलापुष्पं तदाख्यगन्धद्रव्यम् (चि० ३।२५८ (पा०)
—शैलेयकं-शैलेयं। शैलेयं तिक्तकं शीतं सुगन्धि कफपित्तजिदिति (राजनिघण्टुः) कफपित्तप्रशमनतया शैलेयस्य उभयत्र पाठः (चि० ३।२६७)

शैवालम्

च०—शवालम् (चि० २१।९०)
ग०—शैवलं शैवालम् (चि० ४।१०३)
—शैवलः (चि० ३।२५८)
यो०—प्रसिद्धम् (चि० ३।२५८)
—शैवलं सेवालम (चि० ४।१०३)

शोभाञ्जनः

च०—शोभाञ्जनकः-पुनः शोभाञ्जनग्रहणाद्द्वितीयो विटपशोभाञ्जनो गृह्यते (सू० १४।३२)

---

१. 'मुस्तकादीनां' इति पा०

ग०—शोभाञ्जनकः रक्तशोभाञ्जनोऽथवा किञ्चित् स्थूलफलः शोभाञ्जनकः (सू० १४।३२)

यो०—शोभाञ्जनकः नीलशिग्रुः (सू० १४।३२)

—शोभाञ्जनकः श्वेतः (चि० ३।२६७)

श्यामा

च०—श्याममूला त्रिवृत् (सू० १।७७; ४। (४);वि० ८।१३६)

—त्रिवृद्भेदः (चि० २६।१२)

—त्रिवृताभेद एव च श्यामा, तेन श्यामायास्त्रिवृतायाश्च कल्पः श्यामात्रिवृत्कल्पः । यद्यपि चारुणमूलैव त्रिवृदत्रोत्कृष्टा वक्तव्या, तथाऽप्यध्यायसंज्ञायां श्यामाया अग्रे पाठेनाशुदोषहन्तृतया श्यामायाः प्रकर्षं दर्शयति । ये चात्र योगा वक्तव्यास्तेऽरुणया वा श्यामया वा उभाभ्यां वा दोषशरीरादिबलाबलमवेक्ष्य कर्तव्याः (क० ७।१)

—प्रियङ्गुः (सि० ६।८३)

ग०—श्याममूला त्रिवृत् (सू० १।७७; २५।४९; वि० ८।१३६; चि० १६।६६)

—श्यामामूलत्रिवृन्मूलस्य फलम् अरुणमूलत्रिवृन्मूलस्य''' (वि० ७।२६)

—श्याममूलत्रिवृत् (चि० ७।१२४)

—श्यामा त्रिवृत् (चि० १०।४४; १२।२५; १४।१४)

—अनन्तमूलम् (चि० ३०।६२)

—श्याममूला त्रिवृता श्यामा (क० ७।७)

—अरुणा (क० ७।३६)

—श्यामा त्रिवृत् (क० ७।५१; सि० ४।३७)

—श्याममूला त्रिवृता (क० ७।६१)

—श्यामारुणमूलत्रिवृते द्वे (क० १०।१८)

—त्रिवृच्छ्यामयोररुणमूलत्रिवृच्छ्याममूलत्रिवृतोः (क० ११।१२)

यो०—श्याममूला त्रिवृत् (सू० १।७७)

—श्याममूला (वि० ८।१३६)

—त्रिवृत् (चि० १०।४४; १२।२५)

—श्यामालता (चि० १४।५४)

श्यामाकः

च०—तृणविशेषः; तस्य च बीजतण्डुला ग्राह्याः (सू० २।२६)

—श्यामाकादयोऽपि तृणधान्यविशेषाः (सू० २७।१६)

ग०—श्यामाका इति श्यामघासबीजानि (सू० २१।२५)

—श्यामाघासस्य बीजम् (सू० २७।१६)

—श्यामाकोऽपि तृणधान्यं श्यामाघास इति लोके, तस्य बीजम् (चि० ४।३६)

—श्याममूला त्रिवृत् (सि० १०।२५ (पा०)

यो०—श्यामाकानां-श्यामाकास्तृणधान्यभेदाः। तेषां तण्डुलैः (सू० २।२६)

—त्रिविधः । श्यामाकः हस्तिश्यामाकः जलश्यामाकश्च । कोरदूषश्यामाकादयः तृणधान्यविशेषाः (सू० २७।१६)

श्योनाकः

च०—स्योनाककट्वङ्गशब्दाभ्यां द्वावपि पृथुशिम्बाल्पशिम्बौ स्योनाकौ गृह्येते (ब०) । श्योनाककट्वङ्गशब्दाभ्यां द्वावपि स्योनाकौ गृह्येते (कल०) (चि० १५।१३४)

ग०—श्योनाकस्य कट्वङ्गशब्देन पुनरुक्तत्वाद् भागद्वयम् (चि० १५।१३४)

यो०—स्वनामप्रसिद्धः (सू० ४।२६)

श्रावणी

जे०—अलाबूः सा (अलम्बुषा ?) (चि० २।२।२१)

—श्रावणीमहाश्रावण्यौ अलम्बुषा स्थूलफला स्वनामख्याता (चि० ३।२५८)

—मुण्डितिका (चि० २८।१५९)

च०—मुण्डितिका (चि० ११।६२)

—मुण्डितिका (ब०) । मुण्डी (कल०) (चि० २९।५५)

ग०—श्वेतमुण्डेरी (वि० ८।१३९)

—रक्तमुण्डेरी (चि० ३।२५८)

—मुण्डेरी (चि० ११।६२; १८।१०१; २८।१५९; २९।५५; ३०।५०)

—रक्तमुण्डीरी (क० ७।१८)

यो०—रक्तमुण्डेरी (वि० ८।१३९)

—रक्तमुण्डीरी (चि० ३।२५८)

—मुण्डीरी (चि० ११।४६)

—मुण्डेरी (चि० ११।६२)

—श्रावणीद्वयं श्रावणीमहाश्रावण्यौ (चि० २।२।२१)

—श्रावणीबृहतीयुगैः-श्रावणीयुगं श्रावणी महाश्रावणी च । श्रावणी मुण्डेरी (चि० १८।१०१)

श्रीपर्णी

जे०—कट्फलम् (चि० ३।२५८)

च०—गम्भारी (चि० १।४।१६)

ग०—गम्भारी (चि० ३।२५८)

यो०—गम्भार्याः (चि० १।४।१६)

—गम्भारी (चि० ३।२५८)

श्रीवेष्टकः

च०—नवनीतखोटी (सू० ४।३२)
—श्रीवेष्टकलता (कल०) (चि० २७।२९)

ग०—श्रीवेष्टो नवनीतखोटी (सू० ४।३२)
—नवनीतखोटी (सू० ५।२३; चि० २३।५५)

यो०—श्र्याह्वः (सू० ४।३२)
—नवनीतखोटीम् (सू० ५।२३)

श्रेयसी

जे०—हस्तिपिप्पली (चि० २८।१४०)
च०—श्वेतास्थाने 'श्रेयसी' इति केचित्, सा रास्नाभेदः (सू० ४।५०)
—हस्तिपिप्पली (चि० १०।२०; १८।५३)
—रास्ना (चि० १८।१६१; २६।९३; सि० ९।८)
ग०—गजपिप्पली (सू० २७।१०७)

यो०—युक्ता युक्तरसा रास्ना । श्रेयसी तद्भेदः (सू० ४।५०)
—गजपिप्पली (सू० २७।१०७)
—हस्तिपिप्पली (चि० १०।२०)
—हरीतकीं हस्तिपिप्पलीमिति केचित् (च० १८।५३)
—रास्ना (चि० १८।१६१)

श्र्याह्वः

च०—'नवनीतखोटिः' इति प्रसिद्धः (सू० ३।३)
ग०—नवनीतखोटी (सू० ३।३)
यो०—नवनीतखोटी (सू० ३।३)

श्लेष्मातकः

च०—बहुवारः (सू० ४।१६)
—'बहुवारक' इति प्रसिद्धः (चि० २१।८९)

ग०—बहुवारः (सू० ४।१६)
—शेलुवृक्षः (चि० २१।८९)

यो०—बहुवारः (सू० ४।१६)
—श्लेष्मातकफलं शेलुफलम् (सू० २७।१५९)

श्वदंष्ट्रा

जे०—गोक्षुरकः (चि० ३।२२४)
ग०—गोक्षुरकः (चि० ८।१०६)
यो०—गोक्षुरः (सू० २।१२, २२; २३।१२; चि० १।१।४२; ३।२५८ इत्यादि)
—गोक्षुरकः (सू० ४।१५, २६, ३५; वि० ८।१३९; चि० २।३।८ इत्यादि)

श्वेतकरवीरः

च०—करवीरः (चि० ७।१०५, १०६)

श्वेतनामा

च०—श्वेताऽपराजिता (सू० १।७७)
ग०—श्वेतापराजिता (सू० १।७७)
यो०—श्वेतापराजिता (सू० १।७७)

श्वेतभण्डी

च०—अपराजिता (चि० २६।२१०)

श्वेत(सित)मरिचम्

च०—मरिचं सितमिति शोभाञ्जनबीजम् (चि० २३।१९३)
—श्वेतमरिचं शोभाञ्जनबीजम् (चि० २६।२४५)
ग०—सितं मरिचं श्वेतमरिचं शोभाञ्जनबीजम् (चि० २३।१९३)
—शुक्लमरिचात् शोभाञ्जनबीजात् (चि० २६।२४५ (पा०)
—श्वेतमरिचं शोभाञ्जनबीजम् (चि० २६।२४६)

श्वेतशालिः

च०—अकण्डितशुक्लधान्यानि (चि० २१।८०)
—श्वेतशालिर्मगधे 'पुण्डरीकशालिः' इति ख्यातः (चि० २१।११३)
ग०—धवलवर्णशालिधान्यम् (चि० २१।८०)

[1]श्वेतश्वेता

यो०—श्वेतापराजिता (चि० १०।४२ (पा०)

श्वेता

जे०—श्वेतस्यन्दः (चि० ३।२६७)
—श्वेतस्यन्दा (चि० २३।२१३)
च०—अपराजिता (सू० ४।२७; ५।२६)
—श्वेतास्थाने 'श्रेयसी' इति केचित्, सा रास्नाभेदः (सू० ४।५०)
—श्वेतापराजिता श्वेतस्यन्दा (ब०)। श्वेतापराजिता (कल०) (चि० १०।४२)
—कटभी (चि० २३।७७)

---

१. चक्रपाणिदत्तसम्मत पाठ 'श्वेता श्वेता विषाणिका' है। इसमें इन्होंने प्रथम 'श्वेता' की पृथक् व्याख्या की है तथा दूसरे 'श्वेता' का 'विषाणिका' के साथ सम्बन्ध स्थापित किया है और इसका पाठान्तर 'शतविषाणिका' दिया गया है।

—श्वेता गिरिकर्णिका—श्वेता चेति गिरिकर्णिकाविशेषणं, तेन श्वेताऽपराजिता गृह्यते। केचिद्गिरिकर्णिकां स्यन्दनामाहुः (ब०)। श्वेता चेति गिरिकर्णिका विशेषणम्। तेन श्वेतापराजिता गृह्यते। केचित् गिरिकर्णिकां स्यन्दनमाहुः। (कल०)
(चि० २३।१९५)

ग०—श्वेतापराजिताम्। श्वेतां सुरसमिति श्वेतसुरसा श्वेतशेफालिकेत्यन्ये (सू० २।४)
—श्वेतापराजिता (सू० ४।२७; ५।२६; वि० ८।१५१, चि० ३।२६७; ९।७०; १०।४२)
—श्वेतापराजिता, श्वेतास्थाने श्रेयसीति केचित् पठन्ति स रास्नाविशेषः (सू० ४।५०)
—श्वेतापराजिता (चि० २३।२४३ (पा०)
—श्वेता गिरिकर्णिका-श्वेतापराजिता (चि० २३।१९५)

यो०—श्वेतापराजिता (सू० १।७९; २।४; ४।२७; ५।२६; वि० ८।१५१ इत्यादि)

श्वेता मृद्वीका

जे०—द्राक्षा काचिच्छ्वेता काश्मीरभवा, सा तु गुणैः श्रेष्ठा भवति (चि० २४।१८०)
च०—श्वेतामिति मृद्वीकां, श्वेता च द्राक्षा काश्मीरभवा ज्ञेया (चि० २४।१८०)

श्वेता विषाणिका

च०—[1]श्वेताविषाणिका शतावरी (चि० १०।४२)

षड्ग्रन्था

जे०—वचा (चि० ३।२०४)
च०—वचा (चि० १५।१२५)
ग०—श्वेतवचा (चि० ३।२०४)
—वचा (चि० ७।११३)
यो०—पीतवचा (चि० ३।२०४)
—श्वेतवचा (चि० ७।११३)
—वचा (चि० ७।१४५; १५।१२५, १३७, १७९)

षष्टिकाः

च०—[2]षष्टिकादयश्च ग्रैष्मिका (सू० २७।१२)
—शुद्धषष्टिकमिति गौरषष्टिकम् (चि० २।२।३)
ग०—षष्टिदिनभवधान्यम् (सू० ४।१७)
—षष्टिदिनभवं वार्षिकं शूकधान्यम् (सू० ५।५)
—ग्रैष्मिकं धान्यं शूकाख्यमेव (चि० ४।३६)

१. 'शतविषाणिका' इति पा०।
२. यहाँ मूल में 'षष्टिक' शब्द नहीं है।

—गौरः षष्टिकः शुक्लषष्टिकः (सू० २७।१३)
—षष्टिकधान्यम् (चि० ४।२१; १४।२११)
यो०—ग्रैष्मः प्रायेण गर्भपाकः (सू० ४।१७)
—ग्रैष्माः षष्टिकाः। प्रायेण गर्भपाकः षष्टिकाः इत्यन्ये (सू० २७।७-९)
—षष्टिकान्नम् (चि० १।१।७५, १।३।३७, १।४।२३; २।३।१३)
—शालिषष्टिकमन्नम् (चि० १।१।७६; १।२।११)
—शुद्धषष्टिकं गौरषष्टिकम् (चि० २।२।३)
—षष्टिकचूर्णेन षष्टिकतण्डुलचूर्णेन (चि० २।२।२८)
—शालिषष्टिकौ प्रसिद्धौ (चि० ४।३६)

संवर्त्तकः

जे०—विभीतकः (चि० ३।२५८)
च०—संवर्तकः विभीतकः (चि० ३।२५८)
ग०—मुस्तकम् (चि० ३।२५८)
यो०—संवर्तकः विभीतकः (चि० ३।२५८)

संहर्षा

च —बन्दाकः (वि० ८।१३९)
ग०—वन्दाकः (वि० ८।१३९)
यो०—वन्दाकः (वि० ८।१३९)

सङ्कोचम्

जे०—कुङ्कुमम् (चि० २४।१८७)
च०—कुङ्कुमम् (चि० २।३।२८)
—केचित्तु संकोचं कुङ्कुममाहुः (चि० २४।१८७)
ग०—प्रविरलाः (चि० २।३।२८)
यो०—कुङ्कुमम् (चि० २।३।२८)

सतीनः

जे०—वर्त्तुलकलायः (चि० २४।१३९)
च०—वर्तुलकलायः (चि० २४।१३९; सि० ३।८)
यो०—कलायभेदः (चि० १४।२०५ (पा०)

सदापुष्पा

च —अर्कः (सू० ४।२३)
—[1]रक्तार्कः (ब०)। सदापुष्पी रक्तार्कः (कल०) (वि० ८।१३५)
—सदापुष्पी अर्कपुष्पिका (क० १।१४)
ग०—सदापुष्पी अर्कः (सू० ४।२३)
—सदापुष्पी रक्तार्कः (वि० ८।१३५; क०[2] २।८-११)

१. 'अर्कपुष्पी कुन्दो वा' इति पा०
२. कल्प १।१४ के मूल को इस स्थल पर उद्धृतकर इसी की व्याख्या की गई है।

योo—सदापुष्पी अर्कः (सूo ४।२३)
—सदापुष्पी रक्तार्कः (विo ८।१३५)

सप्तच्छदः–सप्तपर्णः

चo—[1]सप्तपर्णः पियालसालः (कलo) (विo ८।१३५)
गo—सप्तपर्णः सप्तच्छदः (सूo ४।४३; २५।४९; विo ८।१३५)
योo—सप्तपर्णः सप्तच्छदः (सूo २५।४९; विo ८।१३५)
—सप्तच्छदः सप्तपर्णः (चिo ६।३५; ७।१२९, १४४)

सप्तला–सातला

जेo—यवतिक्ताभेदः (चिo २८।८४)
चo—सप्तला चर्मकषा (सूo १।७७)
—सातला चर्मकषा (चिo १३।७०; कo १।२३ (पाo);७।५७)
—सातला चर्मकशा (कo १०।१२)
गo—सप्तला चर्मकषा (सूo १।७७; चिo १५।१७१)
—सप्तला सातला चर्मकषेति ख्याता (सूo २।९)
—सप्तला शङ्खिनीभेदः (विo ८।१३६)
—शातला चर्मकशा (चिo १३।७०)
—शातला चर्मकषा (चिo १३।१२८)
—अत्रापि शातला चर्मकषा (चिo १३।१३४)
—सातलया सप्तलया (चिo २८।८४)
योo—सप्तला चर्मकषा (सूo १।७७; २।९)
—सातला चर्मसाह्वा (विo ८।१३६)
—सातला चर्मकषा (चिo १३।१२८)

समङ्गा

चo—वराहक्रान्ता (सूo ४।५)
—वराहक्रान्ता 'लज्जालुः' इति लोके (बo)।
वराहक्रान्ता लज्जालुरिति (कलo) (चिo ४।७६)
—खादिरी; 'वराहक्रन्ता' इत्यन्ये (बo)। मञ्जिष्ठा, वराहकान्ता इत्यन्ये (कलo) (चिo १९।५३)
गo—वराहक्रान्ता (सूo ४।५)
—वराहक्रान्ता मञ्जिष्ठा वा (सूo ४।७६)
—मञ्जिष्ठा (चिo १४।१९२, २२०; २१।८७)
—मञ्जिष्ठा वराहक्रान्ता वा (चिo १४।२३७)
योo—वराहक्रान्ता (सूo ४।५; चिo ४।७६, ८९)
—मञ्जिष्ठा (सूo ४।३१; विo ८।१४४; चिo ११।६६; १४।१९२, २२७ इत्यादि)
—ससमङ्गः-समङ्गा मञ्जिष्ठा (चिo १४।१८९)

सरलः

योo—प्रसिद्धः (चाo ३।२६७)

सरला

चo—त्रिवृत् (चिo १३।१५५)
योo—त्रिवृत् (सूo ४।४)

सर्जः

गo—धूनक इति (सूo ३।५)
—धूनकः (विo ८।१४४; चिo ६।३१; २६।२४२)
—बृहद्वृत्तः शालः (चिo ३।२५८)
—सर्जा सर्जिकाक्षारः (सिo ७।१८ (पाo)
योo—सर्जरसः धूना इति भाषायाम् (सूo ३।५)
—धूनकः (विo ८।१४४)
—बृहच्छालः (चिo ३।२५८)

सर्जरसः

ग—धूनकः (सूo ५।२२; चिo १४।५१)
योo—धूनकः (सूo ३।१०; ५।२२; चिo १४।५१)
—शालनिर्यासः (चिo १७।७९)

सर्पच्छत्रकम्

चo—सर्पच्छत्रं सर्पफणाकारं छत्रकम्। अन्याश्छत्रजातयः करीषपलालादिजा [1]बहुला ज्ञेयाः (सूo २७।१२३)
गo—मृतसर्पदेहभूतभूभागे जातमुद्भिजं छत्राकृतिकं छत्रम् (सूo २७।१२३)
योo—सर्पफणाकारं छत्रकं उद्भिद्विशेषः (सूo २७।१२३)

सर्पा

योo—सर्पाकारा सर्पसदृशाकृतिः (चिo १।४।७)

सर्षपः

गo—सर्षपानिति अनुक्तौ श्वेतान् (सूo २।३)
—श्वेतसर्षपाः (चिo ३।३०८)
—श्वेतम् (चिo ७।११; ९।६५)
—सार्षपं शाकं सर्षपपत्रम् (सूo २७।११२)
—सर्षपाः-मध्यम सर्षपो रक्तसर्षप उच्यते। सर्षपो हि त्रिविधः-राजसर्षपो मध्यमसर्षपो बृहत्-सर्षपांश्च। यो गौरसर्षप उच्यते। तेन मनुविष्णूक्त-विरोधो न भवति। मनुना हि—'त्रसरेणवोऽष्टौ विज्ञेया लिक्ष्यैका परिमाणतः। ता राजिसर्षपास्ति-स्रस्ते त्रयो गौरसर्षपः, इत्युक्तम्। एवं विष्णुना चोक्तम्-'तदष्टकं लेख्या तत्त्रयं राजिसर्षपस्तत्त्रयं गौरसर्षपः' इति (कo १२।८०)

---

१. बo में "अश्वकर्णः पियालशालः" है।

१. 'वर्तुला' इति पाo।

सलोमशः

यो०—शिरीषः (सू० ३।४)

सह(हा)चरः

जे०—सहाचरः कण्टशेलियाकः (चि० २८।१६१)

च०—सहचरः झिण्टिका (व०)। सहचरो झिण्टिकी (कल०) (वि० ७।२१)

—सहचरः झिण्टी (चि० २६।२६४)

—सहाचरः सहचरः (चि० २८।१४४)

ग०—सहाचरस्य झिण्ट्याः (चि० २८।१४४)

—सहचरात् झिण्ट्या मूलम् (चि० २९।१३९)

यो०—सहचरः झिण्टिकी (वि० ७।२१)

—सहचरः झिण्टी (शा० ८।१९)

सहदेवा

ग०—पीतपुष्पदण्डोत्पला (वि० ८।१३९)

यो०—पीतपुष्पा दण्डोत्पला (वि० ८।१३९)

सहस्रवीर्या

च०—शतवीर्यासहस्रवीर्ये दूर्वे (सू० ४।४९)

—शतवीर्यासहस्रवीर्ये दूर्वाद्वयम् (शा० ८।२०)

—दूर्वा (सि० १२।१९।३)

ग०—दूर्वाविशेषः श्वेतदूर्वा (सू० ४।४९)

—शतवीर्या सहस्रवीर्या श्वेतकृष्णदलभेदेन दूर्वाद्वयम् (शा० ८।२०)

—दूर्वाभेदः (चि० ४।१०२)

यो०—दूर्वा (सू० ४।४९)

—दूर्वाभेदः (चि० ४।१०२)

सहा

जे०—माषपर्णी (चि० २८।१६२)

च०—वृत्तसहा (कल०) (चि० ३।२६७)

ग०—नीलझिण्टी (चि० २८।१६२)

सारिवा

च०—अनन्तमूलम् (सू० ४।९)

—द्वे सारिवे इति श्यामलताऽनन्तमूली च (चि० १०।२१)

—द्विसारिवेति अनन्तमूलश्यामे (सि० ९।८)

ग०—अनन्तमूलम् (सू० ४।९; ५।६४)

—शा(सा)रिवा अनन्तमूलम् (चि० ३।२५८, ४।७६)

—सारिवा चोभे इति श्यामलतानन्तमूले द्वे (चि० ७।१४५)

—[1]सारिवाद्वयम् अनन्तमूलं श्यामलता च (चि० २३।२०२ (पा०)

—द्विसारिवा श्यामलताऽनन्तमूलञ्च (चि० २३।१०२)

यो०—अनन्तमूलम् (सू० २।२४; ४।८; चि० ३।२०१, २१९, २५८; ४।७६)

—अनन्ता (सू० ४।९, १८, ३९)

—शारिवा अनन्तमूलम् (चि० १९।५०)

—सारिवा चोभे-द्वे सारिवे अनन्तमूले (चि० ७।१४५)

—द्वे सारिवे अनन्तमूलं श्यामलता च (चि० ९।३५)

—द्वे सारिवे श्वेतां कृष्णां च। श्वेतसारिवा अनन्तमूलं, कृष्णसारिवा श्यामलता (चि० १०।२१)

—सारिवाद्वयं श्वेतकृष्णभेदेन। श्वेतसारिवा अनन्तमूलम्। कृष्णसारिवा श्यामलता (चि० १४।१६०)

सिञ्चि(म्बि)तिका

ग०—सिम्बितिकाफलं स्वनामख्यातम् (सू० २७।१४२)

यो०—सौवीरबदरभेदः अतिमधुरः मुष्टिप्रमाणः उत्तरापथजः (सू० २७।१४२)

सितः

यो०—······सितः गौरः। एते तत्तदाख्यशालिभेदाः (चि० १४।९५)

सितगिरिः

च०—श्वेताऽपराजिता (चि० २३।९५)

सिता

च०—श्वेतदूर्वा (सू० ४।८)

ग०—सितालता श्वेतदूर्वा, दूर्वा तु प्रचरिता (सू० ३।२७)

यो०—सिता शर्करा। लता मञ्जिष्ठा। अथवा सितालता श्वेतदूर्वा (सू० ३।२७)

—श्वेतदूर्वा (सू० ४।८)

—सिता शर्करा सितेत्यत्र शिवेति क्वचित्पाठः। शिवा· हरीतकी (चि० १८।८७)

सितालता

ग०—सितालता श्वेतदूर्वा, दूर्वा तु प्रचरिता (सू० ३।२७)

यो०—सिता शर्करा। लता मञ्जिष्ठा। अथवा सितालता श्वेतदूर्वा (सू० ३।२७)

---

१. इस स्थल पर गंगाधर द्वारा दो बार 'सारिवा' पाठ स्वीकार किया गया है। चक्रपाणिसम्मत पाठ में एक स्थल पर 'शिरीष' है।

सिद्धार्थः

ग०—श्वेतसर्षपः (इ० १२।७५)
—सिद्धार्थकः-सिद्धार्थः श्वेतसर्षपः (चि० ९।६९)
—सिद्धार्थकैः श्वेतसर्षपः (सि० ७।२५)
यो०—सिद्धार्थकः श्वेतसर्षपः (चि० ९।६९)
—श्वेतसर्षपान् (चि० १५।१३५)

सिन्दु(न्धु)वारः

च०—सिन्धुवारः निर्गुण्डी (सू० ३।२८)
ग०—सिन्धुवार इह निर्गुण्ड्याकारशुक्लपुष्प इति भेदः (चि० २३।५६)
—सिन्धुवारिका निसुन्दारः (चि० २३।७९)
—सिन्धुवारिका निर्गुण्डी (चि० ३०।२७१)
यो०—सिन्धुवारः निर्गुण्डी (सू० ३।२८)

सुगन्धिकः

च०—इह च द्रव्यनामानि नानादेशप्रसिद्धानि, तेन नामज्ञाने सामर्थ्यं तथाभूतं नास्त्येवान्येषामपि टीकाकृतां, तेन देशान्तरिभ्यो नाम प्रायशो ज्ञेयं, यत्तु प्रचरति गौडे तल्लेखिष्यामोऽन्यदेशप्रसिद्धं च किंचित् (सू० २७।९)
—हायनकादयो धान्यविशेषाः (नि० ४।५)
ग०—इहाभिहितानां शूकधान्यानां नामानि नानादेशप्रसिद्धानि। तानि सर्वाणि न सर्वे पुरुषा ज्ञातुं प्रभवन्ति। तस्माद् देशान्तरतो नामानि प्रायशोऽनुसंधाय कुशलैः ज्ञातव्यानि भवन्ति (सू० २७।९)
—हायनकादीनां देशविशेषे स्वनाम्ना ख्यातप्रसिद्धानाम् (नि० ४।५)
यो०—गन्धशालिसंज्ञया जालन्धरमगधादिषु प्रसिद्धः। अयं च देवशालिः इत्युच्यते। ··· एते हि रक्तशाल्यादयः तेषु तेषु देशेषु तैः तैः नामभिः प्रसिद्धा। एकमेव द्रव्यं नानादेशेषु नानासंज्ञाभिः अभिधीयते। तस्मात् शूकशमीधान्यानि नानादेशकृषीबलेभ्यः एव ज्ञेयानि। एते नामतः उक्ताः (सू० २७।९)

सुतश्रेणी

च०—तयोः पर्यायानाह-दन्तीत्यादि (क० १२।३)
ग०—पर्यायैर्दन्तीनामौषधिरुच्यते (क० १२।३)

सुधा

जे०—सेहुण्डः (चि० २५।५३)
च०—गाङ्गेयिका (ब०)। गाङ्गेटिका (कल०) (सू० १।७०)
—सौधं स्नुही (चि० २५।५३)
ग०—दारुमूषगोदन्तादयः पार्थिवविषरूपाः (सू० १।७०)
—स्नुही (चि० ५।१०७; ७।८७; १५।१८३; २१।१२६; २६।१३ इत्यादि)
—सौधं सुधायाः (चि० २५।५३)
यो०—दारुमूषादि पार्थिवविषम् (सू० १।७०)
—महावृक्षः (सू० ३०।६४; चि० ५।१७४)
—स्नुही (चि० ५।१०७, १५३; १३।१३८; १४।५२, ५७ इत्यादि)

सुनिषण्णकः

ग०—निद्रालुः (सू० २७।८८)
यो०—शुशुनि इति वङ्गेषु ख्यातं शाकम्। तल्लक्षणं—
चाङ्गेरीसदृशैः पत्रैः सुनिषण्णश्चतुर्दलः।
शाको जलान्विते देशे चतुष्पात्रीति कथ्यते॥
(सू० २७।८८)
—सुशुनी इति वङ्गेषु ख्यातः शाकभेदः (चि०१४।२३९)
—सुषणी इति लोके ख्यातं च शाकम् ((चि० १८।८९)

सुमनाः

च०—सुमनःप्रवालाः-सुमनःप्रवाला जातीपल्लवाः (सू० ३।४)
—जाती (वि० ८।१३५)
—सुमनःकोरकाः जातीमुकुलकाः (ब०)। सुमनसः क्षारं जातीसुमनःक्षारः (कल०) ,(चि० २६।२४१)
ग०—सुमनःप्रवालाः-सुमनःप्रवाला जातीपल्लवाः कोमला एव ग्राह्या (सू० ३।४)
—सुमनःप्रवाला-सुमनःप्रवालानिति जात्याः कोमलाङ्कुरितपल्लवान् (सू० ३।१४)
—मालतीपुष्पम् (वि० ८।१३५)
—मालती (वि० ८।१४३)
—सुमनःप्रवालः- सुमनःप्रवालेति मालतीकलिका (चि० ७।९४)
—सुमनसां मालत्यादिपुष्पाणाम् (चि० २६।१५९)
—सुमनः मालती (चि० २६।२४१)
—सुमनः मालतीपुष्पस्य (चि० २६।२५७)
यो०—सुमनःप्रवालाः-सुमनसां जातीनां प्रवालाः पल्लवाः (सू० ३।४)
—सुमनःप्रवाला-सुमनःप्रवालान् जातीपल्लवान् (सू० ३।१४)
—जातिः (वि० ८।१३५, १४३)
—सुमनःप्रवालः-सुमना जाती। तस्याः प्रवालेन पल्लवेन (चि० ७।९४)

सुमुखः

च०—पर्णासभेदः (सू० २७।१७३)
—सुमुखादयः फणिज्झककान्ताः पर्णासभेदाः (नि० २।४)
—सुमुखादयः पर्णासभेदाः (वि० ८।१५१; चि० ३।२६७)
ग०—तुलसीभेदः (सू० २६।८४)
—सुमुखा पर्णासभेदः (सू० २७।१७३)
—शाकभेदः (वि० ७।१७)
—शाकविशेषः (वि० ७।२१)
—पर्णासभेदः (वि० ८।१४२)
—पर्णासः (चि० ३।२६७)
यो०—अर्जकसुमुखसुरसाः पर्णासभेदाः। आदिना अन्येषां हरितकानां संग्रहः (सू० २६।८४)
—पर्णासभेदः (सू० २७।१७३)
—सुमुखादि फणिज्झककान्ताः तुलसीभेदाः (वि०८।१४२)
—सुमुखादयः पर्णासभेदाः(वि० ८।१५१)
—सुमुखसुरसकुठेरककालमालकपर्णासफणिज्झकाः तुलसीभेदाः (चि० ३।२६७)

सुरदारु

च०—देवदारुः (सू० ३।८, १८, २४, २८; ४।१८ इत्यादि)
—देवदारु (चि० १९।१०५ (पा०)

सुरभिः(भी)

च०—सुरभी शूकशिम्बा (सू० ५।६५)
—सुरभी पर्णासभेदः (चि० २३।२४३)
ग०—सुरभी-सुरभिः शूकशिम्बा (सू० ५।६५)
—सुरभी सुगन्धा गन्धरास्ना (चि० २३।२४३)
यो०—सुरभीं सल्लकीं शूकशिम्बीं वा (सू० ५।६५)
—सुरभिजातीफलम् (चि० १५।८३ (पा०)

सुरभिपर्णी

यो०—तुलसी (सू० २७।१६९ (पा०)

सुरसः

च०—सुमुखादयः फणिज्झककान्ताः पर्णासभेदाः (नि० २।४)
—सुमुखादयः पर्णासभेदाः (वि० ८।१५१; चि० ३।२६७)
—सुरसमञ्जरी पर्णासभेदः (चि० २३।१०१)
ग०—सुरसां पर्णासभेदम्। श्वेतां श्वेतापराजिताम्। श्वेतां सुरसामिति श्वेतसुरसा, श्वेतशेफालिकेत्यन्ये (सू० २।४)
—सुरसा पर्णासः (सू० ४।३७)
—सुरसार्जकौ द्वौ पर्णासभेदौ (सू० १४।३२)
—पर्णाशः (सू० २६।८४; चि० १३।१८३ (पा०)
—पर्णासः (सू० २७।१६९; चि० ३।२६७; १३।१८२ (पा०)
—तुलसीभेदः (वि० ८।१४२)
—श्वेतपर्णासः (चि० ५।७०)
—सुरसार्जकौ पर्णासभेदौ श्वेतकृष्णतुलस्यौ (चि० ७।११२)
—तुलसी (चि० १८।१७१)
—सुरसाग्रं निर्गुण्डी-मञ्जरी (चि० २३।५४)
—सुरसा तुलसी (चि० २३।७९)
—सुरसस्यासितस्य-असितसुरसः कृष्णतुलसी (चि० २३।१८१)
—[1]सुरसमञ्जरी तुलसीमञ्जरी (चि० २३।२१२)
—सुरसस्य कृष्णस्यैव कृष्णतुलसी (चि० २६।२६९)
—श्वेतपर्णाशः (चि० २७।५६)
यो०—सुरसाकुठेरकफणिज्झकाः पर्णासभेदाः (सू० २।४)
—पर्णासम् (सू० ३।८; चि० १८।१६३)
—सुरसा पर्णासभेदः (सू० ४।३७)
—सुरसार्जकौ पर्णासभेदौ (सू० १४।३२)
—अर्जकसुमुखसुरसाः पर्णासभेदाः (सू० २६।८४)
—सुरसादयः तुलसीभेदाः (वि० ७।१७)
—सुमुखसुरसकुठेरककालमालकपर्णासफणिज्झकाः तुलतुलसीभेदाः (चि० ३।२६७)
—श्वेतपर्णासः (चि० ५।७०)
—सुरसार्जकौ पर्णासभेदौ श्वेतकृष्णतुलस्यौ (चि० ७।११२)
—तुलसीभेदः (चि० ८।१०१)
—सुरसा तुलसीभेदः (चि० १४५)
—सुरसः पर्णभेदः (चि० १७।१२३)
—सुरसमञ्जरीम्-सुरसस्य पर्णासभेदस्य मञ्जरीम् (चि० १८।७१)
—पर्णासभेदः (चि० १८।१२३)

सुराह्वः

जे०—देवदारु (चि० २८।११३)
च०—[2]देवदारु (चि० ६।२६)
—[3]सुराह्वा गोरक्षकर्कटिका (चि० १४।१६०)
ग०—देवदारुः (सू० ३।३; ५।६५ (पा०)
—सुराह्व देवदारु (चि० ६।२६)

---

१. यहाँ पर मूल इस प्रकार है "सुरसस्य च पत्राणि पत्रं कृष्णशणस्य च"।

२. ब० में मूल पाठ 'सुराह्वां' तथा योगीन्द्रनाथ के मूल में 'सुराह्वं' पाठ है।

३. यहाँ मूल में पाठ 'सुराह्वं' है।

यो०—देवदारुः (सू० ३।३; ५।६५; चि० ६।२८; १८।११२)
—देवदारु (चि० ६।२६)
—देवदारु। शताह्वेति वृद्धवाग्भटः (चि० १४।१६०)

सुवर्चला

च०—सूर्यभक्तिका, केचित् फल्गुकमाहुः (ब०)। सूर्यभक्तिका, केचिन्न फलकमाहुः (कल०) (सू० २७।९९)
—[1]सुवर्चिका सूर्यावर्तः (चि० १२।६३
—सूर्यावर्ता (चि० १४।१२३)
—सूर्यभक्ता (चि० १९।३२)
—सौवर्चलमिति सूर्यावर्तशाकम् (चि० २९।५३)
—सुवर्चलमिति सुनिषण्णकमाहुः (सि० ७।६१)

ग०—सूर्यभक्तापुष्पम् (सू० २७।९९)
—सूर्यमुखी (चि० १२।६३)
—सूर्यमणिः (चि० १२।७२)
—सूर्यभक्ता (चि० १७।११३; १९।३२; सि० ७।६१)

यो०—सूर्यावर्तः (सू० २७।९९)
—सूर्यभक्तिका (चि० १२।६३, ७२)
—सूर्यभक्ता (चि० १४।१२३; १७।११३; १९।३२)

सुवहा

च०—[2]सुवहा त्रिवृत् (सू० ४।४)
—रास्ना हाफरमाली वा (सू० ४।१६)

ग०—त्रिवृत् (सू० ४।४)
—रास्ना हाफरमाली वा (सू० ४।१६)
—शेफालिका (वि० ७।२१)

यो०—रास्ना। हाफरमाली वा (सू० ४।१६)
—शेफालिका (वि० ७।२१)

सुषवी

च०—कारवेल्लकः (वि० ८।१३५; क० १।२२)

ग०—पर्णासभेदः (वि० ८।१३५)
—वन्यकारवेल्लः (वि० ८।१४३)
—कृष्णजीरकम् (चि० १५।८३)
—कारवेल्लः (क० १।२२)

यो०—कारवेल्लकः (वि० ८।१३५)
—वन्यकारवेल्लः (वि० ८।१४३)
—कृष्णजीरकम् (चि० १५।८३)

१. इस स्थल पर मूल में पाठ 'सुवर्चला' है किन्तु व्याख्या 'सुवर्चिका' की है।

२. 'सरला' इति पा०।

सूक्ष्मैला

यो०—सूक्ष्मायाः क्षुद्रायाः एलायाः फलानि (सू० ५।७७)

सूर्यकान्ता

ग०—सूर्यकान्ता नाम लोके (चि० १।४।७)

सेव्यम्

जे०—उशीरम् (चि० २४।१५९)

च०—उशीरम् (चि० ६।५०; १८।७३)

ग०—उशीरम् (चि० ६।५०; ७।१३२; १८।७३; २०।३२; २३।१००)

यो०—उशीरम् (चि० ६।५०; ७।४६, १२८, १३२; १४।१६४; २०।३२ (पा०)

सैरेयकः

च०—सैरेयः झिण्टी (ब०)। शैरीयः झिण्टी (कल०) (सू० १४।३२)

ग०—शैरीयो झिण्टी (सू० १४।३२)

यो०—शैरीयः झिण्टी। सुरया इत्यपि पाठः (सू० १४।३२)

सोमः

च०—ओषधिराजः पञ्चदशपर्वा (सू० २५।४०)
—सोम इव वर्धते हीयते इति यथा सोमवृद्धिक्षयौ, तथा तत्कालमेव तस्य वृद्धिक्षयौ भवतः (चि० १।४।७)

ग०—विज्ञानमौषधीनां–विंशतिविधि ओषधीनाम् (सू० २५।४०)
—सोम इव चन्द्र इव कृष्णपक्षे प्रतिपदादिषु एकैकतिथिषु उत्तरोत्तरमेकैककलया यथा चन्द्रो हीयते तथा पञ्चदशपर्णः सोमो नामौषधिराजः कृष्णपक्षे प्रतिपदादितिथिष्वेकैकपत्रेणोत्तरोत्तरं हीयते। तथा शुक्लपक्षे वर्द्धते चन्द्र इवेति बोध्यम् (चि० १।४।७)

यो०—सोम इति। ओषधीनां राजा इति ओषधिराजः। पञ्चदश पर्णानि यस्य स पञ्चदशपर्णः। स सोमश्चन्द्र इव हीयते क्षीयते। वर्द्धते च। यथा कृष्णपक्षे प्रतिपदादिषु पञ्चदशसु तिथिषु प्रतिदिनं चन्द्रस्य एकैककलाक्षयः शुक्लपक्षे च एकैककलावृद्धिः। तथा कृष्णपक्षे प्रतिदिनं सोमस्य ओषधिराजस्य एकैकं पत्रं क्षीयते। शुक्लपक्षे पुनर्जायते च (चि० १।४।७)

सोमराजी

च०—[1]अवल्गुजः (सू० २।२४)

१. 'अवन्तिजः' इति पा०।

—वाकुची (चि० २६।२७२)
ग०—अवल्गुजा (सू० २।२४)
यो०—अवल्गुजा वाकुची (सू० २।२४)

सोमवल्कः

जे०—कट्फलः (चि० २३।२२०)
च०—खदिरः (सू० ४।३३; वि० ८।१३५)
—विटखदिरः (चि० ११।७७; सि० १०।४३)
ग०—खदिरः (सू० ४।३३)
—श्वेतखदिरः (वि० ८।१३५, १४३; चि० ११।७७; ६।३८; २३।२२० इत्यादि)
यो०—खदिरः (सू० ४।३३; वि० ८।१३५)
—श्वेतखदिरः (वि० ८।१४३)
—विट्खदिरः (चि० ११।७७; ६।३८)

सोमवल्ली

च०—सोमलता (वि० ८।१३९)
ग०—सोमलता (वि० ८।१३९)
यो०—सोमलता (वि० ८।१३९)

सौगन्धिकम्

जे०—अत्यर्थं सुगन्धितम् (चि० ३।२५८)
च०—गन्धतृणं गन्धको वा (सू० ३।१०)
—शुन्धी (सू० ४।३४)
—सौगन्ध्यं माणिक्यभेदः (चि० १७।१२६)
ग०—कह्लारपुष्पं सुन्धीति लोके (सू० ३।१०; चि० ३।२५८)
—श्वेतपुष्पं कह्लारम् (सू० ४।३४)
—रक्तपुष्पञ्च (सू० २५।४९)
—कह्लारपुष्पम् (चि० १७।१२६)
यो०—कुवलयं । वाग्भटयोः सौगन्धिकमित्यत्र गन्धोपलः इति पाठः। गन्धोपलः गन्धकः (सू० ३।१०)
—कुवलयम् (सू० ४।३४; चि० ३।२५८)
—नीलोत्पलं, कसेरुकं कसेरु इति ख्यातं च। तत्। सौगन्धिकं माणिक्यभेदः। कसेरुकं ईषन्नीलपीतो-मणिविशेषः-इत्यन्ये (चि० १७।१२६)

सौमनस्यायनी

च०—जातिकलिका जातिकोषो वा (वि० ८।१३५)
—जात्याः सौमनसायिन्या-जाती सौमनस्यायिनी, अन्ये पृथिकां वदन्ति (क० ४।१६)
ग०—जात्याः सौमनसायिन्या-सौमनसायिन्या जात्या इति मालत्याः (क० ४।१६)
यो०—जातिकलिका (वि० ८।१३५)

सौवर्णी(त्वक्)

च०—दारुहरिद्रात्वक् (ब०) । दारुहरिद्रा (कल०) (चि० ७।७७)
ग०—शम्पाकवृक्षस्य त्वक् (चि० ७।७७)
यो०—आरग्वधवृक्षस्य त्वक् (चि० ७।७७)

स्थिरा

जे०—शालपर्णी (चि० २९।९२)
ग०—शालपर्णी (सू० ४।७; चि० ११।५८, १।४।६; ३।२४२; ४।४६; ९।४७ इत्यादि)
—कलसी शालपर्णी·········स्थिरामपिशालपर्णीविशेषं शालपर्ण्या भागद्वयं वा (चि० ३।२२४)
यो०—शालपर्णी (सू० ४।७, ५०; ५।६४; २३।१९; चि० ११।५८; १३।१५९ (पा०) इत्यादि)

स्थिरादिपञ्चमूली

जे०—स्थिरादिभिः पञ्चमूलीद्वयेन (चि० २८।११४)
च०—स्थिरादीनीत्युक्ते विदारिगन्धादिपञ्चमूलम् (चि० ९।४२)
—स्थिरादिवर्गस्येति अल्पपञ्चमूलस्य (चि० २६।२३)
—स्थिरादिभिः पञ्चमूलैः (चि० २६।४५)
—स्थिरादिकानामित्यादौ कतकादिः मधुरस्कन्धे (वि० अ० ८) "०[१]कतककाश्मर्य०" इत्यादिनोक्तो गणो ज्ञेयः (चि० २६।७४)
ग०—स्थिरादिपञ्चमूलेन शालपर्ण्यादिपञ्चमूलेन (चि० ८।१३३)
—स्थिरादिभिः-स्थिरादिः शालपर्ण्यादिपञ्चमूलम् (चि० १६।१४; २६।१६०)
—स्थिरादिवर्गः शालपर्ण्यादिपञ्चमूली (चि० २६।२३)
—स्थिरादिभिः शालपर्ण्यादिभिः पञ्चमूलैः (चि० २६।४५)
—स्थिरादिकानां शालपर्ण्यादिपञ्चमूलानाम् (चि० २६।७४)
—स्थिरादिवर्गस्य-स्थिरादीत्यादि । शालपर्ण्यादिपञ्च-मूलस्य (सि० ३।३६)
—स्थिरादीनां स्वल्पपञ्चमूलानाम् (सि० ८।४०)
—स्थिरादिपञ्चमूलानि बृहत्पञ्चमूलान्तानि (सि० १२।१६।१)
—स्थिरादि स्थिरादिपञ्चमूलः (१२।१८।३)

---

१. 'कालङ्कतककाश्मर्येत्यादिनोक्तो गणो ज्ञेयः । कालङ्कतको विकङ्कतकः' इति पा० ।

योо—स्थिरादिपञ्चमूलेन शालपर्ण्यादिपञ्चमूलेन, तच्च ह्रस्वपञ्चमूलम् (चि० ८।१३३)

— स्थिरादिभि: शालपर्ण्यादिभि: ह्रस्वपञ्चमूलेन (चि० १६।११४)

स्थौणेयकम्

च० — ग्रन्थिपर्णकं.......केचिदत्र स्थौणेयकं परित्यज्यापाकीपाद्या विंशति पूरयन्ति, अपाकीपादी स्वनामख्याता (क० १।२३)

ग० — स्थौणेयं ग्रन्थिपर्णकम् (चि० ३।२६७)

— थौणेयकं ग्रन्थिपर्णं, छान्दसत्वात् सकारलोप: (चि० १२।६५)

— स्थौणेयं ग्रन्थिपर्णम् (चि० २३।५४)

यो०—ग्रन्थिपर्णम् (चि० ३।२६७)

— थौणेयकं स्थौणेयकं ग्रन्थिपर्णम्। सकारलोपश्छान्दस: (चि० १२।६५)

स्नुक्-स्नुही

ग० — स्नुह्यर्काश्मन्तका: सुधावृक्षाकन्दाख्यवृक्षपाषाणभेदि-नामकवृक्षा-स्तेषामिदम्......... (सू० १।११४)

— स्नुक् स्नुही (सू० २५।४०)

यो०—स्नुही महावृक्ष: (सू० १।११४)

— स्नुक् स्नुही (सू० २५/४०; चि० १३।१४०-१४१; १३।१६७)

स्पृ (पृ) क्का

ग० — पृक्का पिड़ङ्ग इति लोके (चि० १२।६६)

— पृक्का पिड़ङ्ग: (चि० २३।५४)

— पृक्का पिड़ङ्गशाकम् (चि० २३।७७)

यो०—तदाख्य: सुगन्धिशाकभेद: (चि० १२।६६)

स्फूर्जक:

ग० — तिन्दुक: (वि० ८।१४४)

यो०—तिन्दुक: (वि० ८।१४४)

स्यन्दन:

च० — नेमिवृक्ष: (चि० ३।२५८)

ग० — तिनिशवृक्ष: (सू० २५।४९)

— नेमिस्तिनिश इति ख्यात: (वि० ८।१४४)

— नेमिवृक्ष: (चि० ३।२५८)

यो०—तिनिश: (सू २५।४९)

— नेमि: तिनिश इति ख्यात: (वि० ८।१४४)

— तिनिशभेद: (चि० ३।२५८)

स्वयंगुप्ता

च० — शूकशिम्बी (चि० १८।३९)

ग० — स्वयंगुप्ता शूकशिम्बी (चि० ११।५७)

— स्वयंगुप्तात्मगुप्ता (चि० ९।४३; १८।५७)

— शूकशिम्बी (चि० १८।३९)

यो०—स्वयंगुप्ता शूकशिम्बी (चि० ११।५८; १८।५७)

— स्वयंगुप्ताफलस्य आत्मगुप्ताफलानाम् (चि० २।३।१५)

— स्वयंगुप्ता आत्मगुप्ता शूकशिम्बी (चि० ९।४३)

— शूकशिम्बी (चि० ११।४५; १८।३९)

स्वर्णक्षीरी-सुवर्णक्षीरी

जे० — स्थूलवत्या (पत्रा) यवतिक्ता, कंकुष्ठमिति ह लोके (चि० २३।२०३)

च० — स्वर्णक्षीरिणी अङ्गुष्ठप्रभा (सू० ४।४)
'कङ्कुष्ठप्रभवा' इति पा०।

ग० — स्वर्णक्षीरिणी स्वर्णवर्णनिर्यासा क्षीरिणी स्वनामख्याता (सू० ४।४)

— स्वर्णक्षीरी पटुपर्णी, ब्राह्मीशाकविशेष इति केचित् (चि० १३।१२६)

— स्वर्णक्षीरी स्वर्णवर्णनिर्यासवृक्षविशेष: (चि० १६।६६)

— स्वर्णक्षीरी स्वनामख्याता (क० ७।१६)

यो०—स्वर्णक्षीरिणी स्वर्णक्षीरा स्वनामख्याता (सू० ४।४)

— स्वर्णक्षीरी पटुपर्णी (चि० १३।१२६)

— स्वर्णक्षीरी स्वर्णवर्णनिर्यासवृक्षविशेष: (चि० १६।६६)

स्वादुकण्टक:

च० — विकङ्कत: (क० १।२२)

ग० — वैकङ्कत: (वि० ८।१३५)

— वैकङ्कत:, बुँइछि इति लोके (क० १।२२)

यो०—विकङ्कत: (वि० ८।१३५)

हंसपदी

जे० — हंसपादी प्रसिद्धैव मधुरसा (चि० २३।२३०)

— घृतमण्डा (चि० २९।९२)

च० — स्वनामप्रसिद्धा (सू० ४।९)

— स्वनामख्याता (चि० २९।९२)

ग० — थुलकुड़ी (सू० ४।९; वि० ८।१३९)

यो०—त्रिपादी हंसपदाकारपत्रा पीतपुष्पा जलमुक्तदेशजाता हंसपादी इति लोके ख्याता (सू० ४।९)

— हंसपदाकारपत्रा लता (वि० ८।१३९)

हवुषा

गo — हवुषामिति स्वनामख्याताम् (सू० २३।२०)
— हवुषा स्वनामख्याता (चि० ५।७१, ७९; १४।७२)
— हवुषं आउच इति ख्यातम् (चि० १३।१२५)
— हवुषा आउच इति ख्यातम् (चि० १३।१३३)
— हवुषा आउच इति लोके (चि २६।६१)

यो०—हवुषा मरिचवृन्तवत् दीर्घकृष्णवर्णद्रव्यभेदः। हवुषफल इति ख्याता (चि० ५।७१)
— हवुषा हवुषफलम् (चि० १३।१०५)
— हवुषा स्वनामख्याता (चि० १४।७२)

हयमारकः

च० — करवीरः, तस्य त्वग् ग्राह्या, मध्यं च पृथग्भावेन ग्राह्यम् (सू० ३।१४)

यो०—करवीरः (सू० ३।१४)

हरिचन्दनम्

च० — हरिचन्दनशब्देन श्वेतचन्दनं विवक्षितं, हरिशब्दस्यानेकार्थत्वात्; हरिशब्देन श्वेतस्यैव' ग्रहणं, प्रशस्तत्वात् (शा० ८।९)
१ 'सर्वस्य च श्वेतस्यैव' इति पा०

ग० — श्वेतचन्दनम् (शा० ८।९)

हरिद्रा

ग० — हरिद्रे हरिद्रे द्वे (सू २।५)
— हरिद्रे हरिद्राद्वयम् (सू० ३।३)
— उभे हरिद्रे-हरिद्रे इति द्विवचनेन हरिद्राद्वयलाभे उभे इति पदं स्पष्टार्थम् (३।१४)
— हरिद्रे-द्वे हरिद्रे (सू० ३।२५; चि० ७।१५३)

यो०—हरिद्रे द्वे-हरिद्रां दारुहरिद्रां च (सू० २।५)
— हरिद्रे हरिद्राद्वयम् (सू० ३।३, ८; चि० १६।४७)
— उभे हरिद्रे हरिद्राद्वयं हरिद्रा दारुहरिद्रा च (सू० ३।१४)
— द्वे हरिद्रे हरिद्राद्वयम् (सू० ३।२५)
— द्वे हरिद्रे हरिद्रा दारुहरिद्रा च (सू० २३।१९; चि० ७।१०८)
— हरिद्राग्निना दारुहरिद्राग्निना (सू २६।८४)
— उभे हरिद्रे-उभे द्वे हरिद्रे हरिद्रा दारुहरिद्रा च (चि० ६।२७)
— हरिद्रे-हरिद्रे द्वे (चि० ७।१५३; १६।९४)

हरेणुः-हरेणुका

जे० — कलायः (चि० २३।२२६)

च० — हरेणुका रेणुका (सू० ५।२०)
— वर्तुलकलायः (सू २७।२८)
— हरेणवः वर्तुलकलायः (नि० ४।५ चि० २१।८०)
— हरेणुर्बहलकलायः (नि० ४।५) (क.)

ग० — हरेणुकां स्वनामख्यातां रेणुकामिति (सू० २।४)
— हरेणुः - हरेणुका रेणुकः (सू० ३।५)
— हरेणुका रेणुकेति ख्याता (सू० ५।२०)
— वर्तुलकलायः (नि०४।५; चि० १९।५० २३।२२६)
— हरेणवश्च वर्तुलकलायभेदा न तु सतीनः। स च वर्तुलकलायविशेषो न तु त्रिपुटकलायः (सू० २७।२८)
— रेणुका (वि० ८।१३५)
— हरेणुका-हरेणुकं रेणुकमिति लोके (चि० ३।२६७)
— हरेणुका रेणुकः (चि० ७।१३२)
— हरेणवो वर्तुलकलायाः (चि० २१।८०)
— हरेणवश्चातिवर्तुलकलायाः (चि० २५।६२)

यो०—हरेणुकां रेणुकाम् (सू २।४; ५।२०; चि० ३।२६७)
— रेणुका (सू० ३।५; ५।६५; वि० ८।१३५)
— वर्तुलकलायः मटर इति ख्यातः (सू० २७।२८)
— वर्तुलकलायः (नि० ४।५)
— बर्त्तुलकलायः मटर इति ख्यातः (चि० १९।५०)

हस्तिदन्ती

च० — बृहत्फला गोडुम्बा, 'इयमेव नागदन्ती भण्यते' इत्येके। (ब.)
— बृहत्फला गोडुम्बा, नागदन्ती भण्यते इत्येके (क.) (सू० १।७७)

ग० — नागदन्तीति ख्याता हस्तिदन्तवन्मूला (सू० १।७७)

ग० — नागदन्तीति ख्याता हस्तिदन्तवन्मूला (सू० १।७७)

यो०—बृहत्फला गोडुम्बा, नागदन्तीत्येके (सू० १।७७)

हस्तिपर्णिनी

च० — मोरटः, अस्याश्च शरत्कालभवमेव फलं ग्राह्यं; अत उक्तं-हस्तिपर्ण्याश्च शारदमिति (पू. १।८२)

ग० — हस्तिपर्ण्याश्च शारदं फलम्, न त्वन्यकालजम्। हस्तपर्णी मोरटः (सू० १।८२)
— मोरटः (शा० ८।४१)

यो०—शारदा हस्तिपर्णी हस्तिपर्ण्याः शरत्कालभवं फलं इत्यर्थः (सू० १।८२)
— हस्तिपर्ण्याः शारदं फलम् (सू० १।८३)

हस्तिपिप्पली

यो०—गजपिप्पली (वि० ८।१४२)

— हस्तिपिप्पलि: गजपिप्पली। ह्रस्वश्छान्दस: (चि० १३।१०८)

— चविका (चि० १३।१४८, १५८; १४।१०४)

— पिप्पली हस्तिपिप्पली च पिप्पलीद्वयम् (चि० १४।७२)

हस्तिश्यामाक:

च० — श्यामाकभेद एव (सू० २७।१७)

ग० — वृहच्छ्यामघसवीजम् (सू० २७।१७)

यो०—श्यामिका (सू० २७।१७)

हायनक:

च०—इह च द्रव्यनामानि नानादेशप्रसिद्धानि, तेन नामज्ञाने सामर्थ्यं तथाभूतं नास्त्येवान्येषामपि टीकाकृतां, तेन देशान्तरिभ्यो नाम प्रायशो ज्ञेयं, यत्तु प्रचरति गौडे तल्लेखिष्यामोऽन्यदेशप्रसिद्धं च किंचित् (सू० २७।१२)

— हायनकादयो धान्यविशेषा: (नि० ४।५)

— हायनको धान्यविशेष: (नि० ४।५)

ग० — हायनकादीनां देशविशेषे स्वनाम्ना ख्यातप्रसिद्धानाम् (नि० ४।५)

यो०—यवकहायनपांशुबाष्पनषधय:। आदिशब्देन यवपत्रिकादय: शालिविशेषा: गृह्यन्ते। ते च शालय: शालिविशेषा: (सू० २७।१२)

हारिद्र:

यो०—कुप्रसव: शाकविशेष: सार्पच्छत्रानुकारी पीताभास: इति केचित् (सू० २६।८४)

हिंस्रा

ग० — कालियाकड़ (चि० ३।२६७)

यो०—जटामांसी (चि० ३।२६७)

हिङ्गु

ग० — हिङ्गुनिर्यास: (सू० २।२९; २७।२९९; चि० १०।३७)

यो०—हिङ्गुनिर्यास: (सू० २।२९; ४।६; चि० १०।३७)

हिङ्गुपर्णी-हिङ्गुशिवाटिका

च०— हिङ्गुपर्णी वंशपत्रिका, अन्ये तु, 'हिङ्गुपर्णी' इति ख्यातामाहु: (चि० ९।५७)

— हिङ्गुपर्णी वंशपत्रिका (चि० ९।५७)

— हिङ्गुशिवाटिका वंशपत्रिका (चि० १०।३५)

ग० — "हिङ्गुपर्णी वेणुपत्री नाड़ी हिङ्गुशिराटिका।" इति पर्याया:। वेणुपाती-वृक्षे। देशभेदे वांशपातीति (चि० ९।५७)

— हिङ्गुशिराटिका हिङ्गुपत्री, न तु हिङ्गुनो भागद्वयम् (चि० १०।३७)

— हिङ्गुशिराटिका हिङ्गुपत्री। हिङ्गुपत्री वेणुपत्री नाड़ी हिङ्गुशिराटिकेति पर्याया:। लोके वेणुपातनामवनजविशेषा: (चि० १५।१०९)

यो०—हिङ्गुपर्ण्या वेणुपत्र्या (चि० ९।५७)

— हिङ्गुशिराटिकां वंशपत्रीम् (चि० १०।३७; १५।१०९)

हेम

जे० — नागकेशरम् (चि० २४।१५९, २५।११६)

च० — नाकगेशरम् (सू० ३।२९; चि० २१।७४; २७।३८)

ग० — नागकेशरम् (सू० ३।२९; चि० १२।६५; २५।११६, ११७; २७।३८)

— नागकेशरपुष्पम् (चि० २१।७४)

यो०—नागकेशरम् (सू० ३।२९)

— नागकेसर (चि० १२।३६ (पा०), ६५)

हेमक्षीरी-हेमदुग्धा.

जे० — हेमक्षीरी कङ्कुष्ठ: (चि० २५।५३)

च० — हेमक्षीरी कङ्कुष्ठम् (चि० २५।५३)

— हेमदुग्धा स्वर्णक्षीरी (क० १२।२३)

ग० — हेमक्षीरी स्वर्णक्षीरी (चि० २५।५३)

— हेमदुग्धं यज्ञोडुम्बरम् (क० १२।२३)

हैमवती

च० — वचा (सू० १।७७; क० ४।१६)

— श्वेतवचा (सू० ४।३)

ग० — श्वेतवचा (सू० १।७७; ४।३; क० ७।५१)

— श्वेतवचा, वचा तदितरो वचा (क० ७।१६)

यो०—श्वेतवचा (सू० १।७७; ४।३)

ह्रीबेरम्

ग० — बालकम् (सू० ५।२१; वि० ८।१३५)

— ह्रीवेरं बालकम् तस्य मूलानि (चि० ४।७५)

यो०—ह्रीवेरं बालकम् (सू० २।२१; ४।२९, ४१, ५।२१, ६४ आदि)

— बालकम् (वि० ८।१३५; १९।५२)

— ह्रीवेरं-ह्रीबेरं बालकम् (चि० १९।२०)

INDEX